नं० ५१८-घ

आर्यासप्तशती (ख भाग)

गोवर्द्धन सप्तशती व्यंगयार्थ-
दीपनम (काव्यम)

~~पत्राणि २०४ त: ४०८~~

पत्राणि ११६ त: २०४

गोवर्द्धन सप्तशतीव्यंगयार्थदीपनम
(काव्यम)

११६

पत्राणि ~~२०४ त: ४०८~~

सखीनायकंप्रतिनायिकाप्रेमाधिक्यंवक्ति ॥ पतिर्निर्व्यलीकप्रियः तन्मुलकैःप्रेमजन्यसात्त्विकभा
वरूपैः खिन्नानिगात्राणियस्याःसा एवंचातिकोमलांगीत्वंव्यज्यते स्वस्यछायायाअपिवीततोभ
यापिया अपिप्राणप्यन्वेति साकंटकंदलयन्ती कंटकमित्येकत्वमविवक्षितं अंधकारेत्वा
मभिसरति हेसुभग एतादृशानायिकाव्याप्यतादृश्याभिसरणाबन्धादितिभावः स्वछायेत्यनेन
परसंसर्गराहित्येनातिप्रामाणिकत्वंद्योत्यते तेनचैतादृश्यपिन्वय्यासक्तेत्यतस्त्वयानकदापी
यपरित्याज्येति ॥ ४.६ ॥ अत्रक्रीडनंविधेयमधुनेतिवादिनींनायिकांनायकोवक्ति ॥ प्रकृतः ए
वंचान्यथाकरणाशीलाभावोव्यज्यते प्रतिमूर्लीरनकः उरुष्टशृंगाररससंकथ्यनमेव विपक्षेऽनाक

पतिपुलककृहनगात्रीस्वछायावीक्षतोपिसासभया ॥ अभिसरतिसुभगसात्वांविदलंती
कंटकंतमसि ॥ ४.६ ॥ प्रतिभूः प्रकोविपक्षेदंडः शृंगारसंकथामरुष्टु ॥ पुरुषायितंप्रयत्न
शालेपरिभाव्यतांदाय: ॥ ४.७ ॥ परमोहनायमद्रोनिष्ककरणेतरुणिनवकटाक्षोऽयम् ॥
विशिखवद्बकलितकर्णःप्रविशतिहृदयंननिःसरति ॥ ४.८ ॥ ॥

रणोदंडः पुरुषायितंविपरीतरतंपणःपराजयेदेयवस्तु तत्तर्हिबालेदायःप्राप्यप्रातनंप्रविभाव्यतांक्रिय
तां एवंचात्रक्रीडनेपदिनवास्तिरतिस्तर्द्युनयाशीघ्रात्रक्रीडनंविधेयमितिभावः एवंचरसत्वकणाभव्यते
अत्रवाल्पापदेनमुग्धानविवक्षितातस्यास्त्वेवंविधप्रागल्भ्याभावात् ४.७ ॥ कथात्वनविशेषितःकाचि
त्तामत्याह अहं हृष्टतरतायमोहनंनारभेन्नावदित्यादिकाप्रसंगप्रेमोहनशास्त्रस्यपतरतार्थेकत्वेनकथना
त् यद्वोत्कृष्टश्रोत्रे अथवान्यस्यवध्यतासंपादनाय पक्षेप्रात्रप्रसव्योयेमरणायेतिवा मुग्धःकलितः
कर्णोयेनआकर्णविशालत्वप्रयर्थः पक्षेकर्णनाकृष्टत्वप्रयर्थः नवकटाक्षोबाणादिवहृदयंप्रविशतिननिःस
रति हेतरुणि एवंचवलवत्त्वेवितत्वेनदुःसहत्वंध्वन्यते अतएवनिर्गतकरुणा कलितकर्णइत्यनेनसंपूर्णाक

गो॰टी॰ ११६ सखीनायकंप्रतिवक्ति॥॥ पादाग्रावलंबितभूमिः प्रीतिभयाभ्यां मनोन्नयनात्वांचुंबतीस्तनं॥
एवं च संगयोगपत्वं ध्वन्यते कृष्णग्रस्यापि न [illegible]चुंबाभावेन न पतिता एवं च साहसकारित्वमावेद्य
116 ते॥४९॥ नायिकासखीवक्ति॥॥ प्रातः समीपमागत्य मृग्याभाषिणोनारूमन्यत्र गतरूपस्वप्रि
यस्येत्याद्यनुपादानात् संतङ्ःस्वमेव ध्वन्यते लज्जा न विद्यते ननु बालत्वं गतएव भविष्यतीत्यत
आह योयं वदनलग्नयाहरधकालिकाया नयनचुंबनजन्ययेति भावः हरधपदेन तस्यां हेवि
प्रोषवत्तावेद्यते न लज्जते एवं च प्राप्तविकारचिह्नत्वान्मिथ्याभाषित्वं दृढीक्रियते॥ अथ च
प्रमामनुरक्तत्वेपि परिहारकारकतया निर्लज्जत्वं द्योत्यते॥५०॥॥ सखीनायिकांवक्ति॥॥ हेहंसो

प्रपदालंबितभूमिश्चुंबंती प्रीतिभीतिमधुराक्षी॥ प्रावीनाग्रनिवेशितचिबुकं यन्निप
तितास्तनं॥४९॥ प्रातरुपागत्य स्मृषावदनः स विनाप्य विद्यते व्रीडा॥ मुखलग्नयापि
योयं न लज्जते हरध्यकालिकया॥५०॥ पशुपोनंतनदविफाल्गुनमासाद्य निर्जितविप
तः॥ वैराटिरिव पतंगः प्रत्यानयनं करोति गवाम्॥५१॥॥

हरि उत्तरादिगस्य स्येत्यर्थः आटित्वाद्य च उत्तरदिक्संबंधी पक्षे अरहृतितन्नाम निर्जितहिमादिविपक्षः
पक्षे विपक्षः सुयोधनादिः पतंगः सूर्यः फाल्गुनमासं पक्षे र्जुनं प्राप्य विराटापत्यमिव गवां किरणानां
पक्षे धेनूनां पराहतिं करोति हेमंतापगमात्तेजोविशेषशालितया किरणप्रत्यानयनोक्तिः एवं च हेम
तेगते पिवसंतादावचश्यंपमदनमहत्सरपरसंत्रस्तवप्रियः समायास्यतीति व्यज्यते यद्वा फाल्गुनसाहा
य्येन वैराटिना गावः पराहृत्यानीताः पतंगेन किरणास्तथात्वमिदानीं तन्नेता दृष्टा समयसाहाय्येन नाय
कश्चित्स्वान्यांगनानां पराहतिं विधेहीति ध्वन्यते श्लेषमात्रमत्रेति त्र्यटजवः केनचित्कस्यचित्साहा
य्येन स्वकीयं गतं वस्त्वानीयत इत्यन्योक्तिरपि॥५१॥॥ ॥ ११६

नायकोनायिकांवक्ति ॥ अंतःपुरसमीपवनं प्रमदवनसंज्ञकाद्विवनं वा त्वदीयस्तनशैलगभी
रसंामलमितिदुर्गत्रयं निदाघेन ग्रीष्मेण जरातिनिरस्तं शोषं प्राप्नोति एवं च निजतरासांश्रयसा।
दितिवक्तुमप्यापमदनसंतापसंतप्तस्य मम त्वन्तुचावेव प्रारणा वितिव्यज्यते तेन च त्वं मदंगीकार्येव।
विति अन्योपिकेनचित्प्रकारेण भूतो वनशैलजलदुर्गाश्रयेणजीवतीति लोकिकं अत्र किंकिंदुर्गमि
तिविशेषकर्मोकांक्षायां प्रसरेत्पादि एवं च निदाघकाले यौ त्वं स्थलत्रये धिवसतीतिभावः ५२
नायिकासखीनायकंवक्ति ॥ त्वत्कृतापराधं एकत्वमविवदितं प्रोंछतिनिःश्वासतो ह
रीकरोति मानं नायिका कृतमितिभावः मर्दयतिनिर्हतिं हरतिदुःखं जनयतीत्यर्थः नायिका

प्रमदवनं वनदुर्गं स्तनशैलस्थलगंभीरसरसीव ॥ जगति निदाघनिरस्तं शोषं त्वं दु।
र्गत्रयं प्रयाति ॥ ५२ ॥ प्रोंछति न त्वापराधं मानं मर्दयति हरति निर्हतिम् ॥ स्वकृ।
तानि हंति शपथान् जागरदीर्घा निशा सुभगा ॥ ५३ ॥ प्रियआयाते हृदात्मभूतद
वसंगमो भवत्सर्वः ॥ मानकृतिप्रसादाः पुनरासन्न परस्परतादृ ॥ ५४ ॥ ॥ ॥

याप्येवेतिभावः नायिकाकृतानामपथानाम्यहमधुनानेनसह संभाषणमपिकरिष्येनहिचिरवि
रहितान्तुचरणापविचरणां विफलीकरिष्यत्येवमादीन्निहंति उपसर्गाणास्वकृतनशपथस्तनिवी।
जसंस्काराभावोत्यज्यते जागरेणादीर्घरात्रिः हेसुभगा अचेतनयापिनिशयानेकल्पसंपादनादि
तिभावः जागरेणदीर्घानिशायस्याऽनिवा ॥ ५३ ॥ सखीनायिकाकृतमपरसखींप्रतिवक्ति ॥ ॥
प्रियेनतुपत्यौ दूरादायाते एवं च विरहकृत्वमावेद्यते प्रथमः संगोऽसंजातत्वाभवत् द्वितीय
सुरतारंभे मानकृतिप्रसादाः पुनस्तुर्थेऽभूवन् एवं च संगमस्याप्पकालानाकृत्यनमन्मथवि
कारशालित्वमावेद्यते स्वभाववर्णनमेतत् ॥ ५४ ॥ ॥

गो॰ टी॰
११७
117

सखीनायिकां वक्ति ॥ उदयाचलमस्तके निकटवर्त्तिकरणाकिरणाकवलितमिदं तमः शूलाग्र
प्रोतसरुधिरान्धकनामदैत्यशरीरमिव शोभते एवं च प्रातःकालः संवृत्तः अतएव पतिर्निःसा
र्यतामिति ध्वन्यते नायकसहचरवचनमिदं वा एवं चाधुना निर्गन्तव्यमिति भीतिप्रदर्शनपुरः
सरं व्यज्यते अथवा नायिकायाः पद्मिनीत्वात् सूर्योदयोन्मत्तं नरसुरतविधानसौचित्येन सूर्योद
यः सत्वरमेव भविष्यतीति तापकमिदं नायिकासहचरीवाक्यं ॥ यद्वा नायको नायिकां वक्ति ॥
अहरव्यवनकालंकारवद्दारणैकस्यापि युक्तिनीलपाटलकान्तया पूर्वमहीधरशिखरे तत्प
स्य अभिनवकृतनागरपर्थोः सलरनकाश्मीरदीपिकलितमिदं केशजातं शूलाग्रप्रोतरुधिरा

पूर्वमहीधरशिखरे तमः समासन्नमिहिरकरकलितम् ॥ शू
लप्रोतं सरुधिरमिदमन्धकवपुरिवाभाति ॥ ॥ ॥ १२५ ॥ ॥

न्धकासुरवपुरिव तस्य धूम्रत्वादिति भावः आभाति एवं च विपरीतरतसमय
संजातमतिसुखचुंबनेन मनाक्शिखरनिपतितकेशकलापवत्तया शोभितशोभा
स्ति अतएवमेव केशकलापावस्थितिरास्तामिति व्यज्यते तेन च विपरीतरतान्तविर
तिर्विधेयेति ननु शृंगारबीभत्सयोर्विरोधात्कथमत्रोभयनिबंधनमिति चेन्न सर्व
मार्गो विरुद्धोपि साम्येनाप्यविवक्षितः अंगित्वं गत्वमाप्नोयोऽतोऽनयोः परस्परमित्यु
क्त्या यथा तथान्धकवपुश्चमत्करोति तथैवविधकेशकलापस्तिसाम्यप्रतिपादने
न दोषाभावात् ॥ ॥ ॥ १२५ ॥ ॥ ॥ श्रीकामायनमः ॥ ॥ ॥ ११७

सखीनायिकां शिक्षयति ॥ हे अलसाक्षि गर्भभरालसत्वादिति भावः परिह्नतना
भि लुप्तत्रिवलि श्यामच्चुकं वक्षोधवलाजघनेन स्वैरखायस्मिंस्तत् गर्भे जघनेके
इतेर्जायमानत्वादिति भावः सर्वमेतत्परिपक्वगर्भचिह्नं ॥ नेएवंविधं शरीरं पुरुषायि
तं विपरीतरतं तत्करणासमर्थेन एवंचाधुनाप्यास्व ह्रिपरीतरतं न विधेयमिति ध्वन्यते ॥
४२६ ॥ सखीनायिकोत्साहवर्द्धनाय नायिकां वक्ति ॥ आरब्धसुरतेव श्रोपसर्गोऽनु
चितः हे कोमलांगि स्वेदजलं जलपदमाधिक्यं द्योतयति वहसि इदं किं नोचितमित्यर्थः

परिह्नतनाभिलुप्तत्रिवलिश्यामस्तनाग्रमलसाक्षि ॥ ब
द्धधवलजघनरेखं वपुर्न पुरुषायितसहं ते ॥ ४२६ ॥ प्रा
रब्धनिधुवनैव स्वेदजलं कोमलांगि किं वहसि ॥ ज्याम
र्पयितुं नमिताज्ञस्तुमास्त्रधनुर्लतेव मधु ॥ ४२७ ॥

सज्जीकर्तुं नमिताज्ञस्तुमास्त्रस्य मदनस्य धनुर्लतेव मधु एवंच सुरतारंभ एवैतादृशः
श्रमस्तत्राग्रे कथं भविष्यतीति नायिकायां सोत्कुमार्थं समावेद्यते तेन चैतादृशी नायि
काऽलंभतरेति मदनधनुर्लतासमता प्रतिपादनेनानयैव मदनस्य जगज्जयइति प्रतिपा
दनेनेतरनायिकाव्यतिरेको ध्वन्यते यद्वा आरब्धनिधुवनैवेत्यनेनैतस्याश्चयं स्वभावो
यत्सुरतादावेव श्रमो न तूत्तरकालमिति ज्ञापनेन यथेच्छं भीतिमपहाय सुरतसंगरो विधेय इति ना

॥ ९२ ॥

गो॰टी॰ ११८ 118

जायाजितो यमित्यपकीर्तिभागि सर्वलोकाद्वगणानां विधामापिमयात्वदधीनतयैवस्थी
यते ह्रतितापयितुं भंगयंतरेणानायको नायिकां वक्ति ॥ हे सुंदरि लज्जां हरीहात्पसुखमुखचंद्रं
द्रतवनायकानामीषद्दर्शय एवंच सर्वात्मना लज्जापरित्यागस्येतत्फलं यदीषन्मुखप्रद
र्शनमित्यप्यतलज्जावत्त्वमावेद्यते ईषत्त्रपामपाकृत्येत्यपियोजना चंद्रपदेनदर्शनीयत्व
मावेद्यते तत्फलमाह जायया जित इति ख्यातो जनवादो मे यशो भवतु एवंच त्वदीयेनाहमासां

पुंसां दर्शय सुंदरि मुखविंदुमीषत्त्रपामपाकृत्य ॥ जाया
जित इति ख्यातो जनवादो मे यशो भवतु ॥ ४२८ ॥ ॥ प्र
सरतु पारत्रियामृगजगंति धवलयतु धाम तुहिनांशोः ॥
पंजरचकोरिकाणां कणिकाकल्पोपि न विशेषः ॥ ४२९ ॥

दर्शनेकैकदेशेनाहमासां नायिकाजितत्वमत्यंतगुणापोढेकलम्पमितियशसे भवत्विति भावः एवं
चत्वमेताहमासां दर्शघशालिनीति ध्वन्यते एवंचैताहशो मयि कोपकरणमनुचितमित्यावेद्यते ॥
४२८ ॥ ॥ यद्यपि चंद्रनाविधाननिपुणा हूली संतापापनोदको नायकस्य वर्धते तथापि निर्वधया लि
यास्माकं न किंचिदपि फलमिति कापि हक्ति ॥ प्रारब्धकालीना रात्रिः प्रसरतु तुहिनांशोर्धाम जगंति
धवलयतु संतापजन्यमालिन्यनिवारकतयेति भावः पंजरस्थचकोरिकाणां चकोरीपदेन तदे
काधीनजीवनत्वमावेद्यते कणिकातोभ्यल्पोपि न विशेषः ॥ ॥ ४२९ ॥ ॥ राम ॥ ॥

अंगुकेपतितेसनिस्तनस्थापितहस्तामन्यंनंनद्यनाक्षादितोहंसमीचीनतयाऽजायमाना
विकूलनामासा रहःपदेनदंतक्षतेनयाफूत्कृतिः अतएवतक्षतेनकंपितोनतुनिर्वापितः
दीपोययातां लज्जाभयवशादितिभावः तांपूर्वानुभूतांनायिकांमनःस्मरति एवमेव।
किमितिस्थितोसीतिवादिनंकंचिन्प्रतिकस्यचिडक्तिरियम्॥४२॥॥कथमनयातिविलं
बितमितिवादिनंनायकंनायिकासखीसमाधत्ते॥॥हेप्रथमागत एवंचकोपोचितत्वंव्य
ज्यते उत्कंठासहितेयं अतएवचिरकालंचलिता स्वसदनादितिभावः ननु विलंबःकि
मित्यतआह विलंबदोषेण दोषपदेनकरणानर्हत्वंध्वन्यते समाधानं सहांगरागेण।

पतितेंशुकेस्तनार्पितहस्तांतांनिविडजघनपिहितोरुम्॥रहःपदविकलि
तफूत्कृतिशान्तध्वनदीपांमनःस्मरति॥४२॥प्रथमागतसोत्कंठीचिरचलितेयं
नितंबदोषेण॥वदंतिसांगरागाःपथिनखक्षतसमाधानम्॥४३॥ ॥

वर्णनएतादृशामार्गस्थनखोवदंति एवंचकिमर्थमत्रास्माभिःसमाधानंविधेयमितिभ
भावः पथिपदमवयमभाविदर्शनवत्तामावेदयति एवंचत्वद्विरहोद्भ्रांतिवशान्वक्रमेणप्र
तिपदपद्धतिपादपालिंगनेनविलंबःसंजातइतिव्यज्यते तेनचक्षणमपित्वद्विरहमसहमस
हमानेयमिति विलंबदोषेणेतिपाठे संकेतेबहुकालंनायकंप्रतीक्ष्यस्वगृहंप्रतिगतायांना
यिकायांसमागतंनायकंप्रतिनायिकासखीवक्ति प्रथममागतायतःसोत्कंठेयंनायिकावि
लंबदोषेणनवेतिभावः पथिस्वगृहेस्वेतिभावः अचिरमधुनेत्यर्थः चलिता ननु मिथ्यैव
त्वंवदसीत्यत्राह नवसमाधानंसांगरागाःस्वागमत्वान्नायचिह्नवंतःक्षताङ्कपदंः नखाव
दंति एवंचनतस्याअपराधइतिभावः नकारपाठेपदच्छेदेनकाव्याख्येयमायव्याख्या

॥४८॥ हि

गो. टी.
११९
119

संकेतितक्रीडाचलमौलिकुंजे नायकः समधिवसतीत्यतस्त्वरया त्रागंतव्यमिति सापयितु।
मन्यथा चगमनेभीतिसूचकं च्यवतो हंसीनायिकावक्ति ॥ हे सखि केलिप्रायनीयद्रवस
मंतात्सप्रकाशोषधिमणिसमूहवति शैले पदेमहोषधिकल्पमणिसमूहवृतीत्यर्थः
कांचीसूत्रमिव पतितश्वासौ स्थितैककरत्नश्च फणी स्फुरति एवं चूडीपादिस्थानाभिषिक्तौ
षधिसप्रकाशो विविधपल्लवादिमंडलप्रायाशालिनि क्रीडाशैले निरंतरजघनसंयोगप
श्चिदागमनतया त्वदनागमनेन सालसद्रवसकलनायकशिरोरत्नरूपः प्रबलतूरतया
त्वजननिर्भय क्रीडाविद्याविशारदो नायकः समधिवसतीत्यतस्त्वरस्वगमनायेति ध्वन्य
ते महज्जरसर्पाक्रांततयाशैलस्यागमनानर्हत्वमन्येषामावेद्यते केलितल्पसादृश्येन

॥ पतितः स्फुरति महोषधिमणिनिकुरे केलितल्पद्रवशैले
कांचीगुणाद्रव पतितस्थितैकरत्नः फणी स्फुरति ॥ ४२२ ॥ ॥

नायिकायाः सत्वरगमनयोग्यत्वं ध्वन्यते कांचीगुणसादृश्येन निरंतरजघनसंगतिशा
लित्वप्रतिपादनेनातिमदनशालित्वं व्यज्यते पतितशब्देनैव दैवप्राप्तत्वमिति ध्वन्यते य
हा सखीनायिकां वक्ति समंतान्महोषधिमणिसमुदायवति पदेप्रकाशातिशयशालि
मणिनिकरवति निर्भरतातिशयविधानात् मणिमध्यायाभरणभ्रंशादिति भावः शैले द्र
वकेलितल्पे शैलसमताप्रतिपादनेनातिदृढत्वं तल्पस्यावेद्यते तेन चैतादृशापत विमर्दसह
नयोग्यत्वं पतितः प्रसुप्त इति यावत् स्थितमेकरत्नं यस्मिन्सः फणायामिति भावः पदेत्रु
टितत्वादिति भावः स्थितमुत्पन्नरत्नं यस्मिन्सः फणीव कांचीगुणः स्फुरतीति वेति भावः फ
णिपदेनसर्पसंयोगपत्वं ध्वन्यते एवं च तया निश्चायितरतसंविधानजन्यालसतया निकर।

अन्यांगनासक्त्यादितस्ततः परिभ्रमन्तं नायकं नायिकान्योक्त्या वक्ति ॥ ॥ वर्षासमये एवं च ब
हिर्गमनानर्हं त्वं व्यज्यते पर्वतश्रेणीनितंबं नितंबः कटकोस्त्रियां अथच स्वनितंबिनीस्तन
नितंबसुज्झं त्यजन् दिगंतरे इतस्ततः इत्यर्थः परिभ्रमसि चपला विद्युत्साऽन्तरे मध्ये यस्य ।
अथच चपला इतस्ततो गमनस्वभावा परांगनाऽन्तरे चित्ते यस्य यद्वा चंचलस्वभाव चित्त घन न
किं वंवचनीयं वाच्यमित्यर्थः यतः पवनवश्योसि वाय्वधीनोसि अथच चपलोसि पिशाच इति
यावत् एवं च यतो यतो वायुना नीयसे तत्र तत्र गच्छसीति न नवापराध इति व्यज्यते एवं च स्व
इतीनवयौवनलालसां मादृशीं विहायेतस्ततो व्यभिचरणशीलामंतःकरणो विधाय पिशाच

प्रावृषि प्रोल्लसच्छ्रेणीनितम्बमुज्झन् दिगन्तरे भ्रमसि ॥ चपलान्तरघन किं तव वच
नीयं पवनवश्योसि ॥ ४२३ ॥ प्रतिदिवसक्षीणदशास्तथैव व्यसनांचलोऽ
लिकरक्लिष्टः ॥ निजनायकमतिकृपणं कथयति ग्रामस्तव विरलः ॥ ४२४ ॥ ॥

वदितस्ततो भ्रमसि न तन्न नवापराधः किं तु मोघस्यैति व्यज्यते ॥ ४२३ ॥ ॥ सर्वदामानय
नयैव त्वमास्थी यमद्य हृदये सन्ततंचिन्तमिति भिंग्यन्तरेण सखी नायिकां वक्ति ॥ ॥ प्रतिदिनं क्षीणदशाप्रांत
भागो यस्य पक्षे क्षीणावस्था अत्यंतं करेण हस्तेन क्लिष्टः पक्षेऽत्यंतं राजदंडपीडितः विरलः शिथि
लतंतुसंयोगवान् पक्षे स्वल्पजनवसतिः नवपक्षो व्यसनांचलो निजस्वामिनं तं ग्रामस्तव कृपणं व
सनांतरग्रहणासामर्थ्यादिति भावः पक्षे दुर्भलोभकरणेनेति भावः कथयति एवं चैतादृशामान
संपादनेन नायं नायिका स्वप्रदेयतः सर्वदेयं त्वेवमन्यैव त्वत्प्रयत्ननिपयप्रास्वदीयं भवति तदि
दं स्वस्यैवानौचित्तीमाविष्करोतीत्यनेनेतादृशं विधेयमिति द्योत्यते ॥ ४२४ ॥ ॥

गी. टी.
१२
120

काचित्पथिकं वक्ति ॥ हे पथिक एवं च वसन्तस्य आवयोरम्मावेद्यते चपलाभिर्विद्युद्भिरुज्वलं पक्षे चपलावदुज्वलं अविषह्यं उद्दीपकत्वादिति भावः पक्षे उज्वलत्वादिति भावः मेघजलबि
न्दुसमुदायं नन्वकति पृथग्जलविंदवः पांकरवाणानलसंतापितं अत्र श्लिष्टपदं स्मरतात्
ननु एतां मयनामकदैत्यनगरकनककटकमिव कथं सहसे एवं च कथं तापिसमध्यमेव
स्थीयते कनोनागम्यते वृष्टिबाधोपपामनस्थलइतिभावः एवं चेनाहशोद्दीपनवि
भाववति समये कथमेकाकिनया स्थातव्यं अतोमत्सविधमागम्येनं समयमतिवा ॥

पथिक कथं चपलोज्वलमंबुदजलबिंदुनिवहमविषह्यम् ॥ मयपुरकन
कटकमिवस्मिवशारमिश्चिभावितं सहसे ॥ ४२५ ॥ पथिकं अमेणास्तमंदवनव
लातक्लांतमधुरच्छाया ॥ व्यालंबमानवेणीस्त्ववयसि शाखेवसारोहा ॥ ४२६

ह्ययेति व्यज्यते ॥ ४२५ ॥ ॥ काचित्कांचिद्वदति ॥ ॥ हे तरुणि ईषच्चंचला स्वच्छमधुराच्छाया यस्याः ।
व्यालंबमाना वेणिर्यस्याः विपरीतरतसंविधानादिति भावः सारोहा सशिफा शाखाशिफाव
रोहः स्यादित्यमरः पक्षे आरोहणमारोहः शाखेवस्त्ववयसि मदनानलतापनिवारकत्वादिति भा
वः अमेणास्तमं पथिकं पथिकपदेनस्त्ववसंपादनयोग्यत्वं ध्वन्यते शाखापि किंचिच्चंचलाप्रतीत
लछायालंबमानजयाश्रमस्तमपथिकस्तद्देतुर्भवति एवं चानेन सहत्वया विपरीतरतं विहितमिति
ध्वन्यते यद्वा पथिकं स्त्ववयसीति स्तवयिष्यसीति प्रश्नः पथिकशब्देनानिकामुकत्वं स्तवदानेन

[illegible] ॥ ४२८ ॥

१२

निरूढकन्यांगनासक्तचित्तं नायकं नायिकासखी वक्ति ।।।। यातव्रहृदि विरहदुष्प्रापि लब्धकी
लभावं यातासा तेंगपीनजघनोरुः अपरासां प्रवेशमपि न प्रददाति लब्धकीलभावे वहिरह
स्पत्वं हेतुः अन्यासां प्रवेशाप्रदाने तु गपीनजघनोरुत्वं हेतुः अपि नाऽवस्थिति निर्वलेदः
एवं काचिन्नवान्तःकरणेस्ति यया न्यत्र चित्तं न ददातीति व्यज्यते . भूमावन्तरे एकस्मिन् कीले स(
त्यन्यकीलस्य न तत्र प्रवेश इति कीलकं ।। यद्वा कश्चिमन्यांगनालंपटं स्वसखीवादिनी नायि
कासखी नायकं वक्ति तेंगोत्पादिनान्यांगनानामतिरेको ध्वन्यते एवं च यद्यपि न मया सुखं तस्य

प्रददाति नापरासां प्रवेशमपि तेंगपीनजघनोरुः ।। या लब्धकीलभावं याता
हृदि विरहदुष्प्रापापि ।। ४७ ।। प्रातर्निद्राति यथा यथात्मजा लुलिततनिः सहेलं
गौः ।। जामातर्विस्मितमनास्तथा तथा सादरा श्वश्रूः ।। ।। ।। ४८ ।। ।। ।।

ष्याचाटुवचनादि विधीयते परं तु मद्हृदयमियमेवाधिवसति न काचिदन्या हृदयवि
षयापीति व्यज्यते अथवा नायिकोक्तिरियम् ।। ४७ ।।। कथममुष्या स्वश्रूर्न स्निह्यतीति वा
दिनमनभिज्ञनायकं नायिकासखी वक्ति ।।। यथा यथा लुलितानि म्लानानि श्रान्तपवनिः स
हानि सालसानीत्यर्थः एवंविधैरंगैः प्रातरात्मजा निद्राति विस्मितमनाः श्वश्रूः जामातरि
तथा तथा सादरा भवति लुलितनिःसहैरित्यनेन रतातिशयशालित्वमावेद्यते आत्मजे
त्यनेन तत्सुखवत्त्वेन तस्याः सुखवत्त्वमिति ध्वन्यते एवं च त्वया अद्य रात्रौ तथा विधेयं यथेयं
मत्सखी प्रातरत्यन्तनिःसहांगतया स्वापं करिष्यतीति व्यज्यते ।। ४८ ।। ।।

नायिका सखीं वक्ति ॥ हे सखि प्रणायात्प्रीतेः स्खलितोपि प्रणायेन वा चलितः सकपटाये कोपकटाक्षा
गो॰ टी॰ त्सैरपहृतस्तंभः संपादितस्थैर्यः त्रासेन तरलः मद्धृतकोपकटाक्षादिति भावः प्रियो मया सहासरभ
सं कंठे हृतः एवं च नायकेति सरलत्वमावेद्यते ॥ ४२९ ॥ काचिन्नायिका कस्मिंश्चिद्दासकान्तदी
यांगनासक्तिं विज्ञाय तत्पन्तङः खिन्ना स्वहृदयं प्रति वक्ति ॥ हे हृदय एवं चोपदेशायोगपत्वं
१२ ध्वन्यते प्रियस्यदुर्नयेन एवं चातिदुःखजनकत्वमावेद्यते यदि स्फुटसि विदीर्णतामाप्नोषि ।
१२ तर्हि त्वत्स्फुटनमपि श्लाघ्यं तस्य केलिरूपसंग्रामे तल्पीकृतवस्त्रप्रान्तस्येव समरपदेनातिदुः
सहत्वं तस्यावेद्यते एवं च प्राण्याद्विविरहवत्यपि दृष्टोऽस्तु तस्याहसे न चिरं तरस्तु रतस्य त्वसं

प्रणायचलितोपि सकपटकोपकटाक्षैर्मयापहृतस्तंभः ॥ त्रासतरलो गृहीतः सा
हसरभसं प्रियः कंठे ॥ ४२९ ॥ प्रियदुर्नयेन हृदय स्फुटसि यदि स्फुटनमपि तव ।
श्लाघ्यम् ॥ तत्केलिसमरतल्पीकृतस्य वसनांचलस्येव ॥ ४३० ॥

पाटनेन यः प्रियत्वायरतोपि तस्तदीयैताहृश्याडुश्चेष्टितस्यातिदुःसहतया विरमति कथनं ।
विनात खिन्नत्वात् इत्यवचनात्कस्यचित् कथनार्हत्वेपि स्वस्येवैताहृशाविचारितकार्यकारितया ति
मोपभावहतया ऽकथनीयत्वेन तन्मया हृदि दीर्णतापि समुचिता न पुनरन्यत्र तत्कथनमिति ध्वन्य
ते तेन चैताहृशप्रियानुचिताचरणाकथनस्य स्वस्यैव लज्जाजनकत्वमिति यद्वैताहृशसंभोग येनै
सुखमुत्पादितं तदीयेनाहृशोदासीन्येमरणमेव वरं न पुनर्हृत्पादिश्रेणीमानादिधारणं चेति व्य १२
ज्यते अपिरवधारणार्थः प्रियदुर्नयेनात्यंतदुःखं भवतीति भावस्तत्र जवः ॥ ४३० ॥

कश्चिद्रसोज्ञया कस्यचित्कर्णेऽन्यनामालेखनस्वयमर्पितया कर्तव्यतां वंचनवक्ति ॥ समीरणा
हृतसौरभा हृदेयदुदकपूरस्तद्वर्द्धिनीया पद्मिनी तस्यामासक्तः अविचारितस्वपक्षवा
लः मधुपः हृतहृति खिदे आपदं गता पवनपदेन चंचलस्वभावेन केनचित्तस्याः कीर्तिः
हृतेति व्यज्यते हृदादेकपूरशब्देन नगरमात्रापि काठिन्यमावेद्यते अपरीक्षितशब्देन
यथाकथंचित्स्वसहायवचनमात्रादेव नायोग्यः कर्तव्य इति ध्वन्यते आपदमित्येकत्व
मविवक्षितं मधुपशब्देनाविवेकित्वं द्योत्यते एवं च यथाकथंचित्कस्यचित्स्वदाना
यिकागुणाश्रवणमात्रेणाङ्गीकृत्यापर्यालोचितस्यामासक्तिर्यदन्येन क्रियते तत्र शीलेनावश्यं पले
पाः प्राप्याप्य एवेति भावः एवं च त्वयैतादृगनुचितं नाचरणीयमिति व्यज्यते ॥४३१॥ प्रेम

पवनोपनीतसौरभहृदोदकपूरपद्मिनीलुब्धः ॥ अपरीक्षितस्वपक्षो गतो हंता
पदं मधुपः ॥४३१॥ प्रेमलघूकृतकेशववृत्तोधरविपुलपुलककंचुककलशा ॥ गो
वर्द्धनगिरिगुरुतां मुग्धवधूर्निभृतमुपहसति ॥४३२॥

वयस्या नायके लघुतां संगीतार्थव्यपि स्वमनावगाना नानाविधे येति सखी नायिकां भंग्यंतवैराग्यं दिशति ॥
प्रेम्णा नायिकाविषयकेण तोषेण लघूकृतः वास्तवं तस्य च तर्द्धस्य भुवनाधारतया अतिगुरुत्वादिति भावः एव
च प्रियाप्रयाणेनाल्पिकिं न क्रियत इति ध्वन्यते यः केशवः केऽश्वके मोनई इति केशवः अत एव कलशापदस्यार्थव
तु तस्य वक्षसो धरणेन विपुलपुलककोऽकंचुककलशो यस्याः एतादृशी मुग्धा सुंदरी अग्रचमत्कारवधूः य
द्या मुग्धस्य वधूः एवं च प्रियस्य चातुर्यवाचेन नायिकाया अपि तद्वत्वं भवतीति ध्वन्यते गोवर्धननामधेय
महीधरस्य गुरुतामुपहसति येन गोवर्द्धनो ह्यारशंकितं सो पिमया तिलघुतया वक्षसि धृत इति न किं
चित्कोरवमिति धियेति भावः गुरुतापदेनोपहासविधानानौचित्या निभृतपदमर्थवत् एवं च के
शवस्याप्युपहासो व्यज्यते एवं चैतादृशो मोर्खेन कदापि विधेयस्त्वयेति ध्वन्यते ॥४३२॥ ॥

गो.टी.
१२२
122

प्रियप्रीतोसत्यांनकोनगपिकिमपिवांर्द्धमावमितिकाचिकांचिहकि ॥ दयितविरहक्षीणा
याः एवंचप्रकारांतरमा[illegible]णोपिसमाधेः सत्वादितिभावः सहजप्रात्तुमूतामिरपि एवंचाऽव
प्रसापकारक रणयोरपत्वंद्योत्यते अपिनाऽन्येषांकावार्तेतिव्यज्यते रटहमंगमीनाभिः ए
तस्यामरणेप्रियमरणस्यावश्यंभावित्वादितिभावः एवंचप्रियानुरागातिशयत्वमावे
द्यते म्लानाह्नपाःप्राणारक्ष्यते एवंचयथानायकःस्निह्यतितथावश्यंपविधेयत्वंद्योत्यते ॥

प्रियविरहनिःसहायाःसहजविपन्नाभिरपिसपत्नीभिः ॥ रक्ष्यंतेहरिणा
क्ष्याःप्राणारटहमंगमीनाभिः ॥ ४३३ ॥ प्रकटयतिरागमधिकंलपनमिदंव
क्रिमाणामावहति ॥ प्रीणयतिप्रतिपदंहंतिमुकस्येवदयितस्य ॥ ४३४ ॥

४३२ ॥ नायिकाहृत्तीवक्ति ॥ देहति एवंचतयोगासंपादनंत्वदधीनमित्यावेद्यते मुक
स्येवदयितस्यलपनंभाषणं पक्षेवदनं अधिकंरागंप्रीतिं पक्षेलौहित्यं प्रकटयति वक्रि
माणांवक्रोक्तिमत्वं पक्षेवक्रत्वं आवहति आढानेकमपिवक्रोक्तिरहितंपदंतत्रेत्यावेद्यते ।
तेनचनायकेचातुर्यातिशयशालित्वं प्रतिपदंप्रतिशब्दं पक्षेप्रतिक्षणंप्रीणयतिच पक्षाऽ
धिकरागशालिनूनंवक्रतामावहति यच्चवक्रतामावहतितन्नप्रीतिजनकमितिचैकमेवत्रित ।
यजनकमित्याश्चर्यमित्यावेद्यते, कश्चिन्मयत्रापिलपनंमुखमेवेत्याहुः एवंचैतादृशानायकस
'तिभावः

स्य [illegible] ॥ ४३२ ॥

१२२

स्वकटाक्षविक्षेपादिना नायकः स्वाधीनतां भाजनं विधेयः इति काचित् विदग्धा वक्ति ॥ ॥

प्रबलात्‌ रूपादि संपत्तिशालिन्याः प्रबलपक्षस्य प्रस्याः अजेयत्वं भावेरयति यावत्‌ स्याः तस्य हृदय व्याप्तिः एवंच स्वस्थित्यर्थम वकाशा भावो व्यज्यते प्रियहृदयं एवंच अवषमप्र वेशासंपादनो चित्यं ध्वन्यते प्रविष्टा त्वात्वा बालायाः तरुणनीत्याः इत्यपि किंचित्‌ लज्जावा त्वादिति भावः तरंगितस्तु रोजसाधिकं तच्छालीयः कटाक्षस्तद्रूपेणासिना खड्गेन प स्यामार्गः एवंच त्वयैतादृशकटाक्षेणावलोकिते वक्ष्यं स्वनायकस्ताः परिहृत्य त्वय्या सक्तो भविष्यतीति व्यज्यते अन्योपि प्रबलव्याप्तस्थलादौ केवलखड्गसहायेन प्रवेशं करोति

प्रविष्टं त्याः प्रियहृदयं बालायाः प्रबलयौवनव्याप्तम्‌ ॥ नवनिशित दर तरंगित नयनमयेनासिनापन्थाः ॥ ४३५ ॥ प्रणयापराधरोषप्रसादविश्वा सकेलिपांडित्यैः ॥ रूढप्रेमा क्रियते किं बालाऽऽतंकमात्रेण ॥ ४३६ ॥ ॥ ॥

तिलोकिकस्य ॥ ४३५ ॥ ॥ नायिकासखीनायकं वक्ति ॥ ॥ प्रणयापराधेन रोषः प्रसादो विश्वा सः क्रीडाविषयकपांडित्यं एतैः रूढप्रेमयस्याः एतादृशी नायिका यद्वा प्ररूढप्रेमा अर्थान्नायि कया एवंच भाविस्वत्वसंभावनया स्वतः सिद्धस्यापि परिहारः कर्तव्यतानौचितेति ध्वन्यते ते नच भवतामीदृशं कर्तव्यं तया नायिका खिन्ना भवतीत्यावेद्यते यद्वा नायको नायिकास खीं वक्ति रूढप्रेमा अर्थान्नायिकया सह बालायाः आतंकमात्रेण किं क्रियते काक्वा न क्रियत इत्यर्थः एवंच बालायां कौतूहलमात्रमेतत्‌ वास्तवानुरागो ममतस्यामेवेति ध्वन्यते ॥ ४३६ ॥

काचिदन्योन्नपार्श्वे स्वस्मिन्नासक्तं वा ईक्षयात्त्वदलादावुपेक्षितं मन्यविटविहेषितां कांचन वक्ति॥
हे गजमद ममंच नन्वे तन्ययोगे किमित्यत आह प्राक्तनैरेवाद्भुतैरेवाचरितैर्जरतोपि हृदः।
गो.टी. स्यापि जीर्णो जीर्णोजरन्नित्यमरः भवतः पूज्यता एवंच मदाभावेपि पूज्यतायाः सा।
त्वान्मदकरणमनर्थकमिति भावः न केवलं मदकरणमनर्थकमपि तु दुरर्थकमित्या
१२३ ह अस्य मदस्य गंधाघ्राणैर्वा भिर्गंजनीयोसि एवंच पूर्वैर्वन्त्सामर्थ्याभावादसत्कृतं।

123

पूर्वैरेव विचित्रैश्चरितैर्जरतोस्ति पूज्यता भवतः॥ मंच मदस्य गंधा
घ्राणवभिर्गंजनीयोसि॥४७॥ प्रथमं संप्रवेष्टिता या या वा सा गता।
रंक धैर्यं च न सखीभिः॥ नश्यतीव प्राणः सा निर्गमन समसंकेतम्॥४८

मानवत्वेपि विधीयमानमदोऽस्य पृथुवभिर्न सोढव्य इति ध्वन्यते तेन च भीतिः॥४७॥॥
यावत्पर्यंतं नायकागमनं तावदेव गमनेन कारः क्रियते तदुमत्तत्वमन्यतासन्नामाय
केभविप्रलम्भस्य वदानीं महाकांतं निरस्त्कार्विनिका चित्काचिद्वक्ति॥॥ प्रथमतः सखीभिः न तस
ख्या महता क्लेशेन प्रापयन सहनं या प्रवेष्टिता सा प्रातः एवं च चिरपरिचयाभावो व्यज्यते।
निर्गमसंकेतं नश्यतीति एवंच न निर्गच्छतीति किमु वाच्यमिति भावः एवं च तथैव वत्व १२३
मधिक विप्लवसीति व्यज्यते प्रसभमित्यपि क्वचित्पाठः॥३०॥

मंत्रकथमावश्यकमितिकश्चिद्वक्ति॥॥ प्रतिष्ठांविनापूजानास्ति तदभयविप्रति
पन्नः मंत्रंविनापिप्रतिष्ठाप्रतिष्ठांविनापिपूजेतिवादीत्यर्थः देवतायाःपाषाणं
प्रतिमांपश्यपत एवंचदेवताप्रतिमायामेवैतन्निर्णयइतिभावः॥ यद्वा केनचि
त्कस्यचित्पूजायांक्रियमाणायामीर्ष्यावशात्किमस्यस्नानंकावास्यप्रतिष्ठायेनेदृ
शीपूजेयमस्यविधीयतइतिवादिनंकश्चिद्वक्तंप्रत्येवंवक्ति॥ प्रतिष्ठांदेवतासन्निधि
रूपांविनापूजानास्ति प्रतिष्ठितंपूजयेदितिवचनात् पद्येप्रतिष्ठाविख्यातिः मंत्रं

पूजांविनाप्रतिष्ठांनास्तिनमंत्रंविनाप्रतिष्ठाच॥ तद
भयविप्रतिपन्नःपश्यप्रत्यक्षीर्बाणपाषाणम्॥ ४३८ ॥

उत्तमपुरुषामंत्रणास्यांतत्वमंत्रप्रसिद्धान्यतमवंतं पद्येविचारं विनाप्रतिष्ठाचनास्ति
मंत्रसाध्यत्वात्प्रतिष्ठायाः प्रतिष्ठामंत्रोभयाप्रामाण्यवादी पद्येप्रतिष्ठामंत्रोभयाभाववादी
देवतापाषाणंपश्यपत एवंचवेदाप्रामाण्यवादिनानास्तिकेनकदाचिदपिकेनचिद्दिष्ट्वा
दिप्रतिमादौविल्वादिप्रक्षरवड्डीजननायांनकिंचित्समीचीनत्वडःखमितिभावः एवंचना
स्तिककल्पेनभवतामात्सर्यात्पांडित्यप्रतिष्ठादिकमेतेषांनास्तीत्युक्तंचेत्तावतानका
चिन्नातिरितिनिष्पद्यते॥॥ ४३९ ॥॥ नारायण॥ ॥ ॥

नायिकासखीनायिकायांमानापपचारमदर्शकंनायकंवक्ति ॥ ॥ रहिहिएएषांपूर्वापेक्षयाधि

कः बहुमनेकप्रकारः गूढंचलिंगाविपरिणामादृश्योप्यन्वेति मानःप्रेमनर्मक्रीडाविश्वासःस्यु

मधिकाभीः एवंचभीतेः पूर्वमभावोध्वन्यते रागंबालाविभक्तमिवकथयति एवंचयावत्पर्यं

गो॰टी॰ तंतस्यामेवानुरागःस्थितस्तावत्पर्यंतंनैतादृशमानादिकंनवाभीतिस्तद्दिल्वभावादिदानीं

तुमानादिनैतत्समाधानेनेयंतांनपीडयिष्यतीतिधियैतादृशाचरणंनवेतिभावः एवंचय

१२४ त्रासाधारणंप्रेमनतत्रकिमपिमानादिबाह्योपचारकरणमपेक्षितमितिध्वन्यते ॥ ४४ ॥ ॥ स्व

पीडाभयेनस्वप्रभोरप्यनिष्टंचिंतयतएवेनिकश्चित्क स्वप्रभोरनुचितामप्यासनंकरोषी

124

पूर्वाधिकोगटहिएएषांबहुमानःप्रेमविश्वासः ॥ भीरधिकेयंकथयतिरा
गंबालाविभक्तमिव ॥ ४४ ॥ पुलकितकठोरपीवरकुचकलशाश्लेषवेद
नाभिज्ञः ॥ ॥ ॥

तिवाहिनंवक्ति ॥ ॥ संजातपुल कौनायकस्तस्यांआज्ञस्वभावाविर्भावा

दितिभावः योकठोरपीवरकुचकलशौतदाश्लेषपीडाभिज्ञः पुंभोरुपवीनरूपपाणीपा

वेत्यामानग्रहंवांछति एवंचालिंगनाद्यभावेनस्वपीडानुत्पत्तिर्भविष्यतीतिधियेतिभा

वः कठोरेत्यनेनवेदनायामाभिव्यंग्यध्वन्यते एवंचपुंभोवित्यनेनसुखजनकत्वप्रतिपा

दनताडपवीतपदेनातिनिकरतयातिप्रेमवत्वंव्यंजनात्पाणीत्यनेनभारसहनसामर्थ्यं

योतननारीदृष्टास्यापिल्लेष्वाविशेषासहिष्णुत्वंकिमुतान्यस्येतिद्योत्यते यद्वायोहिस्वयं १२४

डःखाभिज्ञःसएवपरस्यडुःखनिहन्तिवांछितीतिकश्चित्कंचिद्वक्ति ॥ ॥ ॥

एवं च पाणेर्वेदनाभिन्नत्वेन शंभोः कठोरकुचवेदनामाभवत्विति बुद्धिः कदलीनिध्वन्यते ।
अथवा न्यंतमानवती सा नायातीति दुष्टदूतीवचनाच्छिद्रुपिलयत्वं नायकं नायिका स
खीवत् फणीत्वेन दुष्टत्वं द्योत्यते एवं चेयं त्वदीय दुष्टसखी स्वयातायातादिपीडाभयेन।
तस्या एतादृशस्वभावशालित्वं व्यावेदयति न वास्तवं सा तथेति ध्वन्यते तेन च त्वत्स्वरूप
दूतीनायेति ||४४१||| काचित्कांचित्कस्याश्चिद्दूतीवत्ति ||| प्रियो दूरादायातः इति देहतो गे
हिन्या या प्रीतिर्वभूव सा पथिकेभ्योपि सर्वमागत इति गर्वाद् दत्तुत्कटानाता अन्येषां

धूम्भोरुपवीतफणी वांछति मानग्रहं देव्याः ||४४१||| प्रिय आयातो दू
रादिति या प्रीतिर्वभूव गेहिन्याः || पथिकेभ्यः सर्वोगत इति गर्वात्सापि प्रानत्रि
खरा ||४४२||

न तथा स्वप्रियास्तु प्रीतिर्यथा मत्प्रियस्येति धियेति भावः प्रियसदागमनेन प्रीतिजनन
कत्वमावेदयति दूरादित्यनेन चिरविरहशालित्वं द्योत्यते गेहिनीपदेन दृढमांसाप्रवणा
या अप्येतादृशपवस्थावर्तते न तस्याः किं वक्तव्यमिति ध्वन्यते पथिकपदं प्रियान्तर्वप्रचलि
तत्वं व्यंजयति बहुवचनेन सर्वेषामपि पथिकानामरिक्तागतेनोत्कंठातिशयशालित्वं नायके
व्यज्यते एवं चान्येषां त्वरयानागमनेन स्वप्रियस्यागमनेन नायिकायां गणातिशययो
तनेनेतरनायिकाव्यतिरेको ध्वन्यते प्रियस्य सर्वतः संबंधितत्वात्प्रीतो बाधाद दत्तुत्क
टत्वं लक्ष्यते प्रयोजनं चेतरगर्वव्यतिरेकः ||४४२||| ||

गो॰टी॰ नायिकासखीनायकमन्योन्यमनायिकाप्रेमवक्ति॥॥ हे विहितवैमुख्य पक्षे हे कृतौदासीन्य
वैमुख्यकार्यमाह एहि प्रयच्छ तीरस्थितेन तरणिः एहि नैव गम्भीरजलनिरसनमिति के
१२५ वनं कुसुमं प्रदाय; यद्वा तरणिकर्षकस्यनौकासमुख्याभावादिति भावः; अतएव मा स्पृ
125 प्राकरणेति भावः; पक्षे विलोकनाभावं कुरु आलिंगनं च मा कुरु दूरादपसर्प पक्षे निक
टवर्तित्वाभावं कुरु तथापि गुणोऽस्त्यगारचिते पक्षे चातुर्यादिभिः आकर्षणे तेन चंचला
त्वयं तरणिर्नौका त्वामनुधावति एवं च यद्यपि त्वमुदासीनस्तथापि त्वदीयचातुर्या
दिगुणलुब्धा त्वामेवानुसरतीति ध्वन्यते तेन च नैनाऽऽत्माचरणमुचितं तवेति नौरपि

एहि प्रयच्छ मा स्पृश दूरादपसर्प विहितवैमुख्य॥ त्वामनुधावति तरणि
स्तदपि गुणाकर्षणरलेयम्॥४४३॥ प्रियया कुंकुमपिंजरपाणिद्वययोज
नांकितेवासः॥॥

एहि प्रदानादिका वाणिमनुल ... स्त्रीकृत्य निपादकर्तृकगुणाकर
णाकर्षणेन गच्छतीति भावः॥४४३॥॥ नायकः सख्यार्यवक्ति॥॥ प्रियया तत्तु नायिकया
कुंकुमेन पिंजरं यत्करयुगलं तद्विधानचिह्नितं वासः अनेकप्रार्थनांजलिसंपादनायाः
मां प्रीणयति कुंकुमपिंजरितं विना रक्तत्वं तेन च कोपवत्वं ध्वन्यते पाणिद्वययोजनां
कितमित्यनेन प्रणतिरावेद्यते एवं च प्रणामोऽयं भवतामास्तामत्रागमनं भवतामिति
ध्वन्यते तेन कुपितत्वे ज्ञातेऽनेकप्रार्थनांजलिकरणं मम प्राप्तमिति ध्वन्यते यद्वा प्रियैक
प्रणामग्रहणे जन्यनिवारणाकारणानेकप्रणामकरणं मम प्राप्तमिति ध्वन्यते तेन च ना १२५
यिकायामाधिक्यं॥॥

यद्वा यथा मया त्वत्प्रार्थ्यमंजलिः क्रियते तथा त्वया मदर्थं मदीयस्त्वत्कृतांजलयो विधे
याञ्जतिष्ठितां मांगलिकत्वेन कुंकुमसंबंधः अथवा हे रजःशालिनीत्यतः त्वन्नमो मम मा
नागमनापराधजनितसंतापनार्थं कांजलिकरणोमयांजलिसहस्रकरणेनेदानीमेव वरनम
स्पर्थनीयमितिभावः ॥ ४४४ ॥ इतीकस्याश्चित्संप्रहसकथनेन नायिकायाः साहस
कर्तृत्वमुपदिशति ॥ इयं तव प्रतिवेशिनी प्राचीनेन व्यवहिता प्राचीनं प्रांततनोवृति
रित्यमरः प्रियस्य वदनेऽधरं समर्पयति प्राचीना च सा छादिता रात्रिः संध्यारागं दिव

प्रहितं मां याम्यांजलिसहस्रकरणाय प्रचिन्तयति ॥ ४४४ ॥ प्राचीनान्त
रितेयं प्रियस्य वदनेऽधरं समर्पयति ॥ प्रागनरुद्धयगिरिपिहितासंध्यारागं दि
नस्येव ॥ ४४५ ॥

सस्येव वदने प्रागिरादिसमताप्रतिपादनेन प्राचीनेति तुंगत्वं ध्वन्यते तेन चोल्लंघनान
र्हत्वं रात्रिसमताप्रतिपादनेन तमःप्रधानतया जनावलोकनभीतिशून्यत्वं नायिका
याभाव्यते तेन चात्यंतानुरागवत्त्वं संध्यारागमित्यनेनात्यंतलोहित्यवत्त्वमऽधरेऽव
गम्यते दिनस्येत्यनेन बहिर्वर्तितया नायके लोकदृश्यत्वं ध्वन्यते समर्पयतीत्यनेन
स्वयं चुंबनविरामासंपादनेन रागांधत्वं नायिकायां द्योत्यते एवं च त्वयापि भीतिमु
त्सृज्यैवं विधाचरणमाचरणीयमिति ध्वन्यते ॥ ४४५ ॥ ॥

नायिकानायकं वक्ति ॥ परस्याः पत्यौ निर्दया याः अनेकनायकगामिन्यः ताभिर्हन्त
शरीरसारसर्वस्वपरत्वेन कादाचित्कलाभवत्त्वं तेन चात्यंतसुरतसंपत्त्या नार्हत्वं ध्वन्यते
शठ एवं च विश्वासाभाववत्त्वमन्यवचनप्रामाण्यानभ्युपगंतृत्वं च व्यज्यते नेर्ष्ययाना॰
सामीति भावः न कोपेन किमिति नित्रागम्यत इति भावः दग्धमम तोपनसाहं तव का पूर्वं
वीक्ष्य रोदिमि दग्धपदेन मम नायानिवारणानर्हतयात्यंतदुःखदत्वं व्यज्यते एवं चै॰

परपतिनिर्दयकुलटाश्लेषितशठनेर्ष्ययानकोपेन ॥ दग्धममतोपनसा
रोदिमि तव तानवं वीक्ष्य ॥ ४४६ ॥ प्राणा एव कदा मां क्षिप्स्यंतीमस्तुकं
पिकं च कलशा ॥ असनिषस्सस्मुखीसास्नपयति वाष्पेणा मम दृष्टम् ॥ ४४७ ॥

नाहं शोपि त्वयि मम मम नेति स्वस्मिन्नाधिक्यमावेद्यते अन्योपि संतप्तो रोदितीति वो॰
किकामु ॥ ४४६ ॥ प्राणा एव एवं च प्रेमाधिक्यमावेद्यते मां क्षिप्स्यंती क्रोधेन कथ
मियंति दिनान्यतिवाहितानि विदेश इति धियेति भावः कंपितस्तनकलशा स्कंध
स्थितवदना सा पूर्वानुभूता वाष्पेणा मम दृष्टं कदा स्नपयति स्नपयिष्यतीत्यर्थः
पथिकाश्वासनमेतत् ॥ ४४७ ॥

कथमीदृशभयानकावसरेपि प्रियसविधे समभिसरणमिति वादिनीं नायिकां दूती कस्याश्चिद्वृत्त
कथनव्याजेन सति प्रेम्णि न कापि भीतिरिति वक्ति ॥ प्रेतैः स्वतनसामर्थ्या स्खलत्त्रासैर्विस्मया
दितिभावः साश्रु क्रियाविशेषणमेतत् कथमीदृश्यामपि प्रियः प्रपेदे पंचत्वमिति शो
कोद्रेकादितिभावः वीक्षिता बाला एवं च भीतियोग्यत्वं ध्वन्यते भूतमुखसंबंधिनी याउल्का त
येक्षितं एवं चांधकारबाहुल्यं ध्वन्यते मृतस्य अर्थात्स्वप्रियस्य वदनं चुंबति एवं चैतादृशास
येपि भीत्यनुदयेन त्वनुरागमाहात्म्यभावेन च प्रेम्ण उद्रेकमावेद्यते अत्र प्रेतैः प्रशस्तसत्वेत्यादिका
ध्यानं भयानकं नामपि शृंगारपरिपोषकत्वाद भव वाध्यत्वेनोक्तत्वाद्धास्यरसमाणो विरुद्धोपी

प्रेतैः प्रशस्तसत्वा साश्रु हृदके वीक्षिता स्खलत्त्रासैः ॥ चुंबति मृतस्य वदनं भूत
मुखोल्केक्षितं बाला ॥ ५५७ ॥ पिशुनः खलु सुजनानां खलमेव पुरो विधाय
जेतव्यः ॥ कृत्वा ज्वरमात्मीयं जिगाय बाणं रणे विष्णुः ॥ ॥ ५५९ ॥ ॥ ॥

स्फुटं दृश्यम् अयं सरसनोत्कर्षो न्याय्यावविव संचार्यादेर्विरुद्धस्य बाध्यसोत्कर्षगणावहेत्युक्तदिशा
द्वाकाद्यमिन्याद्याविव भयानकशृंगारकयोरविरोधान्नासमंजसम् ॥ ५५८ ॥ कश्चित्कंचिदुपदि
शति ॥ ॥ सुजनानां यदि पिशुनः जेतव्यः एवं च सतां पिशुनजये न कापि ग्लानिरिति भावः न
द्यानिश्चयेन खलमेव पुरो निधाय एवकारेण स्वातिरिक्तस्वजनस्य निरासः अस्मद्गेवार्थद्रौ
यितव्यमिति इतिहासमाह विष्णुः एवं च स्वतः सामर्थ्यसत्वमावेद्यते ज्वरस्वीयत्वेन संपाद्य एवं च उ
देयद्यपि स्वीयत्वसंपादनमनुचितं तथापि स्वकार्यकाल एव तत्र तद्विधेयमिति ध्वन्यते संग्रामे बा
णासुरं जितवान् एवं च स्वस्य सामर्थ्येपि न उद्दिष्टनिर्वहणं स्वयं विधेयमिति ध्वन्यते तेन च ज्ञेयोपि दुष्ट

गो॰टी॰
१२७

नायिकेयमत्यंतमप्रगल्भेत्यतःपानेरेवकिंचिदुपभोग्येतिसखीमन्योक्त्यावक्ति॥ ॥ हेमधु
प एवंचरसलंपटत्वमावेद्यते तेनचकुलीस्थित्यनर्हत्वं हरेर्जिह्वाग्रमात्रसंस्थाप्यबकुल
कलिकांपिब अथरस्यविलेपनसमाप्तियेपि अत्रलेपनेनैवयुक्तं मकरंदेहत्यामुखा
मर्पयसि एवंचबकुलकलिकायाअतिरहस्यत्वात्तन्मधुनोतिस्वल्पतयावदनसंपर्केसु
मात्रिरेवभविष्यतीत्यनोरसनाग्रेणैवतद्ग्राह्यमितिभावः एवंचनेयमत्यंतसुरतविमर्द

।२७

पिबमधुपबकुलकलिकांहरेरसनाग्रमात्रमाधाय॥ अधरविलेपसमाप्ते
मधुनिमुधावदनमर्पयसि॥ ४५॰॥ प्रायेणैवम्लानामलिनानामाश्रय
त्वमर्हति॥ कालिंदीपुटभेदःकालीयपुटभेदभेदनंभवति॥ ४५२ ॥ ॥

सहेतिध्वन्यते॥ ४५॰॥ ॥ कश्चित्कंचिदाह॥ ॥ वाकूल्येनमलिनाएवमलिनानामाश्रयत्वंप्राप्नुवं
ति अर्थांतरन्यासेनामुमेवार्थंद्रढयति यमुनायाःपुटभेदः चक्राणिपुटभेदाःस्युरित्यमरः
[illegible] कालियनामसर्पस्यपुटभेदनंपत्तनंभवति प
त्तनंपुटभेदनमित्यमरः भवति एवंचाऽमलिनाभिर्गंगादिभिर्नमलिनस्यकालियस्याश्रयोद
त्तः किंतुकलिंदतनययैवेतिभावः एवंचसद्भिरसतामाश्रयोनदेयइतिध्वन्यते॥ ४५२ ॥ ॥ ॥ १२७

प्रियप्रीतिनिमित्तं सपत्नीसंमाननमपि विधेयमिति काचित्कांचिच्छिक्षयति ॥ ॥ चंद्र

खंडशेखरशरीरसंलग्ना उमा पार्वती उमापदेन उमेति मात्रा तपसो निषिद्धेत्यादिकालि-
दासोक्तरीत्या प्रियप्रीतिस्तपोरूपक्लेशविशेषलभ्येति ध्वन्यते प्रियशरीरविश्लेषभ-
भीत्या भागीरथी भगीरथक्षत्रियोत्संबंधकीर्तनेन नीचापतापतया निःसहत्वं व्य-
ज्यते शिरसा वहति रुद्र इत्यर्थः एवं च त्वयाप्यनयैव रीत्या स्थेयमिति भावः एवं च

पशुपतिप्रियतनुविघटनभयेन शशिमौलिसंलग्ना ॥ सुभगैकदेवतमु
मा शिरसा भागीरथीं वहति ॥४५२॥ पथिकवधूजनलोचनवाष्पनदीमा
त्रकप्रदेशेषु ॥ घनमंडलमाखंडलधनुषा कुंडलितमिव विधिना ॥४५३॥

यत्र भगवत्या पार्वत्या शिवं रीत्या स्थीयते तत्र का वार्ताऽन्यासामिति भावः ॥४५२॥
काचिद्वक्ति ॥ ॥ पथिकांगनानयनवाष्पैर्नदीमातृकाः नद्यंबुपालिताः ये देशास्तेषु वे
धसा कार्त्स्न्येन इन्द्रधनुषाकरणभूतेन मेघमंडलं कुंडलितमेव पथिकांगनाश्रु
भिरेव सस्योत्पत्तेर्मेघमंडलस्यानर्थक्यादिति भावः एवं च पथिकांगनानयननीरा
धिक्यप्रतिपादनेनानासामसह्यं दुःखमावेद्यते ॥४५३॥ ॥ ॥

काचित्कस्याश्चिद्दूतंवक्ति॥॥ गेहिन्या एवंचसर्वसामर्थ्यमावेद्यते त्वमागतोपि एवंच
कुटिनिसर्वग्राह्यदर्शनयोग्यत्वंध्वन्यते गेहपतिः एवंचबहुतरदिनोत्तरागमनतयास(
र्वकार्यस्वस्वमात्रकाल्किकतयासर्वदर्शनयोग्यत्वंव्यज्यते अत्यंतंयात्क्रीडासक्तिस्तयाप्रति
वेशिमित्रबंधुषु एवंचगोपनानर्हत्वमावेद्यते एकंदिनमगोपि यद्वागेहिन्याअप्येतादृ
शीरतिस्तत्रकावार्ताऽन्यस्याइतिकाचित्कथमीदृशक्रीडालंपटात्वमितिवादिनीं प्रतिव
क्ति॥॥ ५५४॥॥ नायिकानायकंप्रतिवक्ति॥॥ हेनिंद्य निंद्यकार्यकारित्वादितिभावः।

प्रतिवेशिनीमित्रबंधुषुद्दृशस्तत्कृतागतोपिगेहिन्या॥ अतिकेलिलंपटत(
यादिनमेकमगोपिगेहपतिः॥ ५५४॥ परपट्टपरत्नकीभिर्मलिनोभुक्ता
पिनिर्दयंताभिः॥ अर्थग्रहणेनविनाजघन्यमंकोसिकुलटाभिः॥ ५५५॥

॥ पव्रज्या ॥

रजकीभिः परपट्टधवनाभिः प्रसिद्धाभिः कुलटाभिः मलिनस्त्वंनिर्दयंभुक्ता परकीयत्वा
दितिभावः द्रव्यग्रहणेनविनानपरित्यक्तोसि एवंचकुलटात्वेनबहुनायकविषयक
रतिमत्तया तद्रतेराभासतया अर्थाद्दोषधवत्कामस्त्वकदित्याच तत्रनरससद्मनिध
न्यते अत्रान्यविचारजातमस्मत्कृतरसमंजरीटिप्पणेद्रष्टव्यम्
५५५॥॥ इतिश्रीगोवर्धनसप्तशतीपकारव्रज्याव्याख्या ॥ ॥

काचिद्वयस्याश्विहसंवक्ति॥ बहुतरनायिकाशालिनि लाक्षया हताम मस्तके प्रियतमे व
यस्येनोपहसिते कथं स्त्रीप्रणाममकरोरिति तत्काल कलितलज्जा नायिका सखीषु सौभा
ग्यं सूचयति बहुतरांगनाजातमपहाय मय्येवासक्तमात्मेश्वरप्रणनिजन्यैव यमहतान
तच्छिरसीति योत ननेनेति भावः॥ यद्वा यद्यपि नायको नतथा प्रेमादि विदधाति तथापि स
खीष्वपि नमय्येव प्रेमवानिति प्रदर्शनेन स्वगौरवं संरक्षणीयमिति तत्प्रदर्शन प्रकारः।
काचित्काचिदुपदिशति॥ बहुयोषिति त्वनेनानेकनायिकावत्तया किमीयश्वरणालक्त

बहुयोषितलाक्षारुणाङ्घ्रिरसि वयस्येन दयितउपहसिते॥ तत्कालकलि
तलज्जापि श्रुणयति सखीषु सौभाग्यम्॥४५६॥ बंधनभाजोऽमुष्याश्चिकुरक
लापस्यमुक्तमानस्य॥ सिंदूरितसीमंतच्छलेन हृदयं विदीर्णमिव॥४५७॥ ॥

बहुनि संदेहयोगपत्त्वं ध्वन्यते तत्कालं वयस्योपहासैककालं श्रृंगीकृतलज्जैव सा खीषु सौभा
ग्यं सूचयति एवं चैतादृशसमयेनुयायीत्या स्वसौभाग्यप्रदर्शनं विधेयमित्यावेद्यते तेनचै।
तादृशोपि समयेनसमनसि खेदो विधेयः किं तु हर्ष एवाविष्करणीय इति॥४५६॥ काचिन्नायि।
कानायिका केशकलापस्तौति॥ बंधनवतः गतपरिमाणस्याति दीर्घस्येत्यर्थः एतेगताभिमानस्य।
अस्याः केशकुलापस्य सिंदूरयुक्तो यः सीमंतस्तन्निभेण हृदयं विदीर्णमिव बंधनवतोगताभि
मानस्यापि विदीर्णहृदयताभवतीति लौकिकम् एवं चैतद्बंधविमोको विधेय इति ना
यिकासखीवक्ति॥४५७॥

कस्याश्चिद्गुणानि दिक्कं कस्यचिद्वदना दाक एपि कश्चिज्जस्यामासक्तः स्तनिमधुपनलिनीं हृ।
गोनव्याजेन काचिद्वक्ति ॥।॥ बलवान्योवायुस्तेन समीपानीतं विकसितनवकमलसौगंध्यं

गो॰टी॰ यस्यसः मधुपोभ्रमरः कमलिन्यानासायांनि दिप्तारस्त्वर्यस्येनाहशाङ्खवश्राक्रम्यते ॥४५७॥

राम काचित्कं चिद्वक्ति ॥।॥ सामर्थ्यमपि आपिनागुणादिसमुच्चयः मयिवसति वसन्तीन्य

१२७ नेनयोहिंयदृष्धिकं स्यत्वंजानातिसतत्रैववसतीन्यतोन्यनायकव्यतिरेकः स्वस्मिन्ना।
वेद्यते इत्यन्यतगावेगाहृद्दं यथास्यात्तथावदतिसति संकुचितस्मितया एवं चकिंचित्स
लज्जात्वमावेद्यते नहंगनयालोकानां तद्वार्ताहृत्रावधानानामितिभावः वदनमीलितं

बलवद्दनिलोपनीतस्फुटितनवांभोजसौरभोमधुपः ॥ आक्रम्यतेनलिन्या
नासानिदिप्सुबडिशुरज्जुरिव ॥४५८॥ बलमपिवसतिमयीतिश्रेष्ठिनिगूढरा
वेगाहृद्दंवदति ॥ नज्ञायमाजनानां मुखमीलितमाहृतस्मितया ॥४५९॥ बाणं
हरिरिवकुरुतेसुजनोबहुदोषमप्यदोषमिव ॥।॥ ॥

मनःसमाधानलेशमपिकर्तुंनशक्नोतिवदतित्वेताद्दृशामितिविस्मयेनेतिभावः एवंचव
णिजः पुंस्त्वहीनतयातद्दंगनायाश्चसमृद्धमन्मथत्वेन तत्रत्वद्गमनेनतस्याश्रासक्तिस्त्व।
यिभविष्यतीतिध्वन्यते ॥४५९॥ ॥ गुणमात्रग्राहकत्वंसुजनत्वंदोषमात्रग्राहकत्वंपि
शुनत्वमितिकश्चित्कंचिद्वक्ति ॥।॥ हरिर्विष्णुर्बाणासुरमिवसुजनः बहुदोषमपिगुणा।
भिन्नोदोषः पक्षेबहुतरबाहुशालिनं दोषशून्यमिव पक्षेबाहुरहितंकुरुते ॥ १२७ राम

मलिम्लुचात्रवनस्करादवपिशुनाः पुनःप्राह्मोत्यदित्यर्थे यावद्दोषं समग्रदोषमित्य
र्थः पद्मे यावद्रात्रिं जागर्ति तद्विषयकगवेषणावंतो भवंतीत्यर्थः पद्मे निद्राभा
ववंतदूत्यर्थः परस्वापहरणार्थमितिभावः एवंच सुजनानां भीतिः किं दुर्जनादे
वेत्यनस्त्वं ततः सावधानतयातिष्ठेति ध्वन्यते ॥४९६॥ नायिकाहतीनायकंवक्ति ॥ बौद्ध
स्येव वद्धो वल्लभा नायिका यस्य पद्मे पद्मानां वल्लभस्य भक्तिविषयस्य तव यद्यपि भावा
स्थिरत्वाभिप्रायः प्रेमवा पद्मे पदार्थः क्षणिकोऽस्थिरः बौद्धमते तु पदार्थस्य क्षणिकत्वा

यावद्दोषं जागर्ति मलिम्लुचात्रव पुनः पिशुनाः ॥४९६॥ बौद्धस्येव क्षणिको
यद्यपि बद्धवल्लभस्य तव भावः ॥ भग्नाभग्नाम्रविव न तु तस्या विघटते मैत्री ॥
४९७॥ बद्धन्या ॥ भ्रमयसि प्रकटयसि रदं करं प्रसारयसि त्वणमपि भ्र
यसि ॥ धिङ्मानं तव जठर जीवं न जहासि जठराग्ने ॥४९८॥ ॥ ॥

दस्थिरत्वं तथापि भग्नाभग्नाम्रविव तस्या मैत्री न तु विघटते एवंच भग्नभ्रूवार्यया
चमत्काराधायकत्वं तथा तदीयकलहस्य प्रीतिजन्यतया नवमित्यवेहीति ध्वन्यते ॥४९७॥ ॥
वकारव्रज्या व्याख्या ॥ कश्चन दैन्यकारिणां महाकायमन्योक्त्या निंदति ॥ हे जठर भ्र
मसि दंतं प्रकटयसि दंतमित्येकत्वमविवक्षितं करं शुंडां हस्तं च प्रसारयसि त्वणमपि ।
अपि नानाश्रयणीयत्वमावेद्यते श्रामयसि अतस्तव मानं महापरिमाणं धिक् उदरानले
जीवं न जहासि एवं चोदरस्यार्थमेतादृशकरणमत्यंतानुचितमिति निव्यज्यते अन्योप्युदर

त्वेऽथ द्वितीयप्रकारः कांतप्राक्क्ययोनेन न गोत्ववत इति वा श्चित्कांचिदुक्ति॥॥ संलग्नमपि एवंचनचिर
कालस्तन्हिनाशइतिभावः त्वणामगिनिर्भमस्मरूपंकरुते विनाशयतीत्यर्थः हेसुवर्णा एनमतिनं
गो.टी. भजतोपिचिरसंबंधवतोपि नेसेवद्दृशाग्रकृत्वानुरोधेनेति तर्कयामि एवंचायमपकारा
१३५ कारकएव एवंतत्त्वंस्वगोरवबलादेवयथास्थितोवतिष्ठसि अतोनैनंसेवयेतिध्वन्यते य
द्वाऽत्यन्तविहीनेनतत्सेवाकरणोत्पंतनमर्थावाप्तिरितिकश्चिद्धन्योन्यथावक्ति त्वणामित्यनेन
हीनमित्यावेद्यते अत्रसमित्युपसर्गोनोचितः ऐश्वर्यप्रचुरंकरुते सुवर्णा एनंभजतस्तोरुरु

स्तनिमयंकरुतेगिनस्तृणामपिसंलग्नमेनमपिभजतः॥ सैवसुवर्णादृशाते(
युंकेगविमापरायेन॥४६३॥ भवतिनिदाघेऽदीर्घामहत्तरेयामिनीहयमुने
व॥ द्वीपाइवदिवसाश्चपितथाक्रमेणाप्रथीयांसः॥४६४॥ ॥ ॥

त्ववत्वात्सेवदृशा एवंचत्वयोत्पत्येनैनस्मान्नकिंचिद्धाम्नमित्यावेद्यते॥४६३॥॥ कश्चि
इहं त्कांचित्प्रतिसंकेतंवक्ति॥॥ एतस्मिन्निदाघेमहत्तरेसति दीर्घाइतिपाठेपूर्वकालाभिप्रा
येणायामिनीविशेषणंयमुनेवरात्रिःस्वल्पाभवति तथाक्रमेणद्वीपाइव द्वीपोस्त्रियामंतरी
पंयदंतर्वारिणस्तटमित्यमरः दिवसामहत्तराभवंति यमुनायास्तन्वीत्वकथनेनचरणसं
चरणयोग्यत्वंव्यज्यते द्वीपानांप्रथीयस्त्वकथनेनानेकतुंजवत्वं तेनचतत्रक्रीडाविशेष
संपादनयोग्यत्वंधन्यते एवंचरात्रेरतितनीयस्तयारतविशेषानर्हत्वेनदिवसानामतिदी
र्घतयादिवैवयमुनाद्वीपएवसंकेतयोग्यस्तन्निश्चयएवविधेयइतिद्योत्यते॥४६४॥॥

नायिकासखी नायकं वक्ति ॥ भवनामहति प्रीतिरूपवह्नौ एवं चात्वत्प्रीतेर्दुःखदत्वं ध्वन्यते
पद्मे तैलसंबंधिवह्नौ याऽपि नाम सुवर्णगुटिकेव एवं च नायिकायां गौरांगीत्वमावेद्यते
सा तन्वी हे पथिक प्रवासशालिन् एवं चान्यथानुज्झियोगमत्वं ध्वन्यते स्पर्शसहिष्णुर्हस्तेन ।
स्पर्शमपि एवं च हस्तेस्यापि पूर्णिमं नुश्रावयति किंवत्तन्न्यमिति भावः नष्टाकृता एवं चेयं त्व
द्दासस्कानानां पूर्वमपि चित्रपथ्येवरोतीति ध्वन्यते नष्टनेलेनि द्विमासुवर्णगुटिकासदो ।
षैर्नस्पर्शं पूर्वकेनिर्दिष्मादोऽस्य वहारः ॥४९५॥ कश्चित्सखायं वक्ति ॥ भूमौ लुलितं संलग्न
मेककुंडलं यत्र अनभिमतः काण्डपटो यत्र पक्ष्मपतनीयं मुग्धा निश्वासैः स्वभाजन्ये वेति भावः म

भवनामहति स्नेहानलेऽपि नापथिक हेमगुटिकेव । तन्वी हस्तेनापि स्पर्शसहिष्णु ।
र्न सा पाक्या ॥४९५॥ भूमिलुलितैककुंडलमनभिमतकाण्डपटमियं मुग्धा । पक्ष्मपती
निश्वासैः क्षिपति मनो वेणिसूत्रमपि ॥४९६॥ भवता लिंगि भुजंगी जातः किल भो ।
गिचक्रवर्ती त्वं । कंचुक वनेचरीस्तनमभिलषतः स्फुरति न लज्जिमा ते ॥४९७॥

नो वेणिसूत्रमपि एतत्पदेन स्वमनसि गुरुत्वमावेद्यते स्वेति साधु क्षिपति एवं चैतस्या एतादृशाव
लोकनेन न मम मनो वर्तिष्यते मयीति ध्वन्यते ॥४९६॥ सखीं गतनाभिलाषिणां कंचनकाचित्सखी कथा
वक्ति ॥ हे कंचुक येन भवता भुजंगी उरगी पद्ये वेश्या आलिंगि यस्त्व निश्चयेन भोगिनां भु
जगानां पद्ये भोगोपचारशालिनां समूहवर्ती यद्वा नेपुरुराजा जातः तस्य ते वनचरी भिल्ल
कांता पद्ये वनचरीत्वेन मूर्खत्वं नागशालित्वं ध्वन्यते स्तनं मित्येकत्वमविवक्षितं स्फुरतो ला ।
घवं स्फुरति एवं च तरायाः संगतिं मधिन्यज्याच तरासंगतौ लाघवकारिणीति ध्वन्यते ॥४९९

केनचित्कस्याश्चित्संकेतः कृत इति कश्चित्कांचिद्वक्ति ॥ तस्य पल्लीपतेर्वधात्सुहृदेन तस्य कामदृष्ट्या
वलोकितेनेत्यर्थः भिक्षासंबंधमन्नभोजनवता एवं च प्रयासशून्यत्वेन सुखेनावाप्यमित्यूह्यते प
गो. टी. १३१ ल्लीपतिः एवं च चातुर्यविशेषशालित्वं ध्वन्यते इति स्तुतः स्तुतिविषयीकृतः तामेवाह रत्नक
सर्वोत्कर्षेणानिष्ठसि यस्मादेकः रत्नशून्यः शून्यमद इति विज्ञजनरहिते देवालये सुखमस्मि
एवं च त्वद्ग्रहणासामर्थ्यान्न कापि कस्यापि भीतिरिति भावः एवं च देवालये मयैकाकिनास्थी।

131

रत्नक -

भैक्षभुजा पल्लीपतिरिति निस्तुतस्तस्य दृष्टेन ॥ राजक
न्यय सियदेकः शून्ये सुरसदसि सुखमस्मि ॥ ४९८ ॥ भो
गावतमस्य दृष्टाङ्गमात्रेण कुर्वतोऽभिमुखस्य ॥ हठस्य
समदापि श्रीरपि भ्रत्यस्य भोगाय ॥ ४९९ ॥ ॥ ॥
ने.

यते तत्र त्वया गंतव्यमिति ध्वन्यते ॥ ४९८ ॥ हठेन स्त्रीसंग्रहो वस्तुसंग्रहो वा न विधेय इति कश्चि
त्कंचिद्वक्ति ॥ भोगा रत्नं स्रक्चन्दनादिकं च तत्रासमर्थस्य दृष्टिमात्रेणाग्रहणं कुर्वतः मात्रपदेन धारी
रसामर्थ्याभावो ध्वन्यते वाङ्मात्रेणेत्यपि पाठः अनभिमुखस्य असामर्थ्यान्न कटाक्षनिरीक्ष
णासमर्थस्य आर्थिपराङ्मुखस्य च हठस्य प्रकर्षमदशालिनी नायिकापि लक्ष्मीरपि सेवक।
स्य भोगाय एवं चैतदुभयसंग्रहोऽनर्थक एव तस्येति ध्वन्यते ॥ ४९९ ॥ ॥ ॥

हे रजनि यस्यां त्वयि श्रमापनोदनाय पदं दधती वलयिनाय्या जंघा तया बद्धां मा।
मूर्यसि पातयिष्यसि एतादृशी त्वं भवितासि श्रमापनोदनाय श्रान्तस्य चरणा।
द्रुकपरिचरणाद्यानादि विधीयत इति लौकिकम् पक्षिकां गानार्थं संसनमेतत्॥४
७०॥।।किमिन्यस्य गौरवादि न विधीयते त्वयेति कादिंनी सखीं नायिका वक्ति।।।। हे
सखि भूषणानां सर्वोत्कृष्टतां कटकादि रूपतां च भजतः कषणेन चिरकालीन सं।

भवितासि रजनि यस्यां मध्यश्रमशान्तये पदं दधती॥ स
बलावलयितजंघाबद्धां मां मूर्द्ध्नि पातयसि॥४७०॥ ॥
भूषणतां भजतः सखि कषणाद्विष्णुरस्य जातरूपस्य॥।
पुरुषस्य च कनकस्य च युक्तो गरिमा सरागस्य॥४७१॥ ॥

गत्यानिकषोपलेन च विष्णुरस्य वितानसकलस्वभावस्य वितानश्रुद्धेश्वजा
तरूपस्य स्वरूपस्य यद्वा यतो रूपादिकमित्यर्थः पक्षे सुवर्णस्य चामीकरं जात
रूपमित्यमरः सरागस्य प्रीतिमतः पक्षे रागो लौहित्यं पुरुषस्य च कनकस्य च ग स
रिमा गौरवं पक्षे परिमाणं युक्तं एवं चैतादृशस्यैव गौरवमुचितमन्यादृशस्य
नेति भावः॥।।।४७१॥।।॥श्रीराधायदुनंदनायनमः॥।।॥रतिकामो जयतः॥।।

गो.टी.
१३२
132

स्वगुणैःप्रियवश्यताविधानदक्षांकार्मणेनानयापतिःस्वाधीनतामानीतइतिसपत्नीभिःश्रोच्यमा
नांनायिकांकाचिद्दूतीमनुपावक्ति॥॥ भस्ममलिनेगिरिशे एवमपिकाठिन्यमावेद्यते अतस्त्वंवा तेन
इवाराध्यत्वं त्वस्नेहः प्रीतिस्तत्स्वरूपानन्त्रप्रीतिकर्त्री प्रीतिमयुरेतिकश्चित् उचितेनसु
भगासि परंतुयद्दोषधीनांप्रस्थानिसानुनियस्मिन्तत्स्पडहितेति स्नुःप्रस्थःसानुरस्त्रियामि
त्यमरः एवंचानयाकार्मणबलेनपतिर्वश्यतामानीतइतिलोकवादः जनपदस्सनिवारणीय
तांध्वनयति मोहोऽलीकः एवंचत्वयानायकः स्वगुणैरेवस्वाधीनतांनीतोनतुकार्मणा

॥भस्मपरुषेपिगिरिशेस्नेहमयीत्वमुचितेनसुभगासि॥ मोहस्त्वयिजनवा
दोयद्दोषधिप्रस्थडहितेति॥४७२॥ भयपिहितंबालायाःपीवरमूरुद्वयंसम
रेणेद्धः॥ निद्रायांप्रेमार्द्रःपश्यतिनिःश्वसितिःस्वपिति॥ ४७३॥॥ ॥

बलेनेतिव्यज्यते तेनचलोकस्यभ्रांतत्वंतेनचनद्वचनस्याप्रामाण्यम्॥४७२॥॥ निकट
स्थायाअपिनवोढयानुपभोगोऽद्धःसाध्यइतिकश्चिदाह॥॥ बालायाभयेनेनवोढास्वाभा
व्यसुलभेनेतिभावः आच्छादितंपीवरंजंघाद्वयं प्रेमार्द्रःप्रेमयुक्तःइतियावत् मदनोद्दीपनि
द्धः नायकोनिद्रायांनायिकायाइतिभावः निःश्वसितिनिःश्वस्यसंभोगाभावादितिभावः पश्यति
ति यद्वा यस्ययत्रमनस्तदेवतेननिद्रायामपिदृश्यतइतिकश्चिन्नवचिदाह निद्रायांस्वपितीतिभा
वः एवंचजाग्रद्दशायांयावत्पश्यतिबालायाऊरुद्वयंतादृगेवनिद्रायांपश्यतीतिभावः॥४७३॥

नायिकासखीनायकंवक्ति॥॥ गंधानपविमलेन स्वाधीनीकृतचित्तात्वत्समसमनुसरंतीकेशगा
र्भेभ्रमरीवत्वामनुसरंतीश्रव्यकर्णलोकभयादितिभावः पद्मेकेशैराच्छादितत्वात् कूजं
तीसातमसिसंकेतंभ्रमति नायिकायांभ्रमरीसामान्येननायकेचतत्समसामान्येनयथातत्
समानुसरणंविनानगतिर्भ्रमर्यास्तथात्वदनुसरणंविनानगतिर्नायिकायाइतिद्योत्यते॥ ४०४॥
पतस्याममध्यस्तरागश्चिरंस्यास्त्यतिनवेतिसंध्यायानंनायकं नायिकासखीवक्ति॥॥ तत्रतत्रतत

भ्रमरीवकेशगर्भेगंधहृतात्वत्समसऽनुसरंतीत्वाम्॥ अ
व्यक्तंकूजंतीसंकेतंतमसिसाभ्रमति॥ ४०४॥॥॥ भ्रामंभ्रा
मंस्थितयास्त्रिहेहेतपयसितत्रतत्रैव॥ आवर्तपतिततनौ॥
कायितमसऽनयाविनयमपनीय॥॥॥ ४०५॥॥ ॥ ॥॥

द्वियाश्यालितिलोकोक्तरद्गतियावत् नवस्नेहरूपेपयसि पयःपक्षेमाधुर्याद्यभिव्यज्यते
पक्षेस्नेहयुक्तेजलेभ्रांत्वाभ्रांत्वास्थितयाऽनयाविनयंनम्रतांविशिष्टनीतिंच पक्षेविशिष्ट
नयनमपनीयआवर्तेभ्रमसंभ्रमेपतिता यानौकातद्वदाचरितमेव एवंचनान्यथाशंकनीयमि
तिभावः एवंचयथाजलेस्थितानौकाआवर्तपतितातत्तोन्यत्रनगच्छतितथेयंतवस्नेहेस्थितानान्य
त्रचिंतंकरिष्यतीतिव्यज्यते॥ एवंचसर्वत्रैवेयमनु
ग्राह्येति॥ ४०५॥

गो. टी.
१३३
133

काचित्कांचिद्वक्ति ॥ हे हालिकनंदिनि हालिकपदेन ज्ञानशून्यत्वेन तेन च कामुकागमनसौकर्यं विवाहयोग्यपेयं ज्ञाता नैतिज्ञानवैधुर्ये एवं कांचित्कालं यथेच्छं परपुरुषभोगसंपादनयोग्यत्वं ध्वन्य ते रणप्रचुरे गणाः सौंदर्यादयः प्रसेतुनव स्वसदने निकटे आलिंगनयोग्यान् पदे कंठबन्ध नयोग्यान् तरुणान् मेढिरज्जुः पुंसि मेढिः खले न्यस्तं यत्पशुबंधनदूषमरः हृप्रभानि वभ्रम यसि एवं चैतेन गृहमध्यप्रवेश करने तो नानीयंते भीतेरभावादिति भावः रणमये इति पाठे रणप्र चुराश्च ते कंठग्रहयोग्याश्च तानित्यर्थः ॥ ४७६ ॥ कश्चित्कंचिदन्यस्योपरि वक्ति ॥ हे ईश्वर एवं चो पदेशादानानर्हत्वं ध्वन्यते यद्यपि न वलला टनेत्रे वह्निर्मस्तके चंद्रः शरीरे सर्पमणि रूपदीपास्तथापि ।

भ्रमयसि रणप्रचुरकंठग्रहयोग्यानात्ममंदिरोपांते ॥ हालिकनंदिनि तरुणान्क
ऊम्मिनो मेढिरज्जुरिव ॥ ४७६ ॥ भालनयने ग्निर्विंडमौलौ गात्रे भुजंगमणयस्तु ॥ तदपि
तमो मय एव त्वमीश्वरः प्रकृतिमति शोने ॥ ४७७ ॥ भवज्या ॥ मधुमदवीतव्रीडा यथा
लपति संमुखं बाला ॥ नन्वथ मजानतं तथा वल्लभः पिबति ॥ ४७८ ॥ ॥

त्वं तमोमय एव एतमर्थं सूर्यान्तस्यासे न दूरयति स्वभावं को तिक्रामति न कोपीत्यर्थः प्रकाशकवस्तुबाहु ल्यसत्वेपि ध्वकारप्रचुरत्वमिति विरोधः तदभावस्तु तमः पदस्य गुणविशेषवाचित्वात् एवं च यद्यपि समीचीना सात्विकसंगतिस्तवास्ति तथापि त्वदीयं स्वाभाविकं तमो गुणप्रकृतिकत्वं नापगच्छतीति व्यज्यते ॥ ४७७ ॥ भवज्या ॥

आसक्तचित्तेनांगनेति तस्या अविनयमेव तदनि काचित्कंचिद्वक्ति ॥ मधुमदः अत एव गतलज्जेति विग्रहः मधु मदेन वीतव्रीडेति वक्रोक्तिः मदपदमधिकमिवाभाति वाला एवं च लज्जोचित्यमावेद्यते यथा यथा संमुखं अर्थो न्नायवाप्यवत्ति वल्लभोऽज्ञानतत्त्वः सन्वासामुखं तथा तथा सादरमवलोकयति एवं च रसिकानां नायिकी

१३३

३३

सखीनायिकांवक्ति ॥ मित्रैः समं विचार्य महत्तरं कलहमपि कृत्वा सम्यगुद्योगो पथ्य(?)रः स
रमिनिभावः आरब्धो ऽर्थ इत्यसतां सम्यानां मुखवैलक्षेण सम्यगिदमिति प्रियेनिभावः
अयं मानस्तवमुखवैलक्षेण प्रसादजन्येनेतिभावः हतः एवंच यथा मित्रैः समं विचार्य म
हत्तरकलहं विधाया रब्धो ऽर्थः सतां मुखवैलक्ष्यमात्रकरणेन विनष्टः एवंच प्रसादचिन्हं
कंचित्कालं गोपयेतिध्वन्यते पद्य यथाविचार्य कलहादिकंच विधायारब्धः समीचीनाना
नामर्थः मुखवैलक्षेण स्वतः कृत्रिमत्वेन त्वानारितिभावः अतएवसतामितिपदमुपयो
गिहतोभवति लोकैर्मुखवैलक्ष्यगोपनेनान्यथा निर्णयादितिभावः तथानेमानः कथंस

मित्रैरालोच्य समं गुरु कृत्वाकदनमपि समारब्धः ॥
हतअर्थ इवसतांमुखवैलक्षेणैवमानोयम् ॥ ५०९ ॥

माधेयोऽदयितनुन्यादिचिंताजन्यमुखमालिन्येन हतत्वमर्थः ॥ अथवामित्रैः समं मित्रत्व
स्वतया विचार्य उपकारकत्वादितिभावः मुखवैलक्षणेन रैन्यादिवशादितिभावः गुरु
महत्तरं कदनं त्वेशादिकं कृत्वा सम्यगार्जितो प्यर्थः इवयं सतां विवेकिनां हतो भवति दुःख
दत्वादनादरणीयो भवति तथा मित्रत्वेन विभाव्य एवंचास्माकमनादरकरणं न वोचितमिति
व्यज्यते मुखवैलक्षणेन महत्तरं कलहं कृत्वा एवंचान्यासां दुर्वचनादिरूपः कलहस्तवमुख
वैलक्ष्यगोपकरणमात्ररूपस्तस्मान्नायिकाव्यतिरेकः सूच्यते कृतो पितवायं मानो हतो भवति दुः
खदत्वादनादरणीयो भवति एवंचैतादृशमानविधानं तवानुचितमिति ध्वन्यते ॥ ५०९ ॥ ॥

गो. टी.
१३४
135

कश्चिल्लज्जावधूरास्वकृतोद्वाविक्षेपसमयेन्यप्रदेशाभिमुखींवीक्षांचिकीर्षति ।।।। हेमनस्विनि प्रण
यानःकरणे एवंचकौटिल्याभावोव्यज्यते अनुरागवचनः पल्लेलोहित्यवतः करहस्तं
पल्लेकिरणं समर्पयतोममहृष्टमपि यदिदृष्टासि लज्जावशान्मुखपरावर्तनादि(
तिभावः पल्लेपहृतःसेवयेदर्कमित्युक्तत्वादितिभावः तदपिकमलबंधोरिवस्व
स्याहंसौभाग्यमन्ये एवंचैनावतात्यहमात्मानंकृतार्थंमन्ये किमुसम्मुखावलो
कनेनेतिभावः एवंचयथाकथंचिद्व्याजेनस्पर्शार्थंकरसमर्पयतोममहृष्टदानेनकृपास

ममरागिणोमनस्विनिकरमर्पयतोदृष्टासिहृष्टमपि ।। यदितदपिक
मलबंधोरिवमन्येस्वस्यसौभाग्यम् ।। ४८. ।। मास्पृशमामितिसकपट(
कुपितमिवभणितंव्यंजितव्रीडा ।। आलिंगितयासस्मितमुक्तमनाचार
किंकुरुषे ।। ४८ ।।

ग्रन्थिमोचनानुमतिदानेनात्यंतानुकूल्यंविहितंत्वयेतिव्यज्यते ।। ४८. ।।।। पुष्पवती(
पुष्पवतींकश्चित्समवायंवक्ति ।।।। मांमास्पृशेतिसकुपितमिवनवास्तवमितिभावः भणितंलज्जा(
नचव्यंजिता पुष्पवत्त्वेतानेस्पर्शामयंनकुरिष्यतीतिधियेतिभावः आलिंगितयाप्रो(
त्कंठ्यादितिभावः आचारहीनकिंकुरुषेइतिसस्मितं सुखोद्रेकादितिभावः उक्तंच
एवंचकामिनीनांसुरतेसर्वदासौख्यमितिध्वन्यते ।। ४८ ।।

कश्चित्कांचिदन्योक्त्यावक्ति ॥ हे गोदावरि मेघतृष्णायामदिरानयाप्रक्षिप्तमदवती एवं च
कर्तव्याकर्तव्यविवेकविधुरत्वं ध्वन्यते हृदानां निकटस्थानामिति भावः मूलानि च तीर
वसतिशालितरुलतानां हृदयानि चावदारयसि वीचीभिः शिथिलकरणेन संकेतितं तरून्मू
लनेनेतिक्रमेणेति भावः कूलवसतिपदेन कुलटानामनन्यगतिकत्वेन हृदयविदारकत्वा
न्नौचित्यं च ध्वन्यते इदं किं नोचितमिति भावः एवं चास्थिरद्रव्याधुन्मादवशात्परोप
कारप्रवणानां निकटवसतिमात्रशालिनामिव सज्जनः समानीनान्नोपजीविनां डः ॥

मूलानि च निचुलानां हृदयानि च कूलवसतिकुलटानाम् ॥
मुदिरमदिराप्रमत्ता गोदावरि किं विदारयसि ॥ ४८२ ॥ मल
यद्रुमसाराणामिव धीराणां गुणाप्रकर्षोऽपि ॥ जडसमय
निपतितानामनादरायैव न गुणाय ॥ ॥ ४८३ ॥ ॥ ॥

दानमनुचितं न वेति ध्वन्यते ॥ ४८२ ॥ ॥ पांडित्यादिगुणशालित्वेऽपि जडाचाराश्रितं कश्चिदुप
दिशति ॥ ॥ मूर्खाचाररतिनां समयः शुभपथाचारेऽल्पसरः पदेषु हीनकालप्रामाणां चंद
नसाराणामिव धीराणां गुणानां पांडित्यादीनां पदेसौगंध्यादीनामाधिक्यमपि अ
पिरनादरानर्हत्वं गमयति अनादरायैव न गुणाय एवं च समीचीनस्याप्यसमीचीना
चारप्रविष्टस्य गुणायापि निंदाकरमेवेत्यतस्त्वया नैवमाचरितव्यमिति व्यज्यते यद्वा बुद्धि
मतामपि न जडसमूहे समादरस्तु निकष्विहृत्ति अत्र न गुणायेति न तथाप्रयोजनवदिति भा

गो॰टी॰
१३५

135

कस्याश्चिन्नायिकायाः सान्यस्त्र्यस्मिन्कर्णाग्रं कांचित्कांचिदन्योऽन्यावक्ति ॥ ॥ मधुमथनस्य श्रीकृष्ण
स्य मौलिसंबंधशालिनि मालेतत्त्वमसि सखि एवं च यथार्थवादाद्दिवं ध्वन्यते राधां प्रत्याह किमिति ।
तुलयसि स्वसमानां मन्यसे यद्यस्मान्नवपरिमलोद्रेकः अहसीयपदं राधासंबंधि चरणांबुज
भीकार्यं श्रीकृष्णेन सदा राधाचरणप्रणामकरणादिति भावः एवं च यथा तस्यां गौरवं त
थानन्वयीति ध्वन्यते सौरभोद्भेदेत्यस्य प्राकृतत्वेति पदद्दानमचितम् ॥ ४८४ ॥ कश्चित्सखायं
वक्ति ॥ ॥ ॥ गंतुकामे मयि अवधिदिनसमस्तत्वं चुंबनं तथा आलिंगनं कृत्वा प्रियया तावत्सं

मधुमथनमौलिमाले तुलयसि तुलसि किं मुधा राधाम् ॥ यत्तव पदमुदसी
यं सुरभयितं सौरभोद्भेदः ॥ ४८४ ॥ मयि यास्यति कृत्वावधिवृद्धिनसं कंप्रं चुंबनं
तथाश्लेषम् ॥ प्रियया तु शोचिता सा तावत्तत्र नतादमारं जनी ॥ ४८५ ॥ मृगमद
निदानमटवी कुंकुममपि फलबिकवाटिका वहति ॥ हट्टविलासिनि भवती पर
मेकापौरसर्वस्वम् ॥ ४८६ ॥

स्या कस्तुरतसंपादना समर्थारात्रिः तु शोचिता एवं च स्त्रीणां रतेऽन्यंतं प्रीतिरिति भावः ॥ ४
८५ ॥ ॥ कश्चिद्वेश्यां स्तौति ॥ ॥ ॥ अटवी कस्तूरिकोत्पत्तिस्थानं कुंकुममपि फलबिकवाटिका ।
वहति एवं च मृगमदकेसरयोर्वनवासशालितया नागरिकदुर्लभत्वमिति भावः ।
हे वारांगने एका भवती उत्कृष्टपुरसंबंधिलोकसर्वस्वं सुखविशेषप्रदत्वादिति भावः ।
यद्वा कस्तूरीकुंकुमयोरन्यत्रापि सत्त्वेन साधारणतया वारविलासिन्यास्तु नगरसमाश्रव
सतिशालितया साधारणत्वेन नागरिकात्यंतस्पृहणीयत्वमिति भावः ॥ ४८६ ॥ ॥

वसंतसमयेभृङ्गीपनोडेकान्तलीमवस्थानमम्याकयतइतिकाचित्कंचिद्वक्ति॥ हेसुखि
वसंतसमयेभृङ्गभ्राम्यन्तु सन् एवंचदर्शनेडष्यविहृदयंध्वन्यते यथायथाचिन्तलो
हकटकसदृशोभ्रमतोविशतितथातथामदनबाणोपि एवंचकेनचित्सहमांयो
जयेतिध्वन्यते यद्वा इतस्ततोमदर्थमेवपरिभ्रमन्भ्रमरइव भ्रमरःसारग्राहकत्वे
नातिचतुरत्वादितिभावः नायकोयथायथामनसिसमायातितथातथालोहकंटक
सदृशः एवंचव्याघकत्वंमदनबाणोपिहृदयंप्रविशति एवंचैतद्दर्शनेनाहंमदनशा

मधुदिवसेषुभ्राम्यन्यथायथाविशतिमानसंभ्रमरः॥ सविलोहकं
टकनिभस्तथातथामदनविशिखोपि॥४८७॥मयिचलितेनवमुक्ता।
दृशःस्वभावात्प्रियेसपानीयाः॥सन्त्यमूल्याश्चयःप्रयान्तिमम हृद
यहारत्वम्॥४८८॥

रविज्ञातयोर्गविनाऽवस्थातुंनशक्नोमि तेनसहमांयोजयेतिध्वन्यते॥४८७॥
नायकोनायिकांवक्ति॥ हेप्रिये मयिप्रस्थितेमुक्ताःपरित्यक्ताः पक्षेमुक्ताफलानि
स्वभात्स्त्रीस्वभावात् पक्षेसाहजिकतयासपानीयाःअश्रुवन्तः पक्षेतेजोविशेषशा
लिनः अमूल्याउत्कृष्टाः पक्षेबहुतरद्रव्यलभ्याःदृशयः ममहृदयस्यचेतसः पक्षे
वक्षसोहारत्वंअपहारकत्वं पक्षेहारभावंप्रयान्ति दृशस्तत्त्वं एवंचैतादृशत्वद्विलो
कनेनाहंगमनपराङ्मुखःसंवृत्तोस्मीतिव्यज्यते॥४८८॥

अहमत्यंतमदनबाधाक्रांतः सहजमहतीति कश्चित्कांचिदाह ॥ ॥ हे मुग्धे स्मरस्य पंचापि बाणाः
अपि नाम्ना सत्वाभावोऽवगम्यते मम मनसि निरंतरं एवं च सर्वमपि मनो विद्धमिति भावः
लग्नाः न तु निर्गताः अत एतेन मदनेन नवहृदये स्तनरूपगुटिकाद्वयमर्पितमित्यहं संभा
वयामि शराभावादिति भावः एवं च गुटिकावेदनायाः स्वल्पतया त्वयि धैर्यमयि नेति ध्व
न्यते ॥४८॥ ॥ कश्चित्कांचिदाह ॥ ॥ श्रीकृष्णवदनविनिहितायां वंशीनरंध्रानुसारिणः
शाब्दा मदनस्य नलिकाबाणा इव मम मनो हंत विदेहयंति एवं च वेणुध्वनिश्रवणान्मात्रावस्था
तुं न शक्यते ऽतो द्रुतं प्रयाहीति ध्वन्यते ॥४९॥ ॥ कयोश्चिन्मित्रयोरन्यतरसंगमयितृ हती

मुग्धे मम मनसि [illegible]गाः स्मरस्य पंचापि मनन संलग्नाः ॥ अंके स्तनगुटिकाद्वय
मर्पितमेतेन नवहृदये ॥४८॥ मधुमथनवदनविनिहितवंशीसुषिरानु
सारिणो बाणाः ॥ हंत हरंति मनो मम नलिकाविक्षिप्ताः स्मरस्येव ॥४९॥
महतोः सुजनयोः सविहृदयग्रहयोगपयोः समुच्छिन्नयोः ॥ ॥ ॥

नायिकां वक्ति ॥ ॥ श्लेषयोः एवं च परच्छिद्रप्रवेशणानर्हत्वं ध्वन्यते पक्षे महापरिमाण-
शालिनोः समीचीनाचरणयोः एवं च लौकिकाडंबरशंकाशून्यत्वमावेद्यते पक्षे समी
चीनवर्तुलयोः हे सखि हृदयग्रहयोगपयोगपयोश्चिन्मेस्यापयितृयोगपयोः एवं चा
तिप्रियत्वमावेद्यते यद्वा लिंगनयोगपयोर्विस्पर्द्धा पक्षे वृत्तः स्थितिशालिनोः समुत्थि
तयोः एवं च नवीनयौवनभाग्योदयादिशालित्वं द्योत्यते पक्षे नवीनोदयवत्वं स
ज्जनयोः स्तनयोर्विसंगतं निरंतरं भवति एवं चोभयोरपि समानगुणशालितया

न्यूनाधिकभावविरहेणोभयोर्मध्येऽयं प्रत्येवानुरागः स एवानुवर्त्यतामिति ध्वन्यते
यद्वा कयोश्चित्सहचरयोर्मध्ये ऽन्यतरस्मीत्या ऽन्यतरावलोकनमसम्यगिति मत्वानो
नायिकां वक्ति ॥ ॥ एतयोर्रतिनतरां शीतिमत्वेन परस्परानन्दसंवर्द्धकतया नान्यतरापु-
का विधेयाऽत्वयेत्यावेद्यते स्तनयोरिवेत्यनेनैतत्संगतिविघटनमसंभवीति ध्वन्यते क
थमेतयो रतितरां संगतिरितिवादिनीं कांचित्काचिद्वक्ति ॥ समानगुणशीलत्वादिति
भावः इतिवा अथवा समानगुणशीलादिशालिनोः साहजिकी संगतिरितिकाचिद्

सज्जनयोः स्तनयोरपि निरन्तरं संगतं भवति ॥ ४९१ ॥
मम वारितस्य बहुभिर्भूयो भूयः स्वयं च भावयतः ॥
जातो द्विगुणीतरस्यां सख्येन विनिवर्त्तते मोहः ॥ ४९२ ॥

कांचिद्वक्ति ॥ ४९२ ॥ ॥ कश्चिदेतादृशं नाचरणीयमित्युपदेष्टाकर्त्तारं सख्यायं वक्ति ॥
बहुभिः विवेकिभिरितिभावः सुहृद्भिरितिवा निवारितस्य नैवं विधेयमिति स्वयं
च मुहुर्मुहुर्विचारयतः मम द्विगुणीतरस्यां जातो मोहः प्रीतिः भ्रमश्च हे सखि नापग-
च्छति एवं च यथा संजातद्विगुणभ्रमस्य न केनापि निवृत्तिः कर्त्तुं शक्या तथैतस्यां ममोत्पन्ना-
नुरागस्य अतस्त्वदुपदेशोऽनर्थकः अथैतत्करणाद्विरमेति ध्वन्यते ॥ ४९२ ॥ ॥ ॥

पशुंगतातिलंपटतयाऽपकीर्त्यास्वजनपरित्यक्तां कंचनकश्चिद्वन्योऽस्यावक्ति॥॥ हेतक
श्रेष्ठ एवं चनीचस्येतादृशाचरणेन किंचिद्दूषणमितिध्वन्यते नर्मदायानया ।
गो॰टी॰ नर्मदत्तातीतिव्युत्पत्त्याकलाकलापवत्त्वमावेद्यते नायिकायां तरंगरूपकटाक्षैः अथ
१३ चवीचीनत्वायेलोचनक्षेपास्तैर्हृतः रसेजलेऽशृंगारादौच मग्नोऽसि एवं चानंदनिमग्न
(137) मानसतयालोकनिंदाज्ञानवैधुर्यमावेद्यते अहह्रतिपदिद्रुच्यसेलोकैरित्यर्थः अथ कत्र
न्नुपादानेनसर्वैपित्वांनिंदंतीतिव्यंजनेनतन्मूलपदत्वमाधिक्यकनीयं तर्हितेश्रेष्ठोपि श्लाघा
र्हः नायिकायालोकोत्तरसौंदर्यादिगुणशालितयेतिभावः एवं चैतादृशीं नियकर्मापिचेत्क

मग्नोसिनर्मदायारसे हृतोसिवीचिलोचनाक्षेपैः॥ यद्रुच्यसेपितल्कवरश्र
ष्ठोश्रेष्ठोपितेश्लाघ्यः॥४८३॥ मेनामुल्लासयतिस्मेरयतिहरिंगिरिंचवि
मुखयति॥ हृतकरबंधविलंबपरिणयनेगिरिशाकरकंपः॥४८४॥

नैव्यंतर्हिएतादृशानायिकयासहेतिध्वन्यते॥४८३॥॥ पाणिग्रहणसमयसंजातसात्विकभा
वोद्भवं कंचनकश्चिद्दुक्ति॥॥ विवाहकालेसंपादितपाणिग्रहेविलंबः गिरिशस्यहस्तकंपः मेनांपार्वती
मातरंउल्लासयतिसोत्यर्थः एवमत्रकामोद्विग्नजामातृलाभादितिभावः किंचस्मेरयति अत्य
न्तप्रकटितवैराग्यस्याप्यऽस्यैतादृशप्रवस्थेतिकुतुकादितिभावः एवं चैतादृशप्रवस्थाऽव
स्थंमहतामपिभवतीतिनत्वयाकापिलज्जाविधेयेतिध्वन्यते॥४८४॥॥ ह्रीराज्यांवं
डम्हदीहोमैःस्तब्धाग्निलैवसतामस्त्रृज्ञार्पितम्पदिपसुदैः कृताऽर्घिनाग्रामडशेत्विम॥१॥॥

१३

मधुगांधवत्मस्वेदार्द्रंतिलकं स्खलङ्कति सोन्मादत्वादितिभावः घूर्णद्दृशा
नयनं तस्मादुद्दिष्टनायिकायाः मुखमवधूयतिरस्कृत्यश्रवंबयित्वेतिभावः
अधरामृतं अत्रोष्ठपाननिषेधादितिभावः पास्यामि एवंचैतादृशवदनचुंब
नादप्यधरपानमधिकमितिनिष्पद्यते यद्वा मधुगांधादिगुणायुक्तमाननमवधू
यकंपयित्वास्थितनायिकायाः इतिघोषः तस्मादधरामृतंपास्यामीतियोजना पथिका

मधुगन्धघर्मतिम्यत्तिलकंस्खलदलकंघूर्णद्दृशाननम्॥
तस्याःकदाऽधरामृतमाननमवधूयपास्यामि॥४६४॥
मेदिन्यांतवनिपततिनपदंबहुवल्लभेतिगर्वेण॥आस्लि
ष्टकैर्नतरुणीस्तरीववसनैर्विमुञ्चामि॥४६६॥ ॥

ष्टांस्तनमेतत॥४६४॥॥कांचित्कांचिद्वक्ति॥ अहंबहूनांवल्लभेतिगर्वेणतवपदं
भूमौननिपतति केशतरुणीरालिंग्य वस्त्रैस्तरीवनविमुञ्चामि उपसर्गेणपुनःक
दापिनसंबंधस्तस्यावेद्यते अत्रोत्तरनायकवल्लभत्वेसर्वदर्ववनायकवल्लभात्वा
भावस्सहेतुत्वयातस्यचरणाभ्यन्तरत्वन्ततानाधीनतयाननत्वानेकवल्लभत्वेनगर्व
करणमनुचितमपितुयस्मादेकएवानेककलापाण्डित्योनायकोनिमग्नमानसस्तस्मा
एवगर्वकरणमनुचितमितिनिष्पद्यते॥४६५॥

परपुरुषेष्वभिरतिमन्पादयितुंदूतीनायिकांवक्ति ॥ मूलेऽआनंदनिदाने रहसीतिया
वत् फलेयथाम्रफलं स्वभावमधुरं एवंचौपाधिकमधुररससदानादोऽन्यदूतिभा
वः रसंदत्वाहिकं फलेऽत्रविकारं सम्यगपर्यंतः एवंचान्यत्रसमर्पणोपिनसा
मीचीन्यमितिभावः एवंचपरपुरुषानिमित्तपुरुषाणांरतंनस्वतोमधुरंनवातेतत्क
सुकृभालादूत्पावेद्यते पुरोजननसमर्थं फलेऽग्रभागेविरसाः लोकभीतेरितिभा
वः एवंचलोकवचनानिपुणत्वेनातिविरसत्वमावेद्यते परपुरुषाद्रत्वदूत्व अ

मूलेनिसर्गमधुरंसमर्पयंतोरसंपुरोविरसाः ॥ दूत्व
परपुरुषाविविधरसेषुविनिधेयाः ॥ ४९० ॥

नेकरसेषुविविधरतादौ फलेऽनेकमधुरप्रकारादौविप्रयोगास्थाप्याः एवंचप
रपुरुषेष्वभिरतिरतिनरामुचितेतिध्वन्यते यद्वा काचित्परपुरुषरतिंनिंदति विविधर
सेषुस्थापयितुंयोग्याः परपुरुषाद्रत्वदूत्वमूलेप्रथमतःस्वभावेनमधुरंरसंप्रीत्या
दिसमर्पयंतोऽग्रेविरसाभवंति एवंचप्रारंभसत्कर्मकवीनयेनानेसुखमेधतेहृ
सुकृत्वाप्रांतेपरपुरुषसंगतेर्निर्वाहेनदुःखदत्वेनतत्करणमनुचितमितियोत्यते
यद्वाप्रथमतःसरसाःपश्चान्नीरसाःपरपुरुषाविविधरसेषुविनिधेयाइतिकाकानेन्य

काचिन्नायकं विमर्दिनमवगाहयसीति वादिनीं सखीं वक्ति ॥ ॥ यद्यपि महति बहुतरे स्नेहे ।

प्रेम्णि पद्ये तैले निहितः तस्मिन्बहुतरं प्रेम संपादितमिति भावः पद्ये लोहमयी शु

नैश्वरप्रतिमा बहुतरतैलेस्थाप्यते इति भावः कुसुमं एकत्वमविवक्षितं बहुवारं दत्तं

यद्वा बहुकुसुममित्यन्वयः बहुप्रकारं पूजितः न च पिण्डग्रेग्रहः प्राग्रहो यस्य पद्येऽद्य

श्वासौ ग्रहश्चेति प्रियो वक्रः अरज्ज्वर्न पद्ये वक्रः अन्यत्राप्रिस्थितो न्यत्रापि संचरणावान्

शनैश्चर इव एवं चैतावता प्राप्ते हस्तादिनापि नाम्रह्रत्यं यथा तथास्य नायकस्य म

महति स्नेहे निहितः कुसुमं बहु दत्त मर्दितो बहुशः ॥ वक्रस्तदपि शनैः ।

श्चर इव सविड ग्रहो दयितः ॥ ५५८ ॥ मा प्रावरतरुणि पीवरवक्षोरुह

योर्भरेणाभजगर्वम् ॥ निर्मोकिनि प्रशोभा यया योर्भुजंगीभिकरुन्तुके ॥ ५५

तो न मम मापराध इति ध्वन्यते ॥ ५५८ ॥ ॥ कांचिन्नीचजनसेवितां यौवनगर्वितां काचि

त्सखी प्राह ॥ ॥ हे प्रावरस्तनरुणि एवं च स्वतो गुणाभावेपि नायकस्यापि निर्गुणता ।

तयानन्त्संगतिलभ्य गुणाच नाभावो व्यज्यते मांसलस्तनयोर्भरेण गर्वमा भज भु

जंगीभिकरुणीभिः अथ च वेश्याभिः परित्यक्तैरपि एवं चानादरो द्योत्यते निर्मोकैर्य

योः शोभा एवं चकत्सर्यजनसेवितत्वेन न त्वया गर्वः कार्य इति व्यज्यते ॥ ५५९ ॥ ॥ ॥

कथं त्वया परित्यक्तो मान इति वादिनीं सखीं नायिका वक्ति ॥ हे सखि कोपवत्या मम कच्छा
यां भ्रूमावालिंग्य संजात रोमांचः प्रीतिप्रचुरत्वमपरित्यजन्नेषो मां कोधरहितां किं न क
गो॰टी॰ रोति एवं चैनां दृष्ट्वा नहृन्नमवलोक्यमानः परित्यक्तो मयेति कथ्यते यद्वा शिथिलित
१३९ कोपा नायिका सखीं वक्ति कुपितायां मम कच्छायां भ्रूमावालिंग्य संजातरोमांचः प्रीति
प्रचुरत्वमपरित्यजन्मामपगततरोषां हे सखि किं न करोति किं न करिष्यतीति प्रश्नः वर्तमा को॰ ५

139

मम कुपितायाः कच्छायां भ्रूमावालिंग्य सखि मिलत्पुलकः ॥ स्नेहमयत्व
मनुज्झन्करोति किं नैष मामपरुषाम् ॥ ५० ॥ स्नपितस्त्वं वद नाविरहेषि
पृथिवक्रुस्तुमेषु केलिसंग्रामे ॥ हास इव श्रमसमये भजन्ननतांगीनतप्या
मि ॥ ५१ ॥॥

नसामीप्ये वर्तमानवद्वेतिभविष्यपि लट् एवं च हे सखि त्वं न व्याकुरु यथाऽयं
मत्कच्छायाः प्रतिपातादिना मामनुनयतीति ध्वन्यते क्वचिन्नापरुषमिति पाठः
नायिका चेयं परकीया ॥ ५० ॥॥ कश्चित्सखायं वक्ति ॥ क्षणमात्रसंजातविर
हे मृषितस्त्वं वस्त्राविद्यमानस्त्वं मन्मथकलापुंडे श्रान्तरिव श्रमकाले सेवकस्त्वं
नतांगीं भजन्नत्प्यामि विरहासहिष्णुत्वप्रचंडरतकलापुष्पाञ्जित्वं तदा तावन्निवा
निक्रमेणा स्नपितस्त्वं त्यादित्रयेणा व्यज्यते एवं चैनां दृष्ट्वा नायिकानान्येति ध्वन्यते ॥ ५१ ॥

१३९

अनुनयानेकप्रकारकरणेऽप्यधिककोपशालिनीं नायिकामवलोक्यानुनयनिर्विण्णं दयितं ना
यकं सखी समुपदिशति ॥॥ व्यवसायात्सांत्वनप्रकारात् द्विगुणः कोपवेगः इति हेतोस्त्वं मा
नवतीं मुंचसि इदं किं नोचितमिति भावः अत्रोपदेशमकमाह स्नेहभवः प्रीतिजन्यः
पक्षे तैलजन्यः कोपः सांत्वनं सांत्वस्तेन अनुनयेनेत्यर्थः अग्निर्जलेन चोन्निषत्यऽ
धिको भवतीत्यर्थः एवं चैतस्याः कोपः प्रीतिपूर्वक एव अतो नत्वमेतस्याः समाधाना
द्विरमेति ध्वन्यते यद्वा सांत्वने धिकमेव दूषितमिति कोपात्खिन्नं नायकं सखी वक्ति ॥

मुंचसि किं मानवतीं व्यवसायाद्विगुणमन्युसंयुक्ताम् ॥ स्नेहभवः पयसा
ग्निः सांत्वेन च रोषबद्धुमिषति ॥ ५.२ ॥ मलयजमपसार्य घनं वीजनविघ्नं विदा
यबाहुभ्याम् ॥ स्मरसंतापाद्दृगुणं निदाघमालिंगते मिथुनम् ॥ ५.३ ॥॥

एवं च तप्ततैलानलो जलेनाभिवर्द्धते तन्मूलानलनिवारणेन शपनियथा तथा प्रीत्यु
त्थकोपः सांत्वनेन वर्द्धते तन्मूलभूतान्यत्र गमननिरासेनाऽपगच्छतीति भावः एवं चा
त्रैव तत्कलीमवस्थेयमित्यावेद्यते ॥ ५.२ ॥ स्मरसंतापात्कामसंताप एवाधिक इति कश्चिद्विरक्तं
विहसति ॥॥ भुजाभ्यां चंदनं दूरीकृत्य घनमत्यर्थं वीजनस्य विघ्नं विधाय मदनसंतापव
शादनादृत घर्मकालीननिदाघं स्त्रीपुंसद्वंद्वमालिंगते विहायेति पाठे वीजनाभिन्नं
विघ्नमित्यर्थः निदाघकालीनसंतापदुःखमगणयित्वा सदयः प्रियाहृदयितासविधम
निद्योत्यते ॥ ५.३ ॥

कश्चित्कंचिद्धरणांगतस्तेनचावस्थितामवक्ति ॥॥ महाछायाः श्रेष्ठाः पक्षेगभीराः विश्वासाद्धिनि
श्रितं महतोपिश्रेष्ठानपि एवं चैतद्ग्रहणेनक्लेशावच्छेपि तं महान्तः परिगणयंतीतिद्योत्यते प
क्षेमहापरिमान् एवं चगोपनेनक्लेशावगाधलभ्यते दधतिस्थापयंति लघवोनीचाः पक्षेस्व
ल्पपरिमाणशालिनः अल्पमपि एवं च संहननोमुकरत्वमावेद्यते नदधति अर्थात
दभ्यासेनाममेवार्थंद्रढयति समुद्रोऽद्रीनगोपयति अद्रीनित्यनेनस्वड्ःखदसंदव।
सजातीयतयाहेवकत्वेपीद्रूपग्राहसत्वेनभीतिकरणेचिन्त्येपिचतद्ग्रहणेनमहत्त्व
त्वमावेद्यते निदाघकालीननद्योमंडूकमपिनगोपयंति भेकरसनस्वजीवनाधीना।

महतोपिहिविश्वासान्महाग्राहाद्दधतिनाल्पमपिलघवः ॥ संवृणुतेद्रीनुदधि।
र्निदाघनद्योन भेकमपि ॥५.४॥ मधुधारेवनमंचसि मानिनिरूढापिमाधु।
रीसहजाम्। ॥ कृतमन्थभंगापिसुधासिममसि दिवांभोधेः ॥ ५.५॥ ॥ ॥

जीवननयानद्याविधस्त्राग्रहस्यतयाचरणेचिन्त्यमावेद्यते एवं च महान्तएव महान्तरक्षा
त्रैमवश्यापिशरणागतंपालयंतिनतुक्षुद्रइतिध्वन्यते ॥५.४॥ आरध्यमानानांनायिकानाय
कौवक्ति ॥॥ हेमानिनि एवं चरूढादिकारणेचिन्त्यमावेद्यते माक्षिकधारेवरूढापिस्नेहाभा
वकल्पपिस्वाभाविकींमाधुरींनत्यजसि सहजामित्यनेनतस्यास्त्यागस्यवार्तामप्यशक्यत्व
मावेद्यते वक्रीकृतनवदनापित्वंजलधेर्नदीवममरसंप्रीतिं पक्षेजलंप्रयच्छसि मान
स्त्रायलघुः ॥५.५॥ नमःस्मराय ॥ ॥

वीणावादनकारिणीं नायिकां सङ्केतोत्कंठितनायकस्त्विरसनायवक्ति ॥ हेरदहिणि एवं
चद्याववौचित्यमावेद्यते मन्मथाकृष्टचापज्याघातैरिव वीणातंत्रीझांकृतैः केषां प
थिकतरुणानां चेतो न विकंपते अपितु सर्वेषां एवं चैनादृश्यात्वदीयवीणावादन
श्रवणेन पथिकप्राणाः प्रयास्यंतीत्यतो विरम वीणावादनादिति द्योत्यते न विक
ल्पत इति पाठे जीवनं भविष्यति न वेति संदेहवद्भवतीत्यर्थः ॥५६॥ ॥ नायकः साका
यंवक्ति ॥॥ क्वचांतरिते क्वचिन्मार्गमध्ये स्मितगोपगोपितार्थं नमितग्रीवयोः रागस्तु
भूतविलासस्मरणाजन्यदर्शनसमसमयस्मितस्वपरकीयाविषयकात्वेन गोपनमाव

विकंपते = मदनाकृष्टधनुर्ज्याघातैरिव गहिणि पथिकतरुणानाम्। वीणातंत्री
क्वाणैः केषां न विकल्पते चेतः ॥५६॥ मम भयमस्मात् कोपो निर्वेदो स्वाम
मापि मंदाहम्। जातं क्वचांतरिते स्मितसंहतमनमितकंधरयोः ॥५७॥

द्रूपकमिति भावः आवयोर्मध्ये मम भयं किमिति मया जनस्य प्रेमावेदकमिदं स्मितं कृत
मिति धियेति भावः अस्याद्दति परोक्षायामपि नायिकायामपरोक्षवन्निर्दिश्यात्पततद्दे
कतानतापन्नत्वमावेदयति नायके कोपः किमित्यहितं विहितं स्मितमाद्दावनेनेति ।
धियेति भावः अस्या निर्वेदः स्वावमाननाकिमेतादृशोनिस्निग्धे विदग्धेमुग्धेवको
पमकरवमिति धियेति भावः अपिश्चार्थः मम च मंदाहं लज्जा कथमविदग्धः को
पमीदृशमाश्रप्यकरवमिति धियेति भावः जातमिति सर्वान्वयि एवं चैनादृशपरगु
णाविष्कोषशालिपरांगनासंगतं भवतीति व्यज्यते ॥५७॥

नायकोऽयं नासक्तायां तस्यां न तत्र वासक्तिरेतस्यां सा प्रत्यन्तं किमिदमिति विवादे तं सखायं वक्ति॥॥ हे
गो. टी. सखि सामान्यस्य संबंधित्वं सो यया पक्षेऽम्बरमाकाशं धावन्तु पतन्तु चरन्तोऽद्य इति भावः पक्षे भ्रमा भवतु २
१४१ विति भावः त्रिमार्गगा वाऽस्तु यत्किंचित्तस्याऽस्तीति भावः पक्षे स्वर्गमर्त्यपातालगा मम स
मीचीनवंशजन्या चासौ अनुकूलरतिमती पक्षे वंशो वेणुः नर्मदायाः जनतोत्पत्तेः रसोऽज(
लं इयमेव नर्मदा सुखदात्री पक्षे नदी नाम एवं चेयमेव सम्यग्रोचते न सेति ध्वन्यते यद्वा ययः
1W

मुक्तावलीव त्वथावन्ध निपतन्तु सा त्रिमार्गगा वास्तु॥ इयमेव नर्मदा मम वंशप्रभवा
नुरूपरसा॥५.८॥ मृगमदलेपनमेतं नीलनिचोलेव तिमिरे निषेवन्ती॥॥
कालिन्द्यामिन्दीवरमिदं भ्रमरसुन्दरीव सखि॥५.९॥॥ नंदनंदनजय॥॥

प्यासक्तिं प्रदर्शयति सा तथाप्यनेकमार्गगामिन्यतः अस्तु तिष्ठतु कचित्पर्यः सद्वंशप्रभवत्वेन
यमनेकमार्गगामित्वाभावान्मम सुखदा एवं च तस्याश्च अनेकगामितया प्रेमदर्शनं कृत्रिममिति
भावः॥५.८॥॥ इतीं नायिकां वक्ति॥॥ हे सखि कस्तूरीलेपवंतं एतं नायकं नीलवस्त्रैव रात्रौ से(
वय एवं च तत्कस्याभिसारिकात्वमेव नवोचितमिति भावः कालिंद्यां नीलकमलं भ्रमरसुं
दरीव एवं च त्रयाणामप्येकरूपत्वान्न केनापि किमपि त्तानंद्राक्यमिति ध्वन्यते॥५.९॥॥
१४१

सखी कंचन नायकं स्वनायिकाचातुरीं वक्ति ॥ ॥ हे पथिक एवं चान्यमार्गेण निमित्तत्वेन चिरविरहपालि
नयाचनत्सीमवस्थितिरेवोचितेति ध्वन्यते मम सख्योः कटाक्षविषयीस्तः कश्चिदपि एवं च तवका
वार्तेति भावः गतेन मार्गः एवं च तत्सौंदर्यायालोकनेन केनास्मा जाता इति भावः अन्त
संच विषमे पतितोसि यतः कस्य ब्रह्मणोपि दुर्गमे पथीति पदच्छेदेन योज्यं इयं विषम पाश स्स
मदनराजस्य चंद्रकूटी एवं च त्वयात्रै । वस्थेयमित्यावेद्यते ॥५१॥ ॥ सखी नायकं वक्ति ॥ ॥ म
हता श्लेषेन प्रियेणाप्रेमास्पदेन नायिका जनेनेति भावः कृतमप्रियमपि सुभगा सह्यतां या
ति न दुःखदमित्यर्थः अपि नाऽसह्यत्वमावेद्यते अत्रार्थान्तरन्यासमाह पुत्रोत्पन्नमाता हु
ःप्रसवार्तेन दुःखायनेति निश्चितं एवं च नान्यथा शंकनीयमिति भावः एवं च प्रियानिर्मिताप्रि

मम सख्या नयनप्रदेशमिलितः प्रत्नोन कश्चिदपि चलितुं । पतितोसि पथिक विषमे चंद्रकूटीयं त्रस्तमकेनोः ॥५२॥ महता प्रियेण निर्मितमप्रियमपि सुभगा सह्यतां याति

२४ येण खेदकरणमुचितमिति ध्वन्यते यद्वा कथमनया हं कस्त्वमसि किमर्थमत्रागतोसि इति
परुषवचनेनाभ्यधायीति क्रुद्धं नायकं नायिकासखी वक्ति हे सुभग एवं च । सुभगत्वेन तव न ति
रस्कार इति भावः महता श्लेषेन प्रियेण सुखेन विहितं नानरोचकतयेति भावः अप्रियमपि स
ह्यतां याति एवं चातिचिरकालत्वत्संगतिनिर्वाहाय गोपनार्थमेव कृतमनस्त्वयै तादृशं वचनं
सोढव्यमिति भावः अत्र दृष्टान्तमाह सुतसंभवेनेत्यादि अथवा दयितकृताप्रियखेदखिन्नां
नायिकां सखी वक्ति महता गुणेनेति भावः प्रियेणानत्पप्याहतमप्रियमपि सुभगा सह्यतां

गो॰ टी॰
१४२

सुभगाचासौसह्यताचतां अयंतसह्यतामित्यर्थः यतिगुणाभाववतापिनायकेनकृताप
राधःसह्यते तत्रकिंवाच्यंगुणावत्तरनायककृतापराधःसह्यइतिभावः अत्रदृष्टान्तमाह ।
स्तनसंभवेनेत्यादि एवंस्त्रीणांयथारोगेणयौवननाशनेदुःखंखेदंनतुस्तनसंभवेनयत्स्तनस्त
त्वदमेवेदमित्यनुगत्येदंसह्यमितिभावः यद्वा स्वापराधजन्यातिभीत्यानायिकादर्शनेनोदा
सीनंनायकंनायिकासखीवक्ति सुभगएवंचतवापराधेपिसात्वामपेक्षते अतस्त्वमु
क्तंधन्योसीतिध्वन्यते एवंचात्यंतप्रेमवतीसात्वय्यनत्वत्कृतापराधान्नगणयत्यतस्त्व

स्तनसंभवेनयौवनविनाशनंनखलुखेदाय ॥५११॥ ॥
मानग्रहगुरुकोपाद्दयिताऽन्यैवरोचतेमह्यम् ॥ कांच
नमयीविभूषादाहांचितस्फुटभावेन ॥५१२॥ मकारव्रज्या ॥ ॥

भीतिमुक्तस्त्वमुक्तःसविशेषंश्लाघ्योसीतिध्वन्यते ॥५११॥ नायकोनायिकासखींवक्ति ॥ मानां
गीकारेणमहान्यःक्रोधस्तदनंतरंदयितामह्यमन्यैवरोचते दाहेनप्रकटितस्फुटस्वरूपा
सुवर्णविकाराविभूषणमिव एवंचयथादाहादिनासुवर्णभूषणस्यनैर्मल्यं तथा
मानापगमोत्तरंनायिकायानैर्मल्यं अतोनतत्कृतमानातिशयेनममदुःखं अपि
तुसुखमेवेतिध्वन्यते तेनचमानस्याऽस्थिरत्वंध्वन्यते ॥५१२॥ मकारव्रज्या ॥ ॥

इतीनायकेनायिकासम्मतिङ्मायंवक्ति॥॥॥सानायिका कंटकद्रुमानिवचैलांचलग्राहकांस्तरू
णांस्त्यजंती त्वामेवपुरुषंजानाना वनद्रुवनगरेपिविचरति सूनद्रुमनेनस्वहृणीयत्वं कं
टकविटपानित्यनेनस्वाभाविकबलात्कारकारित्वेपितद्दणानेनातिसतीत्वमावेद्यते वनद्रु
वेत्यनेनसूनांबाहुल्यंसभीतिसंचरणोपालित्वंचनायिकायामावेद्यते पुरुषमित्यनेनावश्यसंचरणार्ह
त्वंद्योत्यते अपिनान्यसंग्रहः पुरुषमित्यनेनमन्मथकलाकलापत्तापालत्वं अथवान्यस्त्रीतुल्या
झ्यपंतानाहरोन्यपुवस्त्वितिव्यज्यते एवंचसर्वत्रसर्वेपिनस्याम॑न्यंतासक्ताः सातुत्वय्येवेति।८

सूनः कंटकविटपानिवांचलग्राहिणास्त्यजंतीसा॥वनद्रुवपुरेपिविचरति
पुरुषंत्वामेवजानंती॥५१३॥युष्मास्रूपगताःस्मोविबुधावाङ्मात्रपाट॥
वेनवयम्॥अंतर्भवतिभवत्स्वपिनाभक्तस्तत्रविज्ञानम्॥५१४॥॥ ॥

ध्वन्यते॥५१३॥॥कश्चिद्दृष्टोद्दरिद्रः क्वचित्समुदायेगतस्तत्रवसतिमलभमानस्तान्व
क्ति॥॥॥भोपंडिताः वाङ्मात्रपाटवेनपांडित्यमात्रबलेनवयंभवत्सविधेसमागताःस्मः विद्वा
नेवहिजानातिविद्वज्जनपरिश्रममितिन्यायेनेतिभावः भवन्मध्येऽभक्तोऽन्तरहितः दरिद्रःस्तिया
वत् नांतर्भवतीतिविज्ञातमपिन अपिनानानुभूतमिति किंबहुनाप्यमितिव्यज्यते अत्रोपसर्गस्यनतथा
प्रयोजनं यद्वायथास्थितएवापिः एवंचांतर्भवनयोग्यत्वमावेद्यते एवंचनपांडित्यग्राहिणोभवंतः
किंतुद्रव्यलब्धाहनियोस्मुते एवंचद्रव्येणैवसर्वत्रप्रतिष्ठा नपांडित्यमात्रेणेति यद्वाभक्तिरहितद्र
व्यः एवंचयोभवदीयसेवांकरोति सएवभवत्समावेशमाप्नोति नतुपांडित्यमात्रशालीतिभा

नायकोवक्ति॥॥ यत्र न हन्ती प्रेषिते निभावः प्रेमार्द्रीः कटाक्षा अपि न कृताः गिरोपि न सभावोऽभि
प्रायः निपुणाया सकलजनवञ्चकत्वादिति भावः अनुरागेणाऽयमङ्गीकृतः एवं चाति निरस्ते निज
कार्यसाधकतयाऽनया सदृशी न काप्यस्त्येति ध्वन्यते यत्र भावेन हन्ती न प्रकटने समर्थेति भावः य
त्र निहिताः प्रेषिताः प्रेमार्द्रा दृष्टयोपि न स्निग्धा वाचोपि न प्राकट्यसंपादकादिति भावः सभावोऽरसा
त्कुलविकारः निपुणाया समयज्ञत्वादिति भावः प्रीत्या प्रकटीकृतः एवं च योनुभावो मत्प्रेषित
हन्ती प्रेषणात् क्रियापारैर्न प्रकटीकृतः सभावोऽयं स्वयं समयविशेषमासाद्य व्यक्तीकृत इति लोकोत्त
रत्वात्तस्या लिख्यमावेद्यत इति वाऽर्थः सभावोऽनुगमनेनेति पाठे तन्मरणोत्तरं तत्प्राणपरित्यागे

यत्र न हन्ती यत्र स्निग्धा न दृष्टोपि निपुणाया निहिताः॥ नीरागेयापि व्यक्तीकृतः सभा
वोनुरागेण॥ ५२५॥ यानीयते सपत्न्या प्रविषप्रचावर्जिता भुजंगेन॥ यमुनाया
इव तस्याः सखि मलिनं जीवनं मन्ये॥ ॥ ५२६॥ ॥ राम॥ ॥

नेयमस्मिन्नास्यके नित्यानमित्यर्थः क्वाचित्सज्जारोऽनुसरणेनेति पाठः॥ ५२५॥ ॥ सपत्न्यधीनत्वादि
कामसम्यगितिकाचित्कांचिदृक्ति॥ ॥ सपत्न्या पतिप्रियां तत्या पक्षे गंगया यानीयते पतिसविधे इ
ति भावः पक्षे समुद्रसविधे भुजंगेन विंगेन पक्षे सर्पेण प्रविषप्र याश्रावर्जिता स्वाधीनीकृता
यमुनाया इव तस्या जीवनं जीवितं पक्षे जलं सखि मलिनं निंद्यं पक्षे श्यामं मन्ये एवं चैतादृशान
यास्येयं नायिकया येनोपायेन सर्वाधिकतयाऽवस्थानं भवतीति ध्वन्यते यमुनजलं श्यामं
मिति कविसंप्रदायः एतेन पूर्वपत्न्याप्रवसौंदर्यनैपुण्यादिनाधिक्यमिति व्यज्यते॥ ५२६॥ ॥ ॥

दूतीनायिकां केनचिन्नायकेन सह संगमयितुं वक्ति ॥॥ यस्मिन्यद्विषये ते अकीर्तिरपिकी
र्तिः लज्जाविघ्नः मानकरणमेव दंडः शीलता एवकारेणानन्यकार्यविरुद्धवचनादेः कार्या(
नैतिभावः लाघवं सगुणग्रवणना एतादृशोनूतनः एवं चावश्यग्राह्यदर्शनयोग्यत्वं व्य
ज्यते तरुणः एवं च स्पृहणीयत्वमावेद्यते हे सखि एवं च हितकथनार्हत्वं व्यज्यते किं
न दृष्टः त्वयेति शेषः अथवा त्वत्संबंधीयुवास्माभिः किं न दृष्टः अपितु दृष्ट एव एवं च स(

यस्मिन्नऽयशोपि यशो लज्जी विघ्नो मान एव दंडो शील्यम् ॥ ल
घुता गुणास्तता किं न रो युवा सखि न वो दृष्टः ॥ ५२७ ॥ यदै
वतो महत्त्वं डष्टानां कापि दृश्यते न तदपि ॥ काकानां शौ(
ल्यमिव दृष्टं न चिराद्दऽनर्थाय ॥॥॥ ५२८ ॥॥ राम ॥

स्यकृत्वया संपादितं यदेतादृशो आसक्तिः संपादितेति ध्वन्यते इति सखी वा क्यम् एवं
चैतादृशो गुणानुरूपयौवनादिसंपन्नो नान्योस्ति नायकः अतएतद्दर्शनायत्वरस्वेति ध्वन्यते
५२७ ॥॥ खलानां माहात्म्यदर्शनेनापि न विश्वासो विधेय इति कश्चिद्वक्ति ॥॥ अदृष्टवशा
त्कश्चिद्दुष्टानां यन्महत्त्वं दृश्यते न तदपि काकानां शौल्यमिव न चिरात्स्त्रीसमनर्थाय ए
वं च दुष्टस्वभावानामदुष्टस्वभावप्रदर्शनमकार्ये हेतुर्नैवेति व्यज्यते ॥ ५२८ ॥॥ ॥

गो.टी.
१५५
155

खलापवप्रेमविघटितारज्ज्वितिकश्चित्कोऽपिहसति ॥ यत्रखलवदनरूपोवह्निस्तत्रदि
व्यमपिशुद्धिमेव एवकारेणाविनाशाद्यवच्छेदः एतिप्राप्नोति तत्परमुत्कृष्टंप्रेमाऽ
नलेशौचंशुद्धिर्यस्यएतादृशंवसनमिवखलुनिश्चितंइहलोकेदुर्लभं एवंचकोऽवे
दस्वर्गादेर्भविष्यतीतिनैवेतिध्वन्यते एवंचयथावसनस्याऽनलप्रक्षेपणेविनाशएव
व तथाखलविहितानप्रेमणोऽवधूपनाशएवेतिध्वन्यते तेनचयथाखलैर्नविज्ञेयमेत(

यत्रखलुखलमुखदहनवहविनिहितमपिशुद्धिमेवपर
मेति ॥ तदनलशौचमिवांशुकमिहलोकेदुर्लभंप्रेम ॥ ५५

तत्प्रेमतथात्वर्विति अथवा यत्रखलैरपिविघटयितुमशक्यंतदेवप्रेमसम्यगितिकाचि
दूर्ति वक्तिअनलशौचंवस्त्रद्वयमस्तीतिपुराणप्रसिद्धिः यद्वा यत्रखलैरपिसम्परिदम्भ
योःप्रेमस्पृश्यते तदेवनिश्चयेनपरमुत्कृष्टमतएवदुर्लभं एवंचतथाविधेनैवसहस्थीति।
विधेया याखलैरपिस्पृश्यतेनतुसाधारणोनस्नेहेतिध्वन्यतेअनेनकाचित्काचित्प्रतिवक्तीत्य
र्थः अत्रखल्वितिदुर्लभमित्यस्यसन्निधावुचितं शुद्धिमेतीतिपाठे एतिनिर्गच्छतीत्यर्थः ॥ ५५ ॥

नायकः सखायं वक्ति॥ येनेयमऽवधिं कदा समागंतव्यमिति नार्थ्यते न वदतीत्यर्थः मार्ग
व्ययार्थं सर्वस्वं प्रयच्छति तेनाऽनया महत्तराशां कांचित् प्रापितं एवं चाऽवधेरप्रार्थ
नेन व्ययाय सर्वस्वदानेन चेयं महत्तमनोरथमवश्यं प्राणांस्त्यक्ष्यतीति भावः एवं च नम
यावस्थीयत इति ध्वन्यते यद्वा कश्चित् कंचिद्वक्ति अवधिप्रार्थनाभावेन पाथेयार्थस
र्वस्वदानेन चाऽनया चेतो नायकस्य दारुणाशां कामन्यथासंभावनां प्रापितमिति भावः॥
५२०॥ नायको नायिकां वक्ति॥ हे तरुणि तरुणानामीर्ष्यावैरं एकामिषलाभलिप्सुभ
यत्र भावः विस्तारयता चक्रवत्संदेशेणावर्तलत्वादिप्सुभयत्रभावः खलेनेव धान्यस

यन्नावधिमर्थयते पाथेयार्थं च दिशति सर्वस्वम्॥ तेनाऽनयाऽतिदारुणाशां
कामारोपितं चेतः॥५२०॥ यूनामीर्ष्यावैरं वितन्वता तरुणि चक्ररुचिरुचिरेण
नवजघनेनाकुलिता निखिला पल्ली खलेनेव॥५२१॥ यावज्जीवनभावी तल्पा
योर्नितान्तनिर्भेदः॥ नद्योरिव बद्धवयोः संगो समधिको भावहतु॥५२२॥ ॥

र्दनस्थानेनेव तनवजघनेन समग्रा पल्ली व्याकुलीकृता॥ एवं च सर्वे पित्वय्यासक्ताजाता
इति भावः खलेनेव उद्देनेव तिव्याख्याकरणो चक्रं समुदायस्तेन रुचिरेणोत्यर्थः॥५२१॥
कयोश्चिदत्यन्तमैत्री दृष्ट्वा कश्चिद्वक्ति॥ यावदायुः स्थितिशाली पतेयावदुदकस्थि
तिभावी अत्यन्तनिर्गतभेदः तुल्यान्तःकरणयोः पतेसमानगभीरताशालिनोः नद्यो
र्णयोर्नद्योरिव संगः संगतिर्मैत्रीति यावत् पक्षे संबन्धः अधिकं संप्रीति पक्षे जलं भाव
हतु एवं चैतादृशपेव यमेनयोर्मैत्रीऽत्र रोमराभिहाद्विषालिन्य स्थितिध्वन्यते॥५२२॥ ॥

गो॰टी॰ नायकः सख्यायं वक्ति ॥ मया निहितां यत्नां मालां ग्रोत्वरयसि छिद्रो भूषणत्वेन कल्पे सा
हे ग्राठ सर्वं तं पातु हस्तुत्के निग्रोष: मस्तके च रणेन प्रहरंती अभिमान बहुतर कोपवती
स्मरसि एवं च तत्काल हतन ताडनेन कोप परिमार्जनेन स्वरतानंद दायितया न तत्तुल्यान्वे
१४५ तिन स्यामेवमममासक्ति रिति ध्वन्यते ॥ ५२३ ॥ कश्चित् कंचिद्वक्ति ॥ यत्पो नायके नाक्रण्यगोप
145 नं कुर्वाणा हृहमये प्रपन्वेति स्वहणाकार्टेनयायौवन तौ नोत्तरं न बहिरिं छिद्रास्पतीतिधि
येतिभावः बंधुषु मुग्धत्वममतांवे मुग्धत्वमानेनैतैर्यथेच्छविहारः कार्तं देयः अथवा प
यन्निहितां ग्रोत्वरयसि मालां सा पातु प्राठ भवंतमिति ॥ प्रहरंती शिरसि प्रहा
स्मरसि तां गर्वगुरुकोपाम् ॥ ५२३ ॥ यौवन स्तुतिं यत्पो वधुषु मुग्धत्वमार्जवं ग
रुषु ॥ कुर्वाणा हलिकवधूः प्रशस्यते ग्राम नो युवभिः ॥ ५२४ ॥ यो नु गुरुभिर्न मि
त्रैर्न विवेकेनापि नापि वा हसितैः ॥ निवसित गर्वः स्तंद रसि विनीततं त्वयानीतः ॥ २५
नि सविधेन प्रेषणीयमिति धियेतिभावः श्वश्रूरादिष्वार्जवमृजुत्वं सरलत्वेन हातेनैतैः कौटिल्यं ते लं
यमिति धियेतिभावः हलिकस्त्री एवं चात स्त्रीत्वेन मौर्ख्यवत्वोचित्यपि चातुर्य शालितया स्तुतिकरणायो
ग्यत्वमावेद्यते तरुणोर्मिषात् लोकगोपनार्थमिति भावः प्रशस्यते स्तूयते ॥ ५२४ ॥ ॥ काचित् कांचि
द्वक्ति ॥ ॥ यो गुरुभिर्मित्रैर्विवेकेन प्राज्ञहसितैः एवं न नियंत्रितः सः हे सुंदरि त्वया विनीततं प्रापितः
एवं च गुरुवचनस्यानुल्लंघनीयत्वेपि मित्रोपदेशास्यातिप्रियत्वेपि विवेकस्य दुर्व्यसनादित्या
ग संपादनस्वाभावेपि वैरिहसितानामति दुःखदत्वेपि तद्गणनेनातिदुष्टस्यातिविनीतसंपा
दनेन गुणगणशालित्वं नायिकायामावेद्यते ॥ ५२५ ॥ ॥

१४५

कस्यचिद्राज्ञ्यैरपसंपत्तिमालिनं कश्चिद्वर्ण्यो नृपावक्ति॥॥ यतत्यस्मात्तुलैर्मूलमार्द्रं प्रतिकां
डेतु जस्त्रमानि समंतात्फलातिशयः तत्तस्मात् हे बद दुन्मादं प्राप्नोषि तत्संगसंपर्कं पति
पाकमविचार्य एवं च यद्यपीदानीं संपत्तिभराड्म्बरत्स्फ्वमसि तथाप्येकतिपयैर्दिवसै
र्निर्मूलएवभविष्यसीतिद्योत्यते यद्वा कासांचित्संगत्यावामवस्तुनोन्मादहृत्शालिनं कश्चि
द्वक्ति एवं चैनात्संसंगत्यानवानिष्टमवश्यंभावीतिध्वन्यते॥५२६॥ काचित्कंचित
त्याह॥॥ मदनयुद्धविरामेप्रसन्ना पतेसरला नायिका यस्य नायकस्यांके निद्राति सः

यत्तूलमार्द्रस्वदकैः कृत्स्नमंगतिसर्वमरः पतितः कृमतन्मायसिवीचिपरि
चयपरिणाममविचिंत्य ५२६ यस्यांके सरसंगरविश्रांतिप्रां-- सखिस्व
पिति सवहतगुणाभिमानं मदनधनुर्वल्लिचोलस्त्व ५२७ यदिदानीं गंधमा
त्राहृसंतिसमच्छेदेपिदंतिन्यः किमपिमदपंकमलिनां [illegible] कपोलस्थलीं वहति ५२८

गुणानां कामकलाभिज्ञतादीनां पतेतं तूनं अभितः परिमाणं मन्मथधनुर्लनाच्छादन प
टत्वं अंगीकरोतु एवं च यः सुरतेनानंदसंवर्धको नायिकायाः स एव धन्यो गुणवान् नान्य इतिध्व
न्यते तेन चैनाहृष्टागुणोयलस्त्वेति॥५२७॥ कश्चित्कामकलाकलापाभिज्ञतामभिमानिनीं
कांचिद्वक्ति॥॥ मदिमदोदकपरिमलसजातीयपरिमलमात्रात् मात्रपदादितरगुणाव्यवच्छेदः
समच्छेदेपि अपिनासाधारणत्वमावेद्यते वाराणपो वसंति तदागजो मदपंकेन मलिनां मालि
न्यस्योपमासाधकस्य सत्वान्नात्र रूपकं कपोलस्थलीं किमिति वहति एवं च पुरुषार्थो वध्य

गो॰टी॰ कस्याश्चिद्विहर्तुं कश्चिद्वक्ति ॥ यत्र प्रकृतिनिष्पाण्डुपंक्तिः विकसितकुसुमसमूहा संजातमा
त्रा तत्र प्रकृतिपल्लीपतेस्तनया पीतं यद्वस्त्रं तत्प्रियं यस्याः एतादृशी संजाता एवं च पु
२४६ ष्पश्रेणिः पीतकुसुमसमूहपीतवसनतयाऽन्यैरलक्ष्यतया यथेच्छं विहर्तुं कामेयं संकेतं
146 निष्पद्यते ॥ ५२९ ॥ सखी नायिकां वक्ति ॥ हे कुसुमावचयकारिणि यमुनायास्तरंगैश्च
चलं कुवलयं तत्कुसुमतल्पं यदि सौरभ्यानुसारी झंकारकारकारी भ्रमरोऽनुभ्रमति एवं
च चपलतरत्वदीयनयनप्रतिबिम्बवाङ्कल्पाहिप्रायकुवलयस्तानाभावेन तद्ग्रहणा

यद्यवधिविहङ्गमात्राविकसितकुसुमोत्करा प्रसारश्रेणी ॥ पीतांशुकप्रियेयं तद्
वधिपल्लीपतेः पुत्री ॥ ५२९ ॥ यमुनातरंगतरलैं कुवलयं कुसुमतलाविनवस्तलभं तं४
यदि सौरभानुसारी झंकारी भ्रमति न भ्रमरः ॥ ५३० ॥ येषां रसिविनिहिता अपि भवं
ति न सखि समानसुखदुःखाः ॥ चित्रकरास्त एवाला एव जरापाण्डुभावेपि ॥ ५३१ ॥

भावएव तत्रस्मात् परं तत्कुवलयसौरभ्यलुब्धभ्रमरभ्रमणझंकारादिनाऽनज्ञानसंभवेन त
द्ग्रहणं न वहत्विति भावः एवं च नायिकायाः सौन्दर्यातिशयो द्योत्यते ॥ ५३० ॥ ॥ येषामत्यं
तलालनं स्वयं क्रियते परं तु ये न स्वसुखदुःखज्ञाता नरास्तेऽत्यंतं जडा इति कश्चित्कंचिद्वक्ति ॥
हे सखि मस्तके निहिता अपि ये समानसुखदुःखा न भवंति ते पुरुषाः केशा इव जरापाण्डुभावेपि
वार्द्धकेपि बालका एव एवं च येऽत्यंतं लालितास्ते यदि न सुखदुःखाभिज्ञास्तदा तेऽत्यंतं मू स्वं
ढा एव अतो न तदसत्कार्तव्यनयादृशःस्वं मंतव्यमिति व्यज्यते ॥ ५३१ ॥ ॥
२४६

एतत्कार्यायोग्यस्याप्यस्य प्रभुत्वेन कार्यं दत्तमिति कश्चित्कांचिदन्योक्त्या वक्ति ॥ यन्नियतं
गुणेन मौर्व्या पक्षे चातुर्यादिना शून्यं यन्न वंशजं वंशो वेणुः पक्षेऽन्वयः यच्च तपप
र्वं नित्यं विनाशि पक्षे नित्यं निर्वाणं विनाशी यस्मात् तदेव राजेनेंद्रेण देवराजपदेना
निवारणीयत्वमावेद्यते कोदंडस्थाने स्थापितं तत्र वयं किं कुर्मः एवं चैतादृशस्याधि
कारदानानौचित्येपि प्रभुणा स्वमत्याहृतत्वान्नास्माकमपराध इति ध्वन्यते ॥ ५१ ॥
एकस्यामासक्तमन्यस्यामनासक्तं नायकं काचिद्वक्ति ॥ यादक्षिणानुकूलान्वयीति भावः
असांत्वमदक्षिणः अननुकूलः पक्षे दक्षिणदिक्संस्थायाः दक्षिणदिक्संस्थानेत्यर्थः

यन्नियतनिर्गुणं यन्न वंशजं यच्च नित्यनिर्वाणम् ॥ किं कुर्मस्तन्निहितं धनुः पदे देव
राजेन ॥ ५२ ॥ यादक्षिणत्वमस्यामदक्षिणो दक्षिणास्तदितरस्याम् जलधिरिव
मध्यसंस्थो न वेलयोः सदृशमाचरसि ॥ ५३ ॥ युगपज्जवनो[illegible]तपिधानविधु
रेत्रपास्मितार्द्रमुखि ॥ लीलाक्षि नैष पवनो विरमति तनवसनपरिवर्ती ॥ ५४ ॥ ॥

तदितरस्यां दक्षिणोनुकूलः पक्षे अपरदिक्संस्थायामित्यर्थः किमेतावतेत्यत आह मध्यसं
स्थः सन् उभयत्र समानपक्षपाती पक्षे मध्यदेशस्थः वेलयोर्जलधिरिव सदृशमाचरसि इलयो
रेकया जड इति विवायनेन तादृश्या विषमाचरणमतस्योचितं न तव विदग्धस्येति ध्वन्यते यो विकल्पमि
दमर्थं मंतुलं पश्यतीप्राप्तिनिविलंभवदृशः आत्मपक्षपरिपूरिते जगत्यस्य नित्यसंविन्नः कुतो भय
मित्यत्रेवाग्रदृष्टं श्राद्धस्य न ब्रह्मार्थकता ॥ ५५ ॥ नायं नायकस्यामुपभोगं विनात्यक्ष्यतीति कांचित्का
चिद्वक्ति ॥ एककालं जघनोरस्तनसमयदाच्छादनं तेन संहदेलज्जास्मिताभ्यां स्निग्धवदने आर्द्रपदेन

गो॰टी॰ ९८ 157

अपकारकारकाणामपि सन्निसमपेक्षणमयमेवेति कश्चित्कंचिदन्योऽन्यावक्ति ॥ ॥ यद्यपि पर्व

तैर्बद्धः यद्यपि पर्वतनकरणाकमन्थनेनापहृतसर्वस्वः तथापि परं द्रस्ततोभीताये पर्वता

स्तद्रक्षणेऽजलधिर्दीक्षितः क्षतनियमहृत्पर्थः जलधिरित्यनेन निकटवर्त्तिसमीचीनाभावेऽ

पि स्वत एवैनाऽहश्चाचरणकारित्वयाऽतिमहत्त्वमावेद्यते अत्र नवीकरणमनुचितमित्या

भाति ॥ ५३५ ॥ ॥ यत्र याहृष्टोनमेन दृष्टासि तत्र नाहृष्टो नैव तेनाप्यपि स्थीयत इति हृतीना

यिकांवक्ति ॥ ॥ यस्मादिति प्रियस्य हस्तस्पर्शा शाखामागम्य अन्नतग्रीवं यथा चंद्ररेखा दृष्टा तथा तेनैव प्र

यद्यपि बद्धः शैलैर्यद्यपि तिमिमथनमुषितसर्वस्वः ॥ तदपि परभीतभूभृद्रक्षायां दी

क्षितो जलधिः ॥ ५३५ ॥ यस्यां दिशि प्रियस्य नरोऽर्पणानन्तुङ्गितावा यथोन्नतग्रीवम् ॥ दृष्टास

को॰८२ धांशुरेखा निशां चैरस्तां ध्यानयति ॥ ५३६ ॥ यत्रार्जवेन लवविमागविमाणेवक्रता ।

तनुते ॥ छन्दःशास्त्रइवास्मिंल्लोके सरलः सखे किमस्ति ॥ ५३७ ॥ ॥

कारेणाच कोरो निशामतिवाहयति स्वधांशुलेखित्यनेनाह्लादकत्वमावेद्यते चकोरइत्यनेन तद

काधीनजीवनत्वमावेद्यते एवं चैनाऽदृशा स्यास्यापेक्षाकरणमनुचितं न वेति ध्वन्यते ॥ ५३६ ॥ ॥ सर

लतयानस्थेयमिति कश्चित्कंचिद्वक्ति ॥ ॥ यत्र यस्मिन्नार्जवेन सरलतयालघिमालाघवं तन्यते यत्र वक्रता

नागुरुत्वं तनुते छंदःशास्त्र इवास्मिंल्लोके हे सखे सरलः किमस्ति छंदःशास्त्रे लघुर्लेखाकारो गुरुर्वक्रा

कारो लिख्यत इति संप्रदायः ॥ ५३७ ॥ ॥ ॥ गहनान्तं सर्वर्त्तोऽधिष्ठितं स्तम्बपते त्वयि

श्रयति करिगाडदारणापटुस्वपौरुषे विनिमयस्तेः किम् ॥

कश्चित्कस्यचिदधिकारपदं निंदति ॥ ॥ यद्यपकारकारकं न यज्ञशणां न यत्प्रकश्चि
कोपं विस्तारयति गुरुणापि पदेन अधिकारेण श्रीपदेनैव रोगविशेषेण ज्वर
णेनैव किं कार्यं न किंचित्फलमिति भावः एवं च तदेवाधिकारपदं यद्यपका
रादिसंपादकमिति भावः ॥५३८॥ ॥ कश्चित्कंचिदन्योक्त्या वक्ति ॥ ॥ हे वृक्षपते ए
वं चान्येषां पोषकस्त्वमसीति योत्यते न वहति निश्चितं मानस्य परिमाणविशेष
स्य पद्मे प्रतिष्ठायाः अनुरूपो योग्यः इह वने कश्चिद्विटपी हृदः न निदाघेनाति

यत्नोपकारकं यन्न भूषणां यस्य कोपमाननुते ॥ गुरुणापि तेन कार्यं
पदेन किं श्रीपदेनैव ॥५३८॥ वृक्षपते न वकश्चिन्न हि मानस्यानुरूपः
इह विटपी ॥ श्रियदिनं निदाघदाघीयः कवलते छाया ॥५३९॥ यद्यपि चं
दनविटपी फलपुष्पविवर्जितः कृतो विधिना ॥ निजवपुषैव तथापि हि स

॥ पकारव्रज्या ॥ ॥

दीर्घं दिनं गमयति निश्चयेन तव छायायाः एवं च वक्तः तरकुटुंबपोषकस्य भवतो न क
श्चिद्योग्य आश्रयः समयोयं कठिनतरः सोयं यथा तथा निर्वाहनीय इति योत्यते ॥५३९
दैवात्संपदिहीनोप्ययमन्येषामुपकारक इति कश्चित्कंचिदन्योक्त्या वक्ति ॥ ॥ यद्यपि चं
दनशाखी दैवेन ब्रह्मणा वा फलपुष्परहितः कृतस्तथापि स्वशरीरमात्रेणान्येषां सं
तापं हरीकरोति एवं चैतादृशो न कश्चिदस्तीति ध्वन्यते अत्र सर्वत्र च पर्याये विटपीनि दि पदा
कपदं दानमुचितमित्याभाति ॥५४०॥ ॥ इति यकारव्रज्याव्याख्यासमाप्ता ॥ ॥ ॥

नायकगुणोत्कर्षेण नायिकायाः आत्यंतमुत्कर्ष इति काचित्कांचिद्वक्ति ॥ ॥ राज्याभिषेकजल
क्षालितमस्तकस्य श्रीकृष्णस्य वार्तास्तु सकलोत्कृष्टगुणवानित्यादिकास्तु सन्ती त्विति ।
शेषः गर्वाधिकतानिश्चलनेत्रा राधाचरणकमलं स्वीयमिति भावः पशुपति एताद्र(
शोप्ययं सर्वदा मत्प्रणतिप्रवण एवास्त्विति धियेति भावः ॥ ५४१ ॥ ॥ नायिकांविनाऽवर
स्थितिर्न स्वरवेदेति वक्त्रिवक्ति ॥ ॥ रतिकलहे कुपिता या कांता तया करांभ्यांयत्केशाकर्षणं
तेन संतुष्टो गृहनाथो यत्र यद्वा कांता हस्तायत्केशाकर्षणं यत्र तद्गृहनादिकमपि भवनं ।

राज्याभिषेकसलिलक्षालितमौलेः कथास्तु कृष्णस्य ॥ गर्वभरमन्थराक्षी
पशुपतिपदपंकजं राधा ॥ ५४१ ॥ रतिकलहकुपितकांताकरचिकुराक(
र्षतुष्टितगृहनाथम् ॥ भवतिभवनं तदन्यत्प्राग्वंशाः पर्णशाला वा ॥ ५४२ ॥
रोगी राजायत इति जनवादं सत्यमद्य कलयामि ॥ आरोग्यपूर्वकं त्वयि त(
ल्पोपांतागते सुभग ॥ ५४३ ॥ ॥

तद्भिन्नं प्रासादादिकमित्यर्थः प्राग्वंशाः पल्लीशाला प्राग्वं
शः प्राग्घविर्गेहादिष्यमरः पर्णशाला वा पर्णशालोटजोस्त्रियामित्यमरः तत्र रतेरभा
वादिति भावः ॥ ५४२ ॥ ॥ नायिकावैद्यं वक्ति ॥ ॥ हे सुभग त्वयि शयनीयसविधागमनवति स
ति रोगवान् राजवदाचरतीति राजायत इति लोकप्रवादं आरोग्यपूर्वकं सत्यं मिथ्यात्वभ्रान्त्य
श्च यकलयामि एवं चातिमहन्मभागपशालिन्यहं त्वद्दर्शनेनायसंहृन्नेति भावः एवं च मन्मुखं डं
स्वरूपं रोगं हरीकृत्य आनंदविशेषभागिन्यहं त्वया विधेयेति योत्पते छक्के इतिपाठे त्वयीत्यस्य

नायिका कांचित्प्रतिवक्ति ॥ सखीभीरुद्धः स्वरसस्य स्वाच्छंद्यस्य प्रसरो यस्य एवं रसो
जलं मम प्रीतेः अग्रे नतं प्रतिपादनार्थमिति भावः प्रियं प्रति निम्नं प्रति नीचदेशं प्रति स्रो
न स इव स्रोतोनुसरणं स्वतन्त्रतया प्रसरः हिमगलनावेगः आधिक्यं एतेन आसमंताद्वेगः एवं
च निरुद्धस्य जलस्य यथा अधिकं प्रवाहः प्रचलति तथा सखीभिर्निषिद्धायां मम प्रियं प्रति प्रे
माधिक्यं जायत इति भावः एवं च प्रियं प्रति प्रेमनिरोधो मम दुर्घट इति ध्वन्यते तेन च सख्यु

रुद्धस्वरसविलासप्रसरः स्यान्मनागतं प्रियं प्रति मे ॥ स्रोतस
इव निम्नं प्रति रागस्तस्य हिमगलनावेगः ॥ ५४४ ॥ रूपमि
दं कांतिरसावयमुत्कर्षः सुवर्णरचनेयम् ॥ दुर्गतमिलि
ताललिते भ्रमसि प्रतिमन्दिरद्वारम् ॥ ५४५ ॥

पदे पुनः उल्लंघनेन मम अपराध इति ॥ ५४४ ॥ काचित्कांचिद्वक्ति ॥ हे ललिते सुंदरि इदं रू
पं असौ कांतिः अयमुत्कर्षः इयं सुवर्णरचना एवं मूर्तिर्दरिद्रसहचारिणी अतः प्रति
गृहद्वारं भ्रमसि एवं चैतादृशानुरूपगुणालिन्वे दरिद्रसंगतिसंपादनमनुचितं उचितं भाग्यवत्सं
गतिसंपादनमिति ध्वन्यते ॥ यद्वा भिक्षुहस्तगतप्रतिमोद्देशवचनव्याजेन काचित्कांचि
द्वक्ति ॥ ललितेति प्रतिमानाम ॥ ५४५ ॥ जयति ललितालालनः क्लमः ॥ ॥ ॥ ॥

गो॰टी॰
५५

149

कश्चिदर्कं चिवक्ति ॥ ॥ निकुंजसंवंधिपत्रैः संपादिते भिक्षुकस्य पात्रे ऽन्नं दत्त्वा स्वहितं यथा स्यात्तथा
वध्वः पर्युषितमप्यन्नं अत्यंतं नीचतया येभ्यो सा स्तेरीखडसं चदाति संकेतनिकेतनिवेतना।
निकुंजपत्रछेदनेन संकेतस्थानविघटकतया हेषवन्नं [illegible]वत्ता भिभवत्वात् दत्तान्नदानं स्थाना।
विघटनडःखवशात्कूसेष्यलता यद्वा संकेते मया गत्वा परा हन्तमिति तत्तापनायानीतनिकुंज
पत्रपात्रमवलोक्य डःखवशात्कूसेष्यलता लोकगोपनाय चावतात्कस्थां पर्युषितान्नदानं
च ॥ ५४६ ॥ ॥ सखीनायिकांवक्ति ॥ ॥ हे सखि यो ऽलब्धः श्रेष्ठः पत्रे महान् निजस्थितिं न रक्षति

रचिते निकुंजपत्रैर्भिक्षुकपात्रे ददाति सा वृत्तम् ॥ पर्युषितमपि स्वनीचतया
स्वा सकडंस्वं वरमन्नम् ॥ ५४६ ॥ रक्षति न सखि निजस्थितिमलब्धः स्थापय
यति नायकः स यथा ॥ तिष्ठति तथैव तन्मणाविद्धे यहारयष्टिरिव ॥ ५४७ ॥

ति चांचल्यं नत्यजती स्वर्थः स नायकः कांतः पक्षे हारमध्यमणिः यथा स्थापयति तथैव न स्व
गुणौघात्नयादिभिः पक्षे गुणाः सूत्रैर्विद्धानुत्वन्नता सन्निमती पक्षे यथा कृतं इयं त्वत्यतिवे।
ष्टिनी हारयष्टिरिव तिष्ठति एवं च स न स्वकीयचांचल्यादिडःशीलं परित्यजति इयं तु न ज्ञातयो।
या स ज्ञानं मनस्कतयैव कालमतिवाहयतीति भावः एवं चैतादृशावस्थितिस्तवनोचितेति नायिकां
प्रत्यावेद्यते ॥ यद्वा यथा हारमध्यमणे गोष्ठांचल्ये पितृगुणाविद्धे यं हारलतानचांचल्यं विधत्ते न यथा त्वया
तद्गुणमात्रावलोकनादिना नचांचल्यमगणयित्वा निश्चलतया स्थेयमिति व्यज्यते तत्पर्यः यद्वा
सखी सखीं वक्ति हे सखि अलब्धः श्रेष्ठो यं नायिका निजस्थितिं न रक्षति स्वमर्यादां न विचारयति यथा

सखीनायिकांवक्ति॥ हे कृशांगि प्रथमं कौमारप्रभृति संजातप्रीतिमता पत्येवाऽगोलो।
हितं तेनैव नायकेनेति भावः चुंबितवदना रसालपल्लवेन मंगलकलशीव राजसि एवं
चान्यत्र न मनो बंधनीयमिति ध्वन्यते पत्या तेनैव निकटस्थितेनानेनेति भावः राजसि राजि
ष्यसि चिरकालीनेन संगतिर्नोचिता किंतु नवीनानुरागवत्संगतिरस्मिन्नोचितेति व्य
ज्यत इति व्याहृती नायिकां वक्ति॥५८॥ गुणावत्संगतिकरणमेवोचितमिति सखीनायिकां
वक्ति॥ रूपचरगुणाश्च नैर्हीनेन हार्यानत्संगतिमती रूपस्पोयोगुणास्तदभावताइर्तं(

राजसि कृशांगि मंगलकलशी सहकारपल्लवेनेव तेनैव चुंबितमुखी मध्य
माविर्भूतरागेण ५८ रूपगुणाहीनहार्याभवति लघुर्वायुधूतधूलिरिव प्रथ
यति गुरुगोप्यातरुणीनरगौवनारिमायाम् ५९ रागेनवे विजृंभितविरह
क्रममंदमंदाचे सस्मितमलज्जमीक्षितमिष्टमिष्टं सिद्धमाचष्टे ६० ॥

योगपातरुणो वायुचंचलाधूलिरिव लघुर्भवति प्रथवोगुणायस्तेनानेया पत्येम हत्म
गुणोः नौकेवगौरवं प्रथयति एवं चाचेतनेप्येवं गतिस्तत्र का वाग्मास्यचेतन इति भावः॥ अथ
सखी नायकं वक्ति॥ विरहक्रमेणामंदमंदावस्थाऽर्थात्र एतादृशे नवे रागे विजृंभति सति विजृं
भितेति विरहविशेषणम् इष्टं स्मितहासतलज्जासहितं विलोकनं इष्टं सिद्धं कथयति एवं चा
चिरमेवाऽनया सह संगमस्तव भावीति ध्वन्यते॥ ६० ॥ श्रीः॥ जगदानन्दविधानं बु
स्मधानं श्रियां निधानं नः॥ प्रणामानन्दधानं महः प्रसीदेत्तपः समाधानम्॥ १॥ श्रीः॥

कृते:

गो॰टी॰
९५॰
150

ऽपितनायिकां॰हतीवक्ति॥॥स्मः॰शृंगाराद्विः पद्मेजलं तहमीनां एवंचान्यासामन्याह॥
प्रीगानिरितिभावः रोषोपि अपिनावार्कश्यान्वाद्यो चिन्यमावेयते कठिनोवानचिर॥
कालावस्थायीवान दृष्टान्तमाह वर्षाणांपाषाणोपिकरकोतियावत अत्यंतकोमलः
स्वल्पकालावस्थायीच एवंचैतादृशानिश्चायितकोपकरणोरसवत्ताह्यानिस्वभवित्री॥
निष्पद्यते तेनचैतंपरिहृत्यप्रसन्नाभवेति॥५५२॥॥येनैतादृशांकोपादिकंभवतितद

रोषोपिरसवतीनांनकर्कशोवाचिरानुबंधीवा॥ वर्षाणामुपलोपिसु
स्निग्धःक्षणिकालकल्पश्च॥५५१॥रोदनमेतद्बहुंपसखिकिंबहुमत्सुरपिम
मानद्वयः॥स्वप्नेनेवहिविहितोनयनमनोहारिणानेन॥५५२॥रोषगौवम॥
यासखिवक्रोपिग्रंथिलोपिकठिनोपि॥कज्जनामनीयतायंसद्यःस्वेदेन
वपुरिव॥५५३॥॥

पेक्षाकरणमनुचितमितिवादिनीं सखींनायिकावक्ति॥॥हेसखि एतद्रोदनंसम्यक्
किंबहुवक्तव्यमित्यर्थः ममम॰णामपिसमीचीनं नयनमनःस्वाधीनतासंपादक
न पद्मेनयनमनोव्यापाराभावसंपादकेन स्वप्नेनेवतेननायकेनविहितः लिंगविप॥
रिणामेनरोदनेप्येतदन्वेति रोदनादिकंस्वप्नेसंभवतीति स्वप्नविवेचकाः स्वप्नेकेवलमनो॥
व्यापारस्यसत्वेपिनयनव्यापारविशिष्टस्यतस्याभावान्नात्रदोषः किन्तुतसैव्यपिपाठः
५५२॥॥नायिकासखींवक्ति॥॥हेसखि वक्रोपि ग्रंथिलोपिकठिनोपिअयंनायकःमयाक्रो॥

९५

सखीं नायिकां वक्ति ॥ इयं पितृप्रसूः सायंसंध्या रात्रिसमपने त्वं चंद्रसमीपं नेतुमारादु
पतस्थे स्वयं चंद्रं द्विष्टमिति द्विष्टं नायकमिव रंजयति रक्तरूपवत् पश्चादनुरागवन्तं करो
ति एवं च संध्यात्वेन जगद्वंद्यत्वेप्येतादृशोनुचितकार्यकारित्वं तत्र का वार्ता ऽन्यासा
मतः स्वयमेव नायकानुनयो विधेय इति ध्वन्यते ॥ ५५४ ॥ इति रकारव्रज्याव्याख्या ॥
अत्यंतपरांगनालंपटासिद्धमतिनायकासक्तां नायिकां काचिदन्योक्त्या वक्ति ॥ हे सु
स्निग्धे स्नेहवत्प्राधितिभावः उभयत्रवर्तिक्रूरवर्त्मनि वक्रो अथ च द्विष्टमार्गेषु
लिनि नायके लग्नासि न तत्संबंधभागिनी संहतासि हंत खिद्यसे स्थासि एवं च न विलंब इति

रजनीमियमपने त्वं पितृप्रसूः प्रथममुपतस्थे ॥ रंजयति स्वयमिंदुं जनायकं द्वि
ष्टमतीव ॥ ५५४ ॥ ॥ रकारव्रज्या ॥ ॥ लग्नासि क्रूरवर्त्मनि सुस्निग्धे हतवर्ति
न्यासि ॥ अयमखिलनयनसुभगो नभक्ष्मासांपुनः स्पृशति ॥ ५५५ ॥ ल
क्ष्मीः शिक्षयति गुणानमून् उदरीति विडंबयति ॥ ऊर्णाभवति सुकृतस्तु वारके चिर

भावः अथ दुःखभागिनी संहतासि यतः अयं सकलनयनस्पृहणीयः प्रकाशकत्वात् अ
थ च सौंदर्यादिगुणशालित्वात् एवं च नायिका सालभ्यमस्येति ध्वन्यते भोगोन स्पर्शितो
पुनर्न स्पृशति एवं चैतत्संगतिरनुचितेति ध्वन्यते ॥ ५५५ ॥ संपत्त्या गुणवन्तादारिद्र्यान्नट
भाववर्तिनीक श्चिद्वक्ति ॥ ॥ श्रीर्गुणान्तुपदिशति अमून् पुनर्दैर्भाग्यं दूरीकरोति अत्रा
र्थान्तरन्यासमाह पूर्णः सद्वलयश्चंद्रः सुवृत्तः समीचीनवर्तुलः अथ च समीचीनाचरणवान्
अपचये कलाविनाशे कुटिलः एवं च संपत्त्यर्जनमत्यंतावश्यकं तद्विरोधेन गुणार्जनं विधे

नायिकासखीवक्ति ॥३॥ हेसखि ऊर्णानाभतंतुपिहितद्वारः पुरंतःपल्लिगृहे यत्र शून्याल
यः तस्मिन्नायकेपथिकेदेशांतरस्थे सति वृत्तपिहितवदनो रोदितीव एवंचैतादृशोनतत्रो
द्रनिवारणाद्युपायजनकतयावश्यंविधेयत्वयेतिद्योत्यते तेनचतद्गमनोत्तरकालमा
रभ्यनकेनाप्यत्रसंगः संहृतः अतइदानीमन्यनायकमानयेतिध्वन्यते ॥५५७॥ काश्चित्
कंचिद्वक्ति ॥३॥ समीचीनविस्तीर्णकलितांगीकृता तज्जन्यनामिकेयुक्तेमध्यमास्या हृदि

लूतातंतुनिरुद्धद्वारः शून्यालयेपतत्यनगाः ॥ पथिकेतस्मिंश्चलपिहितमु
खोरोदितीवसखि ॥५५७॥ लग्नंजघनेनस्याः सुविशालेकलितकरिकरक्री
डे ॥ वप्रेसकंद्विपमिवशृंगारस्त्वांविस्मरयति ॥५५८॥ लिसनमुखंनागंन
पततीनचरणाः परागेण ॥ अस्यास्तनेवनलिन्याविदग्धमधुपेनमधुपीतम्
॥५५९॥

कृता करिहस्तः सम्यग्दृष्टः कामप्रयासु विशारदैरित्यनेनतल्लक्षणालक्षितस्यकरिकरस्यक्रीडि
येनतस्मिन् पद्मीकृतगजशुंडाकेलौ तस्याजघनेलग्नत्वांशृंगारः वप्रेसकंगजमिवविश्रो
भेणाभूषयति भूषयिष्यति एवंचैतादृशमेवसर्वदाकुर्वितिध्वन्यते द्यर्थैः पदैः पिशुनये
त्तरहस्यवस्त्वितिकामशास्त्रात्अत्रसुरतारंभगोष्ठीवत्कलितकरिकरक्रीडइत्यर्थस्य पद्मीडादाय
त्वेनाश्लीलत्वंनतत्त्वदूषणत्वम् ॥५५८॥ यस्यानकस्यापिशक्तालंभवति तस्यानेनेधंभृंगकेलिका
चित्कंचिद्वन्योक्त्यावक्ति ॥३॥ परागेणावहतंतंलिंगं इदमग्रेप्यन्वेति लिंगवचनपरिणामेनमु
खं नपततीनचरणाः न स्पर्शमकुर्वन्नेवचत्वरमधुपेन मधुपपदेनोन्मादप्राधान्यमावेद्यते

मनयैवलब्धुंशक्यइतिव्यज्यते ॥५५९॥

नलिन्याः मधुपीतं नलिन्याइत्यनेन नायिकायांपद्मि
नीत्वमावेद्यते तेनचदुर्लभत्वं एवंचैतस्याः सगोत्रिग

नायकोहंनीवक्ति॥॥ नस्मान्नघनेलग्नंननखचिह्नं ममममानसंचस्पृशति मानसपदेनमृगाक्षी
भावानहेहंखेपिनद्भवनेनविरहेवडवानलतत्वमावेद्यते तेनचडुःसहत्वंमृगाक्षीभा
वेण्णुभयोर्वैलक्षण्यमाह भुक्तंहद्दिप्सन्नं अविषादमप्रकटं यद्दानविद्यतेविषादंयस्मा
त् चिरकालीननतयालोहित्यापगमेनश्वेतमित्यर्थः अवेदनंवेदनारहितमिदंममभा॥
नसमित्यर्थः अधिकंहद्दिमत् जघनेत्यंतासक्तमितिभावः सरागंप्रीतिमत् साबाधंपी
डासहितं एवंचयथानयासत्वरसंभोगोभवतितथायतस्वेतिध्वन्यते॥५८॥ बहुंगना

लग्नंजघनेनस्माःस्पृशतिनखलक्ष्ममानसंममच॥भुक्तमऽविषाद
मवेदनमिदमऽधिकसरागसाबाधम्॥५९॥लज्जयितुमऽखिलगोपी
निपीतमनसंमधुद्विषंराधा॥॥

लंपटनायकनायिकामेवंरीत्यान्वयानायकोवाच्यइतिसखीमुपदिशति॥॥ समग्रगोपी॥
नांनितरांपीतंस्वाधीनीकृतंमनोयेनतं नितरामित्यनेनगोपीमनसोन्यविषयसंबंधाभा॥
वं४ वोव्यज्यते मधुद्विषं एवंचोन्मादस्मरन्पोध्वन्यते लज्जयितुंलज्जांप्रापयितुंराधाऽहेव द
यिताईनतहस्पर्शाभोःसुखजनकस्पकृष्णांगच्छति एवंचसर्वदाकामबाधाशालिनःका
मिनीसुखसंपादकस्यमहादेवस्यनायिकाईनवहिः नवतनननथेनिनिर्लज्जत्वमसीतियोग्यते
एवंचयथाराधयान्यवार्तयाश्रीकृसंप्रत्यनुचितंत्वयाविधीयतइत्युक्तं तथान्वयापिस्वनायकंप्रति

गो॰टी॰ १५२

152

यद्वा लङ्घयित्वमं श्यामाङ्गोपीसमूहं निखिलगोपीभिर्मिलिताभिर्निपीतं स्वीकृतं मनो यस्य तं मा-
धुर्दिव्यं दयिताङ्गतत्वस्य शंभोः कथां पृच्छति एवं च यत्र दयिताङ्गमेव नायकस्तु स्वसंपादकत-
यान्नमनोवशीकरणसमर्थं तत्र किमु वाच्यं नायिका जातमिति भावः अथवा निपीतं म-
नो यासां ता न तथाभिवित्यर्थः एवं च गुणविशेषवत्तालितया हरनिरूपितप्रेमवत्तया शिवया
स्वस्याङ्गेनापि नायकः संतोष्य स्वाधीनतां नीतः भवतीभिश्च सर्वाभिर्मधुद्विट् न स्वाधीनीकृ-

अद्वैव पृच्छति कथां शंभोर्दयिताङ्गतत्वस्य ॥ ५८१ ॥ ॥
लक्ष्मीनिःश्वासानलपिण्डीकृतदुग्धजलधिसारभुजः ॥
क्षीरनिधितीरसदनाय शांसि गायन्ति राधायाः ॥ ५८२ ॥

तदिति भवन्मोगुणविहीनतया नतन्निरूपितप्रेमवत्त्व इति व्यज्यते एवं च गोपीपद्मस्यापि
चातुर्याभावप्रतिपादनेनार्थवत्त्व ॥ ५८१ ॥ ॥ सपत्नीसत्त्वमप्यन्तासह्यमिति काचित्कांचिद्वक्ति ॥
लक्ष्म्या निःश्वासानिलैः परमेश्वरस्य राधायातिसन्तोषध्यैयो सेवितिभावः गाढीकृतदुग्ध-
जलधिसारभोजनवत्यः क्षीरनिधितीरवसतिशालिन्यो नायिकाः राधाया यशांसि गा-
यन्ति यत्प्रसादादेवमस्माभिर्भुज्यत इति धियेति भावः एवं च यत्र लक्ष्म्या अप्येवं सपत्नी-
दुःखं तत्र किमु वाच्यमस्मासामिति व्यज्यते ५८२ ॥ श्रीराधाकृष्णायनमः ॥

१५

कश्चित्कंचिद्वक्ति ॥ केलिसदनस्य बहिः सखीषु सतीषु मयि चरणानतिश्चोऽप्रणतिकारि-
णि चरणानतिष्ठावित्यनेन प्रसादपात्रत्वं ध्वन्यते प्रियया गवाक्षे व्यजनं दत्त्वा प्रसादः प्र-
कटीकृतः व्यजनपरित्यागेन संतापनिवृत्तिप्रदर्शनेन प्रसादः प्रकटीकृत इति भावः ।
यद्वा गवाक्षे व्यजनस्थापनेनात्मानवलोकनीयत्वप्रदर्शनेन यथेष्टं स्मरत विद्याभाव-
दोनतनात्प्रसादप्रकटनमिति भावः यद्वा केलिसदनस्य बहिः सखीविषये प्रणति-
कारिणि मयि प्रियया वातायने व्यजनं दत्त्वा प्रसादः प्रकटीकृतः उपितेयं कदाचिद्वा

लीलागारस्य बहिः सखिषु चरणानतिष्ठो मयि प्रियया ॥ प्रक-
टीकृतः प्रसादो दत्त्वा वातायने व्यजनम् ॥ ५८३ ॥ लकारबन्धः ॥

त्वद्वातानर्जयिष्यतीति भीतः सखीप्रसादनां विहाय यदि गतस्तदा नाभिर्मन्त्रार्थिनायाश्च-
करणे मानापरित्यागेन नायकक्लेशो भविनेति यथेष्टमयं सखीप्रसादनां करोतु नास्त्यस्मदी-
यप्रसादमिति प्रसादाविष्करणमिति भावः अथवा गवाक्षे व्यजनसंस्थापनेन समीर-
णजनकस्यापि समीरणनिवारकत्वं यथा तथाङ्गः स्वजनं स्थापितवद्धः स्वनिवारकाव- कं
मिति प्रदर्शनेन प्रसादाविष्कार इति भावः एवं चैतस्या यथा चातुर्येण तथाऽन्या-
सामिति ध्वन्यते ॥ ५८३ ॥ लकारबन्धः ॥

सर्वगोपनपरः सरमनेनेयंभुक्तेति काचित्कंचित्प्रकारांतरेणावक्ति ॥ ललाटेवर्णास्य
मकरिकादेः इतिर्न अंगसयपिनम्लानं अधरेदंशोपिन अर्थान्नायिकायाः उपाय
निपुणेनउत्पलं हृतं जलं चनस्पृष्टं एवंचसहचरीभिरपिनज्ञातमितिभावः ना
यिकायाः परकीयात्वात्संभोगचिह्नानुत्पादनपरः सरं भुक्तेयमनेनेतिभावः एवंच

वर्णा इतिर्न ललाटेन लुलितमंगं नचाधरे दष्टः ॥ उत्पल
महारिवारि चनस्पृष्टमुपायचतुरेण ॥ ५६४ ॥ बाल
बिचूर्णाकुन्तलचुम्बितनयनांचले मुक्ताविनस्याः ॥ बाष्प
जलबिंदवोऽलकमुक्ता इव पान्थ निपतन्ति ॥ ५६५ ॥

यद्येनाहृष्टाचान्तर्यन्तव तर्हि परकीयाभीरतिर्विधेयेतिध्वन्यते ॥ ५६६ ॥ दूतीपांथंप्रति
वक्ति ॥ हेपान्थ तस्याःवदने विभ्रमेबालालंबिनोयेचूर्णाङ्कुंतलास्तैश्चुंबितनयनप्रांतेसति अ
लकसंबंधिमुक्ताफलानीव बाष्पोदकबिंदवः जलपूरेनाधिक्यं व्यज्यते निपतन्ति एवं
चत्वयात्वयासमागंतव्यमितिध्वन्यते ॥ ५६७ ॥

साखीनायकं वक्ति ॥ हे निपुण एवं च यथा कश्चिद्दर्शनेन कलाविहीनत्व।
मेतस्यां त्वया नाशंकनीयमिति व्यज्यते असौ नायिका दिवसे विनयनम्रा।
रात्रौ मदनकलाविलासैः लसदंगी निर्वाणाज्ज्वलितौषधिरिव प्रत्यभिमतेया।
एवं च यथा काचिदौषधी दिवा सौम्या रात्रौ प्रज्वलति तथेयं दिवसे ऽतिसौ।
म्या रात्रौ तु मदनकलोत्कुशला अतो नैतत्कालीनेन तस्याः सौम्यत्वमाशंक्य
विरतिर्विधेयेति ध्वन्यते यद्वेयमत्यंतविनयशालिनीति तत्परपुरुषाभिला

विनयवतीनिनाद्दिने सो निशि मदनकलाविलासलसदंगी ॥
निर्वाणाज्ज्वलितौषधिरिव निपुण प्रत्यभिमतेया ॥५६६॥ विहि।
तबहुमानमौना सखीप्रबोधैर्यदल्पमातनुते ॥ रागार्तिकात्त
याज्ञा लघुवीर्या रहसि पुनरेषा ॥५६७॥

षिणीति मन्यमानं वयस्यो वक्ति निपुणैः प्रत्यभिमतेया एवं च सर्वाणामियं
सौम्येति ज्ञानं न निपुणानामिति भावः ॥५६६॥ साखीनायकं वक्ति ॥ विहितबहु
मानेन मौनं यया सखीनां प्रबोधनैर्यदल्पमश्रुमानन्तते एषा पुनरेकान्ते रागेण
आर्तिदीनवचनं प्रार्थना एतैर्लघुवीर्या एवं चाधुनेयमेतादृग्मानशालिनी दृश्यप
ते परं रहसि रागजनितपीडादिभिः स्वयमेव स्वहस्तगता वशंवदभविष्यतीति ध्वन्यते।

गो॰ टी॰
१५४

154

स्वाधीनायकं वक्ति ॥ स्वनायिकायामनासक्तं कांचिद्वक्ति ॥ मदनबाणभिन्नापल्ली
यं एकं शरणं रक्षणकर्तारं वांछति तस्य तवच्छायेव स्वांगनापि भयस्थानं विष
मशरेत्यनेन दुःसहत्वं ध्वन्यते पल्लीयमेकस्मिन्ननेन मदनातिशायशालित्वमा
वेद्यते छायेवेत्यनेन सर्वदा सेवाप्रवणत्वं नायिकायामावेद्यते एवं चैतादृशा
चरणमनुचितमिति व्यज्यते यद्वा हृती स्वनायिकासंकोचशालिनं नायकं वक्ति

विषमशरविशिखभिन्ना पल्लीयं शरणमेकमभिलषति तस्य तव
च्छायेव स्वीयाजायापि भयभूमिः ५६८ विविधायुधव्रणार्त्तिद
विषमे वक्षःस्थले प्रियतमस्य श्रीरपि वीरवधूरपि गर्वोत्पुलका
सुखं स्वपिति ५६९

विषमेति एवं च स्वाधीनायाः स्वनायिकायाः सत्वकाभीतिरनश्वलसंके
तंघ्नतीति व्यज्यते ॥ ५६८ ॥ ॥ पराक्रमशालिनि नायके श्रीर्नायिका चात्यन्तमासक्ता
भवतीति कांचित्कंचिद्वक्ति ॥ नानाप्रकारकायुधानां ये व्रणास्तेषां मर्दुहैर्मांसकी
लैः शर्वदो मांसकीले स्यात्संख्यामभेदे च कीर्तितः कठिने नायकस्य वक्षःस्थले
गर्वोल्लकृष्टपुलकालक्ष्मीर्वीरस्त्री च सुखं विनिद्राति एवं चापराक्रमशालीनो
भयस्नेहभाजनं भवतीति भावः ५६९ ॥ श्रीकृष्णायनमः ॥

क्षान्तनायिकान्तरोपभोगे निभृतः पृष्ठतः सुप्तं नायकं नायिका वक्ति ॥ हे प्रिय एवं चैतेनाह
प्राकर्णं व्यतयानि दुःखदत्वमित्यावेद्यते अन्यायपुङ्खकारिणो मदनस्य वैमुख्ये
पि पराङ्मुखत्वेऽपि विशिखेषाणां मुक्ता उपसर्गाणामिति भेदकत्वं ध्वन्यते बाणाः पृष्ठ
संलग्ना स्तव श्वासा मम हृदयं भिंदन्ति वितनो इत्यनेन स्वरतातिशयेन हीणा
कृतिकत्वं नायके ध्वन्यते एवं च कृतापराधस्य तव तावत्र स्वापो न मम तु दुःखदत्वमिति
ध्वन्यते यद्वा कृतकनिद्रया नायिकां वंचयित्वान्यत्र गन्तुकामं नायकं नायिका
वक्ति वैमुख्येऽपि त्वदीय शरीरशीलस्पृष्टत्वादिति भावः एवं च श्वासैर्मत्स्वापरता ।

वैमुख्येऽपि विमुक्ताः शरा इवान्यायियोधिनो वितनोः ॥ भिंदन्ति पृष्ठ
पतिताः प्रिय हृदयं मम तव श्वासाः ॥५७॥ मत्कमधुना समेतः
खंडो मदिरादि दशनवसनेते ॥

नोऽन्तरमिमं स्वपिषि तिततोऽन्यत्र मयायान्त्वमिति किमर्थं कोपः स्वैरं च यत्र स्थित यथेच्छं ।
गच्छेति ध्वन्यते ॥५७॥ कश्चित्कांचिद्वक्ति ॥ हे मदिराक्षि एवं च कटाक्षविक्षेपमात्रेण
मोहजनकत्वं व्यज्यते नवदशनवसनेऽोष्ठे खंडः समेतो लग्नः इत्यधुनाऽपकटी कं ४
भूतं एवं च पूर्वं किमपि नोक्तवती अधुना तु मधुरवचनमभिधत्से इति भावः
यद्वा कर्कशत्वं व्यक्तं स्फुटेत्वच्छेच यन्मधुमादिकं तत्समेतः खंडः अस्ति ।
अध्याहारः एवं चातिमाधुर्यमस्तीति व्यज्यते ॥

गी. टी.
१५५
155

हेलोभिनि एवंच सर्वसंग्रहकारित्वं ध्वन्यते नूतनसुधैकसारं यत् तत्किमपि नाघ्रातं न
दृष्टवान् अथच घ्राताघ्रात्मनृत्यन एवंच केवलं मधुरं वदसि वाटाद्वयसिच न पुनश्चुंबना
दिना मां जीवयसीति ध्वन्यते यद्वाऽधुना चुंबनाकालेन वाधरे खंडः समेत दूतिस्फुरत्ता
नं यन्नवसुधैकसारं अमृत अं भक्ष्यं ऊर्ध्वमंडलं तत्किमपीषदपि नाघ्रातं एवंच चुंबनवे।
लायां घ्राणीं कुच स्पर्शोपि देयः इत्यावेद्यते यद्वा मदिरादि असमेऽत्र तलेन धरेय यसात
खंडनं खंडः दंत न तं स्फुटमधुनाद्दष्टोऽतो हे ताहं लोभिनि एवंच गोपनकर्तृत्वमावेद्यते
यद्वा अपलोभनकारिणीति दष्टानवसनविशेषणं एवंच चुंबनयोग्यत्वं ध्वन्यते यत्किमप्यऽ
निर्वचनीयं वसुधायां सुखसारभूतं न न घ्रातमपि त्वद्धातमित्यर्थः एवंच सदंतता।

यन्नवसुधैकसारं लोभिनि यन्न त्किमऽपि नाऽघ्रातम् ॥ ५८ ॥

त्वदधरदर्शनेन समागाध्वसुमतीव तिमुखसारवस्तुदर्शनजं सुखं जानामि निभावदतिक
टाद्यपि न संगोष्याभावीति चिंतयंत्याः करुणाश्रि इत्युक्तिः यद्वा किमपि विविक्तकुसुमाकरराणां
नवसुधा नृतुनत्वमेकं सारं यस्मिन्नेतादृशं यत्तन्नमंडलं तन्नाघ्रातं इतरत्समं एवंच त्व
दीयदर्यितसंगसुखेन सुखं मम जातं एवमेव त्वत्प्रसवेनापि तत्कदाभावीत्यावेद्यत इति ना।
यद्वा=
यिकाप्रसवाकांक्षिणा उक्तिः [illegible] हेमदिराहि तवाधरे समेनोलग्नः खंडः दमऽधुनाक्रांकं नि
श्चितमित्यर्थः यद्वसुधैकसारं नापि त्रिभुवनासारमित्यर्थः तत्किमपि लोभिनि नापश्यं
एवं चेदानीं ननायच्चुंबनेनाधरमाधुर्यं विज्ञातं परं त्रिभुवनसारभूतस्त्वत्तेन किं न मां सुख।
यसीति व्यज्यते अथच यद्वसुधैकसारं किमपि तन्न नघ्रातं अर्थात्त्वयि अपि तु सर्वमपि र
दृष्टवानसीत्यर्थः एवंच मदिरामाक्षिकशर्करासुधाद्राक्षामधुरवस्तूनां त्वयि सत्त्वेपि लोभव

नायकः साचार्यवक्ति ॥ हे वयस्य अप्रभवन् असमर्थः प्राथमिककांताधीनत्वादि
तिभावः बालायाविलासबंधान्सर्वं चिंतयन्स्थितः प्राथमिककांताधीनेनम
याकथमियं विलासविशेषशालिनी भोक्तव्येति चिंतावान्संजातइतिभावः अथ
नात्सन्मानरहितां द्वितीयकामिन्याः प्राबल्यादितिभावः गृहिणीमेवानुशोचा
मि गृहिणीमित्यनेनसानार्हत्वेपितस्करणेनानौचितीद्योत्यते एवंचयस्याभयेन
सर्वं किमपिकर्तुमशक्तः तस्मादिदानीमेमाहग्गतिः संवृत्तेतिभावः एवंचसर्वमिदा
नीमपिनमांचिंतापरित्यजतीतिध्वन्यते ॥ यद्वा बालायाअप्रगल्भेमनसि विलासबं

बालाविलासबंधानप्रभवन्मनसि चिंतयन्सर्वम् ॥ सन्मानवर्जितां
तां गृहिणीमेवानुशोचामि ॥ ५२ ॥ वीजयतोरन्योन्यंयूनोर्विधुना
निसकलगात्राणि ॥ सन्मैत्रीवश्रोणीपरं निदाघेपि न विघटिता ॥ ५३ ॥

धांश्चिंतयन्नहं सर्वं प्रतिष्ठावर्जितां गृहिणीमेवानुशोचामि एवंचाप्रगल्भवयस्या
नयैताहशाविलासैर्हतचित्तः संवृत्तः किंपुनरग्रेऽनयाविधेयमितिभावः सर्वंगृहिणी
मेवानुशोचामीत्यनेन बालाविलासासक्तचित्ततया स्वात्मनः परतंत्रतयाशोच्य
त्वेपिमदीयैताहशावस्थामालोच्य गृहिण्याः समधिकंदुःखोद्रेकोभवितेति तद्विषयए
वानुशोचनमस्यमापतितमिति व्यज्यते ॥ ५२ ॥ मन्मथव्यथातोऽन्यद्दुःखमात्रंतत्रनास्तीति
एवहमिति कश्चिद्वक्ति ॥ परस्परं वीजयतोर्यूनोः समग्रावयवविभागवंतः संक्षमाः परं
केवलंश्रोणीसन्मैत्रीवनिदाघेपिक्षणमपिनाव्यपविघटनार्हत्वेद्योत्यते नविघटितानिदा

शृंगारतिलकटी ॥ ५४ ॥

गो·टी·
१५६
156

अपतिरपसार्यतामिति हृतीकांचिद्गृहपतिरेखावक्ति ॥ मानवत्याः विघ्रिष्टकोपं
दिवः अंधकारं कलमभूमेः कासवंमहिषं नलिन्याः निरुद्धंभ्रमरं च प्रात:(
कालीनसंध्याऽपसारयति एवंच प्रातःकालः संहृत्तोऽतो यथा रीत्या आनी(
तोयं तथैव रीत्या नेयमिति ध्वन्यते संध्यापदेन यथायोगसंपादनसामर्थ्येन

आरोषं मानिन्यास्तमो दिवः कासरं कलमभूमेः ॥ बद्धमलिं च नलि(
न्याः प्रभातसंध्याऽपसारयति ॥ ५७४ ॥ वक्षसि विजृंभमाणो स्तन
भिन्नं त्रुटति निकंचुकं तस्याः ॥ एवं दयितानुरागस्तव हृदि न मनाग
पित्रुटति ॥ ५७५ ॥

थाऽपसारणसामर्थ्यमस्याऽप्यपेक्षितमिति ध्वन्यते ॥ ५७४ ॥ नायिकासखीना
यकं वक्ति ॥ वक्षसि विजृंभमाणो स्तनौन्नत्यशालिनि स्तनभिन्नं कर्पासकंत
स्याः त्रुटति तव हृदि प्रथमप्रियाप्रीतिः ईषदपि न त्रुटति एवं
चैतस्यास्तारुण्यापाद्रेकेपि तव नासक्तिस्तदा त्वत्सदृशो न कोपि जड
इति ध्वन्यते ॥ ५७५ ॥

१५६

५६

नायिकासखीनायकं वक्ति ॥ तदस्यां तन्नायिकाभिन्नां व्यक्तिं मवेह्मि तस्यामेव त्वमासक्त इति द्यो-
तः इति ख्यातं एवं च पूर्वं सामीप्यमपि मया दृष्टैव तदानीं निवेदतस्यामुना प्रत्यादिना तस्यामेव प्री-
तिरभूदिति विज्ञातमिति भावः अधुना तु गृहद्वारसेवं पिपासितः मुखमिव त्वामुभयोः साधारणां
जानामि एवं चेदानीं त्वमुभयत्र समबुद्धिः विन्यस्य स्थिरप्रकृतिकात्वं नायकोऽध्यस्यते व्यजनस्येव संता-
पापनोदकस्य भवतः समीपे अवीत्येति पाठे तदस्यां प्रणयमभिन्नां नायिकां अवीत्य तस्यामेवास-
क्त इति भावः विदितं अधुना तु हर्म्यद्वारिमुखमिवोभयोः साधारणां वेद्मि एवं च यावत्पर्यन्तमुभ-
योर्न दर्शनं संपन्नं तावदस्मादृशी बुद्धिः स्थितेति भावः ॥ ५७६ ॥ नायिकासखी नायकं वक्ति ॥

व्यक्तिमवेह्मि तदस्यां तस्यामेवेति विदितमधुना तु ॥ हर्म्यद्वारिमुखमिव त्वा-
मुभयोः साधारणं वेद्मि ॥ ५७६ ॥ व्यजनस्येव समीपे गतागतैस्तापहारिणो भ-
वतः ॥ अंचलमिव चंचलतां मम सख्याः प्रापितं चेतः ॥ ५७७ ॥

व्यजनस्येव संतापापनोदकस्य भवतः समीपे अर्थान्नायिकायाः गमनागमनैर्वस्त्र-
प्रान्तमिव मम सख्याश्चित्तं चाचल्यमापितं एवं च त्वयैव गमनागमनादिना सक्तिमुत्पाद्येदानीमु-
दासीनवृत्तेऽपि स्वं क्रियतामुपयुक्तं नवेत्यत स्वस्वतदर्शनायेति ध्वन्यते पक्षे व्यजनस्येव तापहारि-
णः समीपे नायिकाया इति भावः भवतो गतागतैः एवं च लोकभीत्या कदाचन वीक्षणाभावो व्य-
ज्यते सख्या अंचलमिव मम चेतोऽञ्चलतामापितं एवं च मानमपनयापनोदक भवदीय स्वसवि-
धगतागतसंजातानुरागा जनितहेलावशात्कंपनपसाद्विकभावोदयवशाद्यस्याः सख्याश्च-
ञ्चलेऽञ्चलतां नयामास न च हिकयारीत्या ह्वानयोः संगमः संपादनीय इति चाचल्यमरुदेभ

॥ ११२ ॥

नायकोनायिकांवक्ति॥ हेहकृशांगि अंतः रसंप्रीतिं विनिरंतीममार्द्रभावंतनोषि यतस्त्वं
स्माद्ंतर्जलानदीवबहिरदृश्यापि निवससि ममहृदीतिभावः एवंचबहिरस्त्वद्विषयक
प्रेमाभावेप्यंतरंप्रेममममानितरामस्तीत्वद्विषयकमित्यावेद्यते॥५७॥ चिरतरकृतया
दुर्वचनादिरचनेप्यवधीरणाकृतकृतकस्वापंनायकमनुतापवशाद्दानेनप्रेषितापिहूतीनायिकांवक्ति॥ कृतानेकसांत्वनेपिमानोद्भतयात्वयाऽवगणितोऽभिमानशाली एवं
चप्रसादनासंपादनाविरमणो चिन्त्यमावेद्यते जाग्रदेवनिद्रावान्प्रबोधंकुतोलभते

विनिरंतीरसमंतर्ममार्द्रभावंतनोषितनुगात्रि॥ अंतःसलिलासरिदिवनि
वससिबहिरदृश्यापि॥५७॥ विहितविविधानुबंधेमानोन्नतयावधीरितोमा
नी॥ लभतेकुतःप्रबोधंसजागरित्वैवनिद्राणः॥५८॥ व्रीडाविमुखीवीतस्ने
हामाधांककाकुवाङ्मधुरे॥ प्रेमार्द्रसापराधांदिपनिंदयांवल्लभेबाला॥५९॥

नकुतोपीत्यर्थः एवंचैनादृशानायकावधीरणाकरणमनुचितमितिध्वन्यते॥५८॥
काचित्कांचिद्वक्ति॥ लज्जयापराङ्मुखवदनां अर्थान्नायिकां गतस्नेहामाधांक्य चाटुवच
नमधुरेनायकेबाला एवंचलज्जयानामितंवदनंनकोपेनेतिवदनरचनाप्रागल्भ्य
स्फूर्त्यंव्यज्यते प्रेमार्द्रामपराधेनसहितामऽपराधजन्यविलक्षपवती लज्जयापि
वैमुख्यकरणांमदपराधएवेतिधियेतिभावः हर्षिकरोति एवंचबालायाअप्यवगति
स्तवनप्रागल्भायावैमुख्यकरणकथनानौचितीमावहेदितिभावः ५८॥

१५७

कश्चित्कंचिद्वक्ति॥॥बाष्पव्याकुलंयथाभवतितथागेहिनिनिवर्तस्वकांतगच्छयतिमुक्तप्र
लापवतोः यद्वापरस्परमाध्यकरणेनानर्थकतयाहथावदतोरित्यर्थः प्रलापेनार्थकव
चइत्यभिधानात् दंपत्योरनुगमनस्यावधिभूतसरस्तीरेदिनयातंव्यतीतं एवंचप्रेमातिश
तिनकिंचिदपरंपरिस्फुरतीतिध्वन्यते॥५८१॥॥प्रमितिज्ञापुरस्सरंविपरीतरतकारिणीनायिकां
नायकोवक्ति॥॥वदसि अर्थात्तवस्य प्रणयःप्रीतिर्यस्याः स्वापार्श्वमितिभावः दीर्घ
श्वासमालिनि श्रमवशादितिभावः वचनमात्रस्फूरे मात्रपदेनसामर्थ्याभावोभिव्य

बाष्पाकुलंप्रलपतोर्गेहिणिनिवर्तस्वकांतगच्छेति॥यातंदंपत्योर्दिन
मनुगमनावधिसरस्तीरे॥५८१॥वदःप्रणयिनिसांद्रश्वासेवाङ्मात्रस
भटिचनचर्मे॥स्वतनुललाटनिवेशितललाटकेनिश्चविजितासि॥५८२
विरचनिपवितःकुसेराधायाःरागचपलनयनायाः॥दृष्टादिगवेधविभ्रमे
विशिखंविविदधातिकुसुमेषुः॥५८३॥

ज्यते वक्रतरप्रस्वेदवति शोभनगात्रि ललाटे अर्थान्मम संस्थापितललाटिके।
निश्चलसीभव यतोविजितासि सर्वैःसंबोधनपदैर्निःसहत्वप्रतिपादनाद्विजयस्यव्य
ग्यत्वेपिविजितासीतिपरोपादानंनचमत्कारीत्याभाति॥५८२॥॥राधाकृष्णयोर्नमासक्त
जातेतिकाचित्कांचिद्वक्ति॥॥कृष्णेसमंतात्विचरतिसति अनुरागचेचलनेत्रायाराधायाःस
त्यां दृष्टादिक्षुयोवेधस्तत्रविभ्रमे दृष्टादिश्चपिलक्ष्यवेधकाणामित्यर्थः बाणंमदनोविद
धाति एवंचसर्वत्रमदनशरपराधीनत्वाद्विषयःश्रीकृष्णोभूदितिध्वन्यते॥५८३॥ ॥

गो॰टी॰
१५८

K58

काचित्कांचिद्धसति ॥ ॥ पथिकः पृथुवकुलाकारं नायकागमनशंकुन दर्शनार्थं स्तनद्वयोद्धनादि
नेति भावः स्वस्तनमेव दृष्ट्वा एवं च निर्गुणयोरपत्वं ध्वन्यते सोऽहं धैर्यैकस्थानभूतायाः एवं
चावश्यचरितत्व नयोरपत्वमावेद्यते प्रियायाश्च विचालितमाचुर्यं जानाति यद्वीयमऽन्य
त्रासक्तास्थानद्वाकिमितिमद्दृष्ट्यमेतात्त्वाध्वाकनाद्यवलगांकुर्यादितिभावः यद्वा दृष्ट्वैव नतु
विचार्येत्यर्थः पीवरवायसानां सद्मनिनिवासस्यप्रकारांतरेणापिसंभवादितिभावः एवं चान
यासीत्या नायकः प्रतारयितु शक्योऽनोयथेष्टं परपुरुषैर्विचरेति दूतीत्व द्वच नकरणेनाय

वीसत्थवढेतिपथिकः पीवरबकुवायसनिवासम् ॥ सोऽहं धैर्यैकनिधेरऽपि
दयितायाश्चरितमविचलितः ॥ ५८४ ॥ विसम्खिचन्तुम्मे विपिष्ठितवतिचानीस ।
भावमीसोपि ॥ मगन्ममहीनिसारेहरिः परं लब्धशोमाऽभूत् ॥ ५८५ ॥ ॥ ॥

कोमन्यानिष्ठरत्पभंगं विज्ञास्यतितेन चानुचितमितिवादिनीं नायिकां वक्तीत्यर्थः ॥ ५८४ ॥
विपक्षिमरगनस्योद्गारः केनचिदेव कार्ड्डावयोनसर्वैरितिकश्चिद्वन्योऽन्यकं चनवक्ति ॥ ॥ चतुर्मु
खेऽपि विधानत्र्यपि विम्बुकेड्योगाश्चर्येषु ऽनंगीकारकारित्वा ईषीपिश्रनी भाभावस
समर्थभावं श्रितवति सति मानधरोद्धरेपरं केवलं हरिर्विस्तुः लब्धशोभावराहः श्लेषचरोसां
चितः धरोद्धारोत्साहवशादितिभावः अभूत् चतुर्मुखविष्णुपदाभ्यामपिसानिष्प्रान्तसामर्थ्य
माक्तितंचध्वन्यते तेनचतत्करणोत्साहाभावाद्वरोद्धारकरणेनिकाठिन्यमावेद्यते एवं चवि
स्तबलत्वेनैवापङ्कोद्धारः कर्तुंशक्यो नान्येनेतिव्यज्यते ५८५ ॥

कश्चिदर्थं चिदन्योक्त्या वक्ति ॥ हे केतक हृद्य वापीजलप्रायप्रदेशे वससि । कंटकावरणानि निःप्रस्यूताः भ्रमराः एतैः किं नकिंचिदित्यर्थः ननु निश्चितं मंजरीगंधं वारय एवं चै-
तादृशी नायिकायावत्त्वसमीपेस्ति तावद्यत्रयत्रयेनयेनप्रकारेणावतिष्ठसि तत्राव-
धयमन्यनायकोपसर्गो नागमिष्यतीत्यतस्त्वत्करणमनुचितमितियोत्यते ॥ ५७६ ॥
नायकोनायिकां वक्ति ॥ हे मुग्धे सुंदरि हृदयाम्भृत्ये एवं च गमनौचित्यमावेद्यते विधू-
ना अंचला दरा विनिभावः यथा विचलसि गच्छसि तथा मे हृदयं विध्यसि प्रकंपलक्ष-

विचलसि मुग्धे विधुतायत्याततया विध्यसि हृदयमदयेमे ॥ पाणिः प्रसरन
यत्नुवः प्रकंपलक्ष्यं स्पृशतीव ॥ ५८७ ॥ विहितासमसमरसमरो जितगारो ।
यष्टिविःकृतनाटोपः ॥ पुरुषायिते विराजति देहस्त्वं सखि शिखंडीव ॥ ५८८ ॥
हतिविवरेनिर्गतस्य प्रमदा विंबाधरस्य मधु पिबति ॥ अवधीरितपीयूषः स्पृहय-
ति स्वाधिराजोऽपि ॥ ५८९ ॥

स्पृशंतीमरतस्प्रशातिकेव एवं च त्वन्मनेनसत्वरणानागमिष्यंतीतिव्यज्यते ॥ ५८७ ॥ सखीनायिकां
वक्ति ॥ हे सखि विहितः कृतः विशेषेणाहितः स्थितो वा असमसमरसमरो मदनयुद्धस्त्वरतमिति यावत्
येन यस्मिन्निति वा अतएव विपरीतरतोद्योगः यदेतत्कृतो नुपवाणी संग्रामीयेनसः जितागारो यस्यस्त्व
यास्त्वं तिर्येन यदेभीष्मस्त्रीप्रियेनसः संपादितो उंवरस्त्वदेहो विपरीतरते शिखंडीव विराजति
एवं च त्वया विपरीतरतमेव विधेयमिति ध्वन्यते ॥ ५८८ ॥ चौर्यरतादिनसम्पगितिवादिनं कश्चिद्वक्ति ॥
आवरणाच्छिद्रेनिःसृतस्य प्रमदा प्रमदशालिन्याबिंबतुल्याधरस्य मधु पिबते स्पृहेदीप्सितस्त्वन्मेनचयैर्यी
अवगणितामृतस्तं द्रोपि स्पृहयति तस्य तावान्पर्यमित्यर्थः एवं चेंद्रपदस्तुलाद्यपेक्षयापि चौर्यरतस्त्व

॥ [illegible]

गो॰टी॰
१५९
159

पुरुषविशेषसमासक्तायाः संगतिमपेक्षमाणां कंचन दूतीं वक्ति ॥॥ वासितमनुलक्ष्यतयाशालिकृतं मधु ये(न) एवं चैतत्समवधानेमद्यसमारकत्वमित्यावेद्यते पतेमधुनः सौगंध्यार्थं पुष्पादि वापदिश्यत इति भावः नायिकानामवतंसरूपेयं क्रतिभूषणो एवं च सर्वा अपि कामिन्यस्तदीयगुणश्रवणेन सदैवाश्रयत्वतिशयं कुर्वन्तीति भावः तरुणानामस्तकेभूषणारूपेवंदनीयस्वरूपः नगरस्थकतुमे सर्वत्रतस्पृहणीयत्वादितिभावः नायकैविशेषणमहिम्ना विशेष्यलाभः सा विलसति शोभते । एवं च त्वं तत्स्याः शोभाधायकत्वमितिभावः वनकुसुमेषु मधुपीव एवं चैतादृशनायकविशेषे समासक्ता नकथमपित्वयि संयोजयितुं शक्येतिभावः ॥५९०॥॥ नायिकासखीनायकं वक्ति ॥॥ आदौ

वासितमधुनिवधूनामवतंसे मौलिमण्डने पुनाम्॥ विलसति सा पुरकुसुमे
मधुपीव वनप्रसूनेषु ॥५९०॥ व्रीडाप्रसरः प्रथमं तदनु च रसभावपुष्ट(
चेष्टायम्॥ जवनीविनिर्गमादनु नटीव दयिता मनो हरति ॥५९१॥॥ ॥

लज्जाप्रसरः तदनंतरं रसः शृंगारादि भावः चित्ताभिप्रायः आभ्यां पुष्टा चेष्टा पुत्तेरसाभिन(
यपुष्टाचेष्टा जवनीविनिर्गमादनन्तरं नटीव दयिता मनोहरति एवं च यथा जवनिकानिर्गमानं
तरं नटीप्रथमतो लज्जातिशयं प्रदर्श्य ततो रसाभिनयपुष्टचेष्टां दर्शयति ततो रसाविर्भावात्सामा(
जिकमनांसि हरति तथेयं दयिता यथाजवत्प्रसरति तथा प्रथमं लज्जाविशेषं विधाय ततः(
सरसाभिप्रायविलासं प्रदर्श्य ततो निर्भररतानंदकत्वया नायकीयमनसो नन्यप्रवणतामापा
दयतीतिभावः इयमित्यनेनान्यासां प्रथमतो निर्लज्जतया किंचिन्मनोहारकत्वेपि न प्रानेनाय(
कीयचित्तहारकत्वमिति वस्त्वावेद्यते तेन च व्यतिरेकालंकारः ॥५९१॥॥

१५९

हरिणीनायकं वक्ति ॥ वसन्निह हरिद्रूप एव गौरांग्या नायिकया त्वयि रागोऽनुरागः पत्येपीति मा संधा
रितः गौरांगो ति हरिद्राविशेषणमपि स रागः सहसा अप्रतर्कितमिति यावत् पतता अविवेकेन प
देसेव धवलाजलेनेव पिशुनेन सूचकेन हृतो हृतः एवं च न तस्या अपराध इति भावः ॥५९२॥ ए
ला ह्यन्नायिका सा तु चर्येन वसर्वत्र कामुकजनपीडासमाचितिकश्चित्किंचिदन्योक्त्या वक्ति ॥ हे कुरंग
सर्वतो विसारि सौरभ्येनानुयोऽभिलाषः क्लेशो नाधाये व्याधास्तैः पीडनीयस्य विषमिश्र्याद्रिनागोपनं (
मथ्यकामिन्याविद्यते रागाधपदेन कस्तूर्याकस्तूरीम विवेकवैधुर्यमावेद्यते व्याधपदेन हिंसकत्वं योन्यते

वससि हरिद्रूप एव त्वयि गौरांग्या निवेशितो रागः ॥ पिशुनेन सोपनीतः सहसा
पतता जलेनेव ॥५९२॥ विषमविसारिसौरभ रागान्ध व्याधबाधनीयस्य ॥ क्व
चिदपि कुरंग भवतो नाभीमाद्यायनस्थानम् ॥५९३॥ वटकुटजशालप्यालसलि
रसालबकुलवारसिंधुवाराणाम् ॥ अस्ति भिदो मलयाचलसंभवसौरभ्यसाम्येपि ॥ ५९

भवतः नाभीमाद्यायनस्थापि स्थलं नास्ति एवं चैतस्याः समस्तगुणौर्विख्याताया आकाव गोपना
भावतया सर्वतः पीडा स्यात् अतएतत्संगस्त्याज्य इति ध्वन्यते ॥ ५९३ ॥ एकमात्रस्सजातीय
गुणावत्त्वेपि क्वचित्कश्चिदस्ति विशेष इति किंचिदन्योक्त्या वक्ति ॥ वटादिसिंधुवारान्तवृक्षाणां
मलयाद्रिजन्यसौगन्ध्यसाजात्येपि भेदोऽस्ति ॥ एवं च चन्दैरेव
न हैजात्येतातं श्लाकं नान्यैरिति भावः ॥ ५९४ ॥
श्रीकुलायन सोनमः ॥ ॥ ॥ ॥

गो॰टी॰ १९०

160

सामान्यवनितां काचिदन्योऽन्यासमपहसति ॥ विनिहितासमर्पिता कपर्दः स्वजटाजूटस्य
कोटिः प्रांतभागो येन तं पश्ये कोटिसंख्याकवराटकदातारं शंकरं शिवं पश्ये स्वस्य
पारदं चांचल्यदोषेणात्यक्त्वा दोषपदमनोचितं तीर्थमनति हे जाह्नवि जह्नुतनये
एवं चैतादृशाचरणमनुचितं तवेति ध्वन्यते एकं वटं हटं पश्ये वराटिकां अपेक्ष्य मा
णा प्रयागतटे पश्ये मध्यम परलोपि समासात् अलसया यास्य पापीयसः समीपं लुठसि
लुठसि एवं च चांचल्यकरणमनुचितं तवेति भावः ॥ ५८५ ॥ किमिति विरहदुःखं त्वं

विनिहितकपर्दकोटिं चापलदोषेण शंकरं मुक्त्वा ॥ वटमेकमनुसरन्ती जा
ह्नवि लुठसि प्रयागतटे ॥ ५८५ ॥ वेदयन्तुर्णां तरुणदशाप्रहराणां संगमं वियोगं च ॥

यामत्रयमागतमिति वादिनी नायिका सखी नायको वक्ति ॥ चतुःप्रहरसंबंधिसंगं चतुः
प्रहरसंबंधिवियोगं च दशादशा दशादेव दशादानायिके त्वमर्थः वेद कर्तुमिति भावः एवं
च यदि प्रसन्ना नायिका तदा सैव प्रहरचतुष्टयसंबंधिरतसुखं करोति सैव चाप्रसन्ना प्रह
रचतुष्टयसंबंधिविरहदुःखं करोतीति भावः अतएव दशा सुरतसंवेदनादिति यतिवेति व्युत्प
त्तिरपि संगच्छते अथ च प्रहरचतुष्टयसंबंधिसंगं तथाविधविरहं च रात्रिरेव वेद रात्री
य प्रहरचतुष्टयसंबंधिसंगाद्भावस्य दिवसीयप्रहरचतुष्टयसंबंधिविरहवेदनायाश्च
कर्त्रीसैवेत्यर्थः दिवसीयविरहस्यापि रात्रावेवातिदुःखदत्वादिति भावः ॥ ५८६ ॥ १९०

चरणानांसंकोचंप्रसारमपियथाकूर्मोविजानाति एवंचयथाचरणसंकोचप्रसरण
संपादनंकूर्मस्याधीनं तथासंगमविरहसंपादनंनायिकाधीनमितिभावः एवंचनममसा
पराधीनेतिध्वन्यते यद्वा विरहिणींसखीवक्ति हेसखिचतुर्णांप्रहराणांसंगंवियोगं
चदाणदारात्रिर्वेद चंद्रयन्दीपनादिभावत्वात्कन्मादाद्यवस्थयानायकसमाग
मासमागमाभ्यांसन्तुखण्डःखण्डादिवसादिनानिरात्रिरेवेतिभावः एवंचत्वादृशापिमासु
ख्यामन्तुखविचारणेनक्रियतइतिसखीमुपालंभोव्यज्यते अथवा चतुर्णांप्रहराणां
दिनदासमग्रारात्रिरितियावत् साखण्डःखविरहसहीयेइतिभावः एवंचदाणमःपि

चरणानामिवकूर्मोसंकोचमऽपिप्रसारमऽपि ॥५९६॥

नरात्रौविश्रान्तिर्हनेतिभावः यद्वा सामान्यवनितांतदीयधात्रीवक्ति कूर्मीवदिनाद
चतुर्णांप्रहराणांसंगंवियोगंचवेदत्वंकिमितिनवेत्सि एवंचत्वयाकेप्यानेयाःकेऽ
पिविनिःसारणीयाइतिभावः अथवा सखीनायिकामुपदिशति याहिउत्सवदा
कामिनी सास्वदर्शनायदानेनदिवसीयप्रहरचतुष्टयविरहसंपादनेनोत्कंठि
तंनायकंविधाय रात्रौप्रहरचतुष्टयमपिरमयतीतिभावः ॥५९६॥ ॥ अहंका
रोधियंकूर्मेमायासंप्रतिबोधय उच्यतेपरमानंदेनाहंनत्वंनवैजगत् ॥ ॥१॥ ॥

गो·टी·
१६१
161

नायिकासखी नायकं वक्ति ॥ हे सुभग एतादृशनायिकानुरागशालित्वादिति भावः भित्तिसु
विवरेण त्वामवलोकयितुं विशन्ती सन्ना हृदयपञ्जरोपि यः पञ्जरः वंशाकरण्डिकातन्मध्यस्था एवंच
धारानुपद्रुतोऽर्थो ध्वन्यते मन्मथेषुरिव साल्योः समेति भावः इषुरिहरति अर्थात्त्वामेवेति
भावः एवंच पूर्वं त्वद्गुणश्रवणादिना त्वय्यासक्तो ह्यानीं त्वद्विषयकविलोकनेन मन्म
थपरवशा न किंचिदपि मत्सखी जानातीति त्वय्यत्यन्तमासक्तेयमिति ध्वन्यते महायु
व हृदयपञ्जरमध्यस्थेति दृष्टिविशेषणं पञ्जरपदेन तन्निःसरणानर्हत्वं ध्वन्यते एता

इति विवरेण विशन्ती सुभग त्वामीक्षितुं साक्षी दृष्टिः ॥ हरति युवहृद
यपञ्जरमध्यस्था मन्मथेषुरिव ॥५९७॥ विपणितुलासामान्ये मार्ग
णायैनं निरूपणे निपुणा ॥ धर्मघटेऽसावधरीकरोति लघुमुपरि नयति ।

दृशी साक्षी दृष्टिः मन्मथेषुरिव हरति अर्थात्यूनः एवंच त्वामवलोकयितुं प्रहसायामुत्स
ख्याउद्दासीन्यवसक्ततया नयनविषयीभूता अन्येषु वा नस्तस्याः कटाक्षैकतानतापन्नास्तामेव
भावयन्तीति भावः एवंच सर्वेषु वस्पृहणीया सा त्वामेव स्पृहयतीति सा त्वया वश्यमनुग्राह्येति
ध्वन्यते ॥५९७॥ ॥याप्यानत्यन्तानवानयमेवेति कश्चित्स्पोत्कृष्टां वक्ति ॥ ॥हे निरूपणे निपुण ए
वं चैतस्याऽन्यैः समतां करणेन वैवानुचितमिति व्यज्यते रण्यातुलासामान्ये एनं मार्ग
णाय असौ धर्मघटः लघुमधरीकरोति गुरुमुपरि नयति ॥ क्वचिदेनां दृश्य तुलासा ।
विति पाठस्तत्र नायिकापदे योज्यमिति ॥५९८॥

१६१

सतांमनसः सकाशान्न किंचिन्महत्तरमितिकश्चिद्वक्ति ॥ कुहरहितस्याश्रमणास्येत्यर्थः अं बरंदिवसोलंघ्यं वसुधाचवामनस्यैकपदं एकपदेनोल्लंघ्येत्यर्थः समुद्रोपिपोतेन लंघ्यः सतांमनः केनलंघयामः एवंचमहत्तरतयाभिमतस्याकाशस्याल्पसमयेनकुहरहीनो लंघनीयतया तथावसुधायाअपिह्रस्वपदलंघनीयतयाच तथाजलधेरपिपोतस्वपो तरूपमितेनस्वल्पेनाप्युल्लंघनीयतया एतत्त्रयातिरिक्तमहत्त्वस्तुनोऽभावात्सतांम नोनिरुपममित्यर्थः ॥५८॥ ॥इतीनायिकावक्ति॥ ॥ हेकुरंगनेत्रे वितनंयतनमस्तदूपा या

वासरराज्यमनन्तदेवरंवरमवनीचवामनैकपदम्॥ जलधिरपिपोतलंघ्यः सतांम नःकेनलंघयामः ॥५९॥ वितनुतनमोमसिलेखालक्ष्मोत्संगोस्फुटाःकुरंगाक्षि॥ पत्राहवरनिकराइवनाराणमुतेप्रकाशन्ते॥६०॥ वपुषाभुजगसंगमसहनेनवन रुणिगुरुनितिवेन॥ नत्वम्पतिगंभीरःकोजलधिमन्दरेणैव॥ क्षेपकमिदं॥

मसीनस्यायारेखाः तद्रूपचिह्नवान्तसंगोयस्य एताहशाकाशेताराःपत्रद्रूपात्तरसमूहा इवप्रकाशन्ते एवंचत्वद्विरहविह्वलस्यनायकस्यत्वद्विरहतापनापत्रमिवेदमाकाशमालोका त्वयात्वरयाग्रस्येयमितिव्यज्यते पद्य मदनदेवस्येयंचंद्रमुद्रा मुद्रितंशासनपत्रं यस्मा नवतीनांगनिःशंकंभवद्विडंःखंदेयमिति शास्त्रादिभिनिर्गतस्येयस्वगात्यमानमपहायना यकमनुरंजयेतिसखीवाक्यमेतत् ॥६०॥ ॥ हेभुजंगसंगमसहनेतरुणि तवगुरुनितं वेनवपुषा गंभीरोपिकोनत्वम्पति अपितुसर्वएव मंदरेणागंभीरोजलधिरिवेत्यन्वयः॥

गो·टी·
९८

162

ऽनेकांगभंगिभुरुहर्मनोभवनृपस्याचार्यैः नुबीनांतेविसिञ्चपांबालां वेत्रलतयेव
रतिरीत्यानल्पेननर्त्तयति एवंचेयमत्रेत्यंतरतिकलाप्रवीणाभविष्यतीतिभावः ९८।
नायकोनायिकांवक्ति ॥॥ हेसुतनु अनुकूलमिच्छाविषयीभूतं पदंफलंरोधः इत्य
नेविपरीतमपिरतं अपिनाविपरीतेतरस्तनसंग्रहः यद्वा अपिरवधारणार्थकः ना
दाभूषणाम्बुनःममहृदयंतरतरुमिवआवेगात्‌ वेगविशेषादित्यर्थः आमूलंहरा
ति एवंचरतिसामान्यस्याधिक्येपिविपरीतरतस्याधिक्यमित्यावेद्यते॥ ९८२ ॥ ॥

विविधांगभंगिभुरुहर्नृत्तनञ्चिन्त्यांमनोभवाचार्यैः॥ वेत्रलतयेवबालांत
ल्पेननर्त्तयतिरतिरीत्या॥ ९८१॥ विपरीतमपिरतंतेस्त्रोतोनयाभूषणाम्बुकूलमि
दम्॥ नरतरुमिवममहृदयंसमूलमावेगतोहरति॥ ९८२॥ वैभवमाजोभूष
णामपिभूषणपदंतएवनिहितमम॥ गुणमात्मनामधर्मेहिबंचरणेनिकाणादाः

कश्चित्कंचिद्वक्ति॥॥ भूषणामपि अपिनाहेयत्वमावेद्यते भागयशालिनां पदेनैभवंव्या
पकत्वं भूषणपदंतएव एवकारेणाभूषणपदत्वव्यवच्छेदः निहितंमस्थापितमित्यर्थः अमः
धर्मधर्मिनरभ्यासेनहृदयति काणादावैशेषिकशास्त्रप्रवर्त्तकाःआत्मधर्मेहिवंचात्मनांगुणगणानि
चतुर्विंशतिसंख्यकेनयोगगणेनादिनिभावः एवंचात्मधर्मेहृदयेभूषणपदत्वनिहितेपयोगत्वेप्यात्म
निविद्यमाननगुणत्वंमुनिभिरभिहितं तत्रकावार्तान्येषामितिभावः एवंचरतिहृत्सेवदोषं
दोषत्वेनगणयंतिसर्वे इतिदारिद्र्यमःसम्यगितिव्यज्यते॥ ९८३॥॥

वक्राः कुटिलाः कापट्येन स्नेहवन्तः मलिनाः पापकारित्वात् साहजिकश्यामतायाः लि
त्वात् श्लिष्टभयत्रभावः कर्णान्तिके समज्जनः परापकारार्थं विशालत्वात् श्लिष्टभयत्रभावः
हे सखि खलाः वेश्याकटाक्षाश्च कं न वञ्चयन्ति अपि तु सर्वं एवं चोभयसंसर्गस्तवानु
चितः इति व्यज्यते ॥९४॥ पाकोद्यमप्राप्तिर्मीनायिकां रसार्थीनायकोवक्ति ॥ हे प्रेयसि
विषज्वालाभिर्यागं यमेव स्वरूपपात्रं अथ च जलाधारस्थं तप्यमानं तं स्वच्छोद

वक्राः कपटस्निग्धा मलिनाः कर्णान्तिकेषु सज्जनः ॥
केवञ्चयन्ति न सखि खलाश्च गणिकाकटाक्षाश्च ॥९४॥
विषज्वालावलयितजलधरपिठराद्धि निर्यान्ति ॥ वि
प्रापौदनयत्तिमुषः प्रेयसि पयसा समं करकाः ॥९५॥

नकां निहारकाः करकाः पयसा जलेन पतेऽयथेन सह विनिर्यान्ति एवं चैतादृशाकालेऽ
नित्वज्वालामस्यऽस्यौदनभोजनदानवन्मम स्वतदानं जीवननिदानमित्यवगम्येन रव्यासं
गं परिहायमन्नसविधमेहीति ध्वन्यते यद्वा वर्षोपलसहितेनादृशाहलोकस्यमम्यासंकेतेन स
मागन्तव्यमिति निवारिणी काचिद्वक्ति विप्रदिति एवं चैतादृशाकालीनस्वरसंऽयौदना
भोजनादऽपि मिहमित्यवगम्य संकेतं प्रयाहीति ध्वन्यते ॥९५॥

गो॰टी॰
१६३
163

अपांतरंगोत्कंठमालीनायकोनाधिकांवक्ति ॥ ॥ हेहरिहिणि एवंचसेवासंपादनौचित्यमावेदयते ।
मरुपथिकस्यमेसंपादितैर्मज्जनप्रभृतिभिरुपचारैः किं नकिमपीत्यर्थः एवंचमरुदेशागतस्यागत
स्युश्रमयसौसंतापवजैतिभावः किंतर्हिविधेयमित्यतआह त्वदूरुरूपकदलीद्वयांतरालेश्रय
मदेकदेयस्तापःशांतिमेति एवंचाप्यव्यासंगंविहायरहसिसत्वंप्रचलेतिध्वन्यते ॥ ९.९ ॥ ॥
वद्वेएषामकर्मणितदिहग्यागांतविधेयमितिकाम्बिकासमुपदिशति ॥ ॥ महतान्वेषणेनसंपादितंक
मैविरूणत्वेपिक्षोभायैभवति अत्रार्थांतरन्यासमाह दुर्वहोमहत्वादिहितिभावः यो

मज्जनादिभिरुपचारैः किंमरुपथिकस्यगरहिणिविहितैर्मे ॥ तापस्त्वदूरुक
दलीद्वयमध्येशांतिमयमेति ॥ ९.९ ॥ वैरुण्येपिहिमहतांविनिर्मितंकर्मक्षो
भायै ॥ दुर्वहनितंबमन्थरमपिस्तनितंबिनीन्तनम् ॥ ९.७ ॥ वीक्ष्यसतीनां
गणनेरेखामेकांलयास्वनामांकाम् ॥ संतयुवानोहसितंस्वयमेवापारिना
वरितुम् ॥ ९.८ ॥ ॥

नितंबस्तेननिश्चलमपिनितंविनीन्ट त्वंसंहरति चित्तमितिभावः ॥ ९.७ ॥
काश्चित्स्यंतसाम्यतिम्रतेतिबाधिनीकांचिद्वक्ति ॥ ॥ साध्वीनांगणनेस्वनामचिह्नामेकांरे
खांदृष्ट्वा युवानस्तदुपभोगायइतिभावः हसितंसंत स्वयमेवआवरितुंनिरोद्धुंहास्य
मितिभावः नाऽपारि एवंचतदीयसतीगणनारेखांदृष्ट्वायुवभिर्हसितमितिकिंव
क्तव्यं तथैवकथमस्यलोकोभ्रांतइतिहास्यकृतमितिभावः एवंचैतादृशाःकुसती
त्वमित्यावेदयते ॥ ९.८ ॥ ॥ वकीयंसितपदैकचरणाध्यानमास्थिता ॥ गिलतीमाफरीसत्
मीसतीवास्तेनपद्मिनी ॥ ॥ १ ॥ ॥ ॥

वादिनं कंचित्कांश्चिद् हति १

कृतः किमितिनामसरसीतिवादिनीं कांचित्कांचिदुक्तिः ॥ अत्रसंबुद्धिपदानन्तपादानंलोकाभी २
तिमावेदयति विविधोऽनेकप्रकारकआवर्तआवर्तनंचलनविशेषःयस्यसचासौक्रीडाप्र
दःनितंबोयस्य पक्षेविविधाआवर्ताःभ्रमणानियस्यांनादृशीनर्मदानदीयस्मिन् ।
तादृशाकटकवान् अतएवसंभावितःसूर्यरथस्यस्तंभोयेनस्वैकदेशानितंबेन त्वत्कवि
निर्जयादितिभावः पक्षे संभावितोरविरथस्यस्खलनंगमनायातत्स्त्रष्टुस्तंभोयेन ततोप्यधि
कपरिमाणशालिनितंबवत्वादितिभावः पक्षेरविरथस्यस्तंभोगतिविच्छेदः अन्यच्च ।

विंध्याचलस्त्वद्देहस्तव विविधावर्तनर्मदनितम्बः ॥
स्थगयतिगतिंमुनेरपिसंभावितरविरथस्तम्भः ॥ ९०९ ॥

त्वादितिभावः नवदेहोविंध्याद्रिरिवमुनेरपिमननशीलस्यापि पक्षेऽगस्त्यस्यगतिं
स्थगयति एवंचमननशीलस्यापितवैतादृशदेहमवलोक्यगतिनिरोधोजायते किंच
नर्मदेहगस्यरसलंपटस्येतिभावः पक्षे विपरीतरतनिर्जितोनायकोनायिकांवक्ति विविधा
वर्तोऽनेकप्रकारकभवनंचलनविशेषादितिभावः तेनक्रीडाप्रदोनितंबोयस्य संभावितार
विरथस्तंभःपराभवइत्यर्थः ततोप्यधिकतरगतिमन्नितंबवत्वादितिभावः पक्षेप्राग्वत् ।
मुनेरपिचपलंवानरंध्यायेदित्यादिकामतंत्रोक्तचिंतनवतोपिगतिंसामर्थ्यंस्थगयति ए
वंचत्वदासक्तचित्तस्यममपराजयस्तववशकरइतिध्वन्यते ॥ ९०५ ॥

गो॰टी॰ १६४ काचित्कंचिचन्द्रेजयावनि ॥ ॥ आवरणभंजकनिरस्कारसह अत्यर्थंपरमदुर्नयस्याराम एवंचदु
र्नयस्यत्वमेवस्थानमितिभावः परकीयोपवनशानलंपटदुष्टहय अथचदुष्टेहयपर्मोसि दुष्टे
मुहय अहहृतिवा गेहमपिसरसि अपिनानिजजनसंग्रहः एवंचस्वनायिकाविस्मरणेनवनोचि
तमितिव्यज्यते ॥ ६१० ॥ ॥ महावंशात्तन्यन्वेष्यनेकगुणवत्वेपिखलस्यविश्वासोनविधेयइतिकश्चित्
कंचिदाह ॥ ॥ यदंशात्संन्वयस्य अथचवेणोरवलंबनंजन्यत्वंआश्रितत्वंच गुणास्यत्तंतिस्वगो
र्यादेः तंतोस्य योविस्तारः आधिकंदैर्घ्यंचयाचनघता तत् खलस्यनालस्यचनिजांकसमता

वृत्तिभंजनगंजनसहनिकाममदामदुर्नयाराम ॥ परवाटीशानलंपटदुष्टहयरस
सिगेहमपि ॥ ६१० ॥ वंशावलंबनंयद्विस्तारोयोगुणस्ययाऽवनतिः ॥ तत्तालस्य
खलस्यचनिजांकस्थमरणामाय ॥ ६११ ॥ विंध्यमहीधरशिखरेदृष्ट्वादिक्श्रेणीकृ
पाणमयमसृणनिलः ॥ उदयदिव्यज्योतिःपथिकवधायैवपातयति ॥ ६१२ ॥ ॥

णायविश्वस्तनाशायेत्यर्थः ॥ ६११ ॥ ॥ वर्षास्वपस्यात्तमयन्तंमायकंमायिकासखीवारयति
विंध्याचलसानौमेघपंक्तिरूपकृपाणं सकलकापलायनस्कोलिनोयोनयत्याली असौसमीरणः
पान्थविनाशायैवनीरणीकरोति विंध्यमहीधरशिखरेइत्यनेनस्फुटदृष्टिनयोग्यत्वं तेनच
महूचसिनसिंध्याचलमाश्रावस्मितियोत्यते मदिरश्रेणीकृपाणमित्यनेनानिवारणीयत्वं तेनचस्व
सदनावस्थानमेवशरणमित्यावेद्यते अनिलइत्यनेनसर्वत्रसंचरणयोग्यत्वं तेनचप्रतीकारानर्हत्वं
व्यज्यते पथिकवधायैवेत्यनेनकार्यांतराभावस्तेनचकथंचनापिनगंतव्यमित्यावेद्यते ॥ ६१२ ॥ ॥ १६४

त्वया ४

कश्चित्सखायं वक्ति ॥ ॥ विश्लेषेणालंबमाना यावेणी तया हूरीकृतभूलि आयान्त्यस्य पदं हे ।
यादहिति भावः ममपदं गेहिन्याः प्रथममतोऽस्माभिः क्षालितं पश्चाज्जलेन एवं च चिरप्रवास
करणान्मयि कोपमपि युयं करिष्यतीति भीतिवतोऽपि समानमाचरणाप्रणाममादि नासाध्व(
ममपाहृतमेतादृशीसरलतरा मम प्रियेति ध्वन्यते ॥ ९२ ॥ ॥ विपरीतरतान्ते नितान्तश्रा(
न्तां कान्तां नायको वक्ति ॥ ॥ रतिविरतौ रतिश्रमे वा वक्षःस्थलं स्वापकारिणि मम वदन तु
पधान्तु मदुपधानीकृतं मौलिं न आलभसे न नम्रीकरोषि न धारयसीति वा तत्र हेतुः सा

वालंबमानवेणीभुजगफलि प्रथमम् अस्माभिर्धौतम् ॥ आयान्त्यस्य पदं मम
गेहिन्या नयनसलिलेन ॥ ९३ ॥ वक्षःस्थलं तु एतेन मम त्वमुपधानं तनमो
लिमालभते ॥ पीनोन्नतस्तनभरहारीभरं तं रतिश्रान्ते ॥ ॥ ॥ ९४ ॥ ॥ ॥

ह पीनोच्चकुचभरहारीभरं एवं च त्वन्मौले रूपधानभवनाभावेन मत्स्वापरोधः ।
किं तु पीनोच्चकुचयोरेवेति भावः यद्वा मम स्वमुपधानीकृतं मस्तकं ममेति भावः नाऽऽ
लभसे न स्पृशसि न स्पृष्टुं शक्नोषीत्यर्थः न प्राप्नोषीति वा तत्र हेतुः पीनोन्नतेत्यादि ।
अथवा मत्स्वस्येति भावः स्थापयितुं मम मौलिं न स्पृशसि किं तु स्पृशेति भावः यत
स्त्वदीयपीनोच्चकुचान्तरितं एवं च कराभ्यां मन्मौलिं भुजं मय्य स्ववदनं स्थापयेति भावः
एवं च चुंबनोत्कंठस्य च पीनोच्चकुचभारवत्यामौलेरुन्नमनासामर्थ्यं ध्वन्यते ॥ ९४ ॥ ॥

गी. टी.
११५
115

काचिद्दूतीवक्ति ॥ ॥ हेहृति वदनव्यापारेणावचनरचनयायोऽन्तर्भावः परहृदयप्रवेशः तस्माद्धेतोरन्तरंगं
अनुरागवंतं पदेनस्वसंबंधेनयद्दंतःप्रवेशान्तस्मात् अनुपश्चाद्रंगं रुधिरं सतीमुद्रायमानयन्तीत्वं
तस्यविंगस्यसर्पस्यचदष्टासि एवंवचनरचनयात्वयानस्याहृदयंप्रविश्यपश्चात्पातिव्रत्यमंगंविधा
य तेनविंगेनसहकामिनीसमहंसंयोजयसीतिभावः वदनव्यापारपदेनदृक्कव्ययायभावोद्योत्यते
सार्थपदेनसामर्थ्यातिशयोव्यज्यते दंष्ट्रापदेनत्वांविनासत्रअकिंचित्करइतिध्वन्यते ॥ ११५ ॥ ॥ इतिवा
काव्यन्यासमाप्ता ॥ (कस्यचिन्नायकस्येतरनायकसाधारणमसहमानाकाचित्कांचिदन्योन्नायाव

स्वना

वदनव्यापारांतर्भावाद्दन्तुरक्तमानयंतीत्वम् ॥ इतिसतीनांसार्थंतस्यभुजंगस्य
दष्टासि ॥ ११५ ॥ ॥ इतिवकाव्यन्यासा ॥ ॥ श्रीरपिभुजंगभोगेमोहनविद्यतेनशीलिता
येन ॥ सोऽपिहरिःपुरुषोयदिपुरुषाद्दितरेऽपिकिंकर्मः ॥ ॥ ॥ ११६ ॥ ॥ ॥

कि ॥ ॥ येनसुरतविद्यतेनश्रीरपि अपिनायदर्थंजगदखिलंयत्नमाचरतीतिध्वन्यते सर्वशरीरे
शीलिताभुक्ता भुजंगपदेनभयजनकत्वेपितदभवनेनातस्मात्तुतिशयोद्योत्यते यदिसहरिरपि
पुरुषः इतरेपिपुरुषास्तदाकिंकर्मः एवंचैनाहदासान्यैःसामान्यैःसहसाम्यकरणामनुचितमि
तिव्यज्यते यद्वा त्वोऽन्यायाकाश्चित्त्वांचननिंदति श्रीरपिलक्ष्मीस्वरूपापियेनविंगसंभोगविषयेमोहन
विद्यतेनेतिविपरीतलक्षणायासुरतानभिज्ञेनशीलिताकृता अतोपियदिपुरुषः सोपिहरिर्विहरिः प
शुतुल्यःपुरुषस्तदाकिंकर्मः एवंचैनाहदासपुरुषेषुरागानानयुक्तेतिभावः ॥ ११६ ॥ ॥ ९६

मानवतीसामान्यवनितासखीवक्ति ॥ संबुद्धिपदानुपादानं क्रोधमावेदयति यास्थैर्य प्रचुराबाहुम् अपि अपिना चाटुवचनादिसमुच्चयः श्लथयसि चालयितुमशक्यत्वादिति भावः एवं च कठकर्षणादिनापि न हृतम् श्लथसीति क्रोधातिशयं सूचयति मनोभवस्य दर्पशिलामिव मनोभूपदेनाकुंठितत्वं ध्वन्यते भवतीकांतवरस्तरुणो विचालयति न कोपीत्यर्थः इति शंके एवं चैतादृशकोपकरणे कस्त्वामनुरंजयिष्यतीति ध्वन्यते यद्वा मनोभवस्येति बाहुम् इत्यत्रान्वेति ॥ ९७ ॥ नायिकासखीनायकं मन्येत्याह वक्ति ॥ हेम्नाद्भुनवबकुटिल अथ च शार्दूलनखवत्कुटिल तथा विधाचरणावत्ला

शंके यास्थैर्यमयीम् श्लथयसि बाहुम् मनोभवस्यापि ॥ दर्पशिलामिव भवती कांतवरस्तरुणो विचालयति ॥ ९७ ॥ शार्दूलनखवरसंभवकठोरतरजानरूपस्य च नापि ॥ बालानामपि बाला यस्यास्त्वमपि हृद्दिवससि ॥ ९८ ॥

दिति भावः कठिनतरजानरूपस्य सुवर्णस्य रचना यस्मिन् अथ च जातारूपस्य रचना यस्य सौंदर्यशालिन्नपित्वमपि अपेक्षितलक्षणसमुच्चयो निर्यातत्वं चार्थः यस्याहृद्दिवससि भूषणानूपनयेति भावः अथ च तस्यास्त्वदासक्तत्वादिति भावः साबालानामपि मध्ये बाला अतिबालिका अत्यंतमुग्धेति भावः सुवर्णपुनत्वान्नवबालहृदि भूषणं भवतीति भावः एवं चैतादृशो कौटिल्यादिशालिनि सौंदर्यवावेष्यासक्तिसंपादने कथमिति सौंदर्यं न भवतीति भावः यद्वा जातारूपस्य रचनायस्याः एतादृशमपि नाकणपि साऽत्यंतबालिकैवेत्यर्थः

॥ १०३

गी॰ टी॰ १६६ 166

नायिका सखीं नायकं वक्ति ॥ ॥ श्रवणसमयएव कर्णासृत्वजनके पदे श्रुतिभिर्मनोहा
रिणीनिवा श्रीरुत्कर्षेण पदे श्रीरामायणोत्कर्षेण कंठमधिवसति त्वन्नाम्नैव सर्वत्र स
ख्यातिरिव पिसाध्ववहरतीतिभावः पदेऽभ्यस्तीभवतीत्यर्थः मधुरे सुंदरे पदे माधुर्यशालि
नि गीतं ह्न्ववह्न्यग्रहं पदेऽभिप्रायग्रहं तनुते एवं च स्पृहणीयत्वमावेदयते नकरोति एवं च।
नह्व्यादिनात्वय्यनुरक्ता किं त्वदीयसौंदर्यादिगुणोत्कर्षेणेतिभावः ॥ ६२९ ॥ ॥ समीचीनस
मतोऽभीकारे सम्प्रयोगवफलं भवतीति कश्चित्केचिद्वक्ति ॥ ॥ कुचयोरऽल्पसाम्यात् श्रीफा

श्रुतएव श्रुतिहारिणि रामायणोत्कर्षेण कंठमधिवसति
गीतं ह्न्वत्वयि मधुरे करोति नानुग्रहं तनुते ॥ ६२९ ॥ ।
श्रीः श्रीफलेन राज्यं त्वत्प्राणेन नाल्पसाम्यतो लब्धम् ॥
कुचयोः सम्यक्साम्याद्धृतो घटश्चक्रवर्तित्वम् ॥ ६३० ॥ ॥

लेन श्रीर्लब्धा त्वत्स्तनाराजेन तालेन राज्यं लब्धम् सम्यक्साम्याद्धटश्चक्रवर्तित्वं चक्रसंबं
धित्वं सार्वभौमत्वं च गतः प्राप्तः एवं च नीचानुकरणमनुचितमिति ध्वन्यते ॥ ६३० ॥ ॥
शैवं लिंगा घटो बिल्वं कुंडं भिर्दी डिमीफलं ॥ शिवचक्रेति तिनन्वचपाः कविगीताः कुचोपमाः ॥ २ ॥

१६६

काचित्सखीं वक्ति ॥ भूतलेनितंबः चलनत्वानाभावार्थमितिभावः चित्तेभीतिः कदा
चित्वन्मास्तेयमितिधियेतिभावः उत्संगेप्रियः नारहत्यर्थः पतिर्भुजेमौलिः पा
तीतिस्वत्वस्याखलणमात्रकालिकस्वभावेनांधकारेपिकरादिव्यापारेणानासनीति
धियेतिभावः मुखेमुहुः श्वासः पतिश्रवणाभियेतिभावः हृदं एतादृशामित्यर्थः

श्रोणीभूमावंकेप्रियोभयंमनसिपतिर्भुजेमौलिः ॥
मुहुः श्वासोवदनेसुरतमिदं चेत्तृणांत्रिदिवम् ॥ ८२ ॥
श्लिष्यन्निंतंबत्वंबन्निवनवैकल्लिखन्निवात्मसः ॥ हृद्य(
दिवहृदयमंतः स्मरामितस्यामकृर्जेघनम् ॥ ८२ ॥ ॥

चेयदिसुरतंलभ्यतइतिभावः सुखाहेनान्याहष्टारतेअसमीचीनत्वमावेद्यते तदा
त्रिदिवंस्वर्गस्तृणादल्पः अगणनीयइत्यर्थः एवंचैतादृशासुरतवत्योयास्ताः पुण्या
तिशयशालिनयाधन्याः तदभावादहमधन्येतिध्वन्यते तेनचैतादृशरतार्थंय
तस्वेति ॥ ८२ ॥ नायकः सखायं वक्ति ॥ आलिंगन्निवेन्यादयः स्मरतिप्रकाराः ।
अल्पमल्पंस्मरतोहेतुः ॥ ८२ ॥ ॥ ॥

गो॰ टी॰ ९८ 167

ऊपितां नायिकां नायकः सखी वक्ति ॥ हे सुमुखि एवं च परुषभाषित्वाभावो व्यज्यते
मस्तके पादप्रहारं दत्वा त्वया ह्रीः क्रियतां कालिंद्याः कालिय एव तथापि चक्रेणात्व(
चरणासंबंधिनेत्यर्थः चिह्नितः पक्षे सुदर्शनचक्रेणांकितः यमुनातो निःसार्य सागरा
वस्थितो गरुडभयनिवारणार्थं कालियस्य चक्रचिह्नं कृतमिति पौराणिकाः सुभुजं(
गः खिंगः पक्षे सर्पः तेन वैवेत्यर्थः एवं च त्वया कोपे कृतेपि सन्तूपितो भवतीति व्यंग्य

शिरसि चरणप्रहारं प्रदाय निःसार्यतां तेन दर्पि ॥ च
क्रांकितो भुजंगः कालिय एव सुमुखि कालिंद्याः ॥ ९३ ॥

ते यथा सखी नायिकामुपदिशति हे सुमुखि एवं चोपदेशार्हत्वमावेद्यते यद्यपि
चक्रेणानन्तरं दत्तेन चिह्नितः जनावने समूहे च दंभभेदश्चांगयोः शास्त्रभेदे च(
सेनायां चक्रं चापि विहंगके स्यादभिधानात् खिंगस्तथापि त्वया शिरसि पादप्रहा
रं दत्वा स तेन सदर्पं निःसार्यताम् एवं च यद्यप्यनेन बहु क्रूरीयते तथाप्यसौ पकीर्तिर्भू
यसी भवतीत्यतस्त्वं सामीचीन्यार्थमेनं स निकारं ह्रीकुरुष्वेति भावः ॥ ९३ ॥ ॥

९८

नायिकासखीनायकंवक्ति ॥ हे स्नेहेन प्रीत्यानतगौरंगि त्वमेवद्य एवंचबहुतरतदीयगु
णोत्कर्षेपिमदत्वात्तेहमात्रमपिस्वसंनुत्पन्नचितंनवेतिध्वन्यते पक्षे तैलेनदीपेनवर्तिरि
वत्वयापरित्यक्तासाकृशांगी एवंचसौंदर्यवत्त्वमावेद्यते कृशांगीतिवर्तिविशेषणा
मिति भूतिरैश्वर्यं पक्षेभस्म तत्प्रचुरागुणाः सौंदर्यादयः पक्षेतंतवः तत्प्रचुरावाभ
वतुपरंतुपश्चाच्छेव एवंचत्वयातस्याःपरित्यक्तायाः ऐश्वर्यगुणादिकंचतस्याःसर्वमकि
ञ्चित्करमेवेतिध्वन्यते तेनचतदीयगुणादिमात्रमवेक्ष्यत्वयातदीयानुरंजनंविधेयमिति ।
पक्षे ऐश्वर्यगुणोत्कर्षवशान्नायकंप्रत्यप्रीतिकारिणीं नायिकामालोक्यनायकसखीना

यशोच्छेव सा कृशांगी भूतिमयीवा भवतु गुणमयीवा ॥ स्नेहैकवपुष भवता
त्यक्ता दीपेन वर्तिरिव ॥ ८२४ ॥ शुकमेव दारुशालाकापंजरमन्तदिवसवर्ध
मानोपि ॥ हंत निरदयितादृदयं शोको मे स्मरशिखीवतीत्वाम्बवः ॥ २५ ॥

यकंवक्ति हे स्नेहैकवपुष एवंचतवनान्यापेक्षेतिव्यज्यते भवतापरित्यक्तासाऐश्वर्यसौं
दर्यगुणापिशोच्छेव एवंचतस्याःसंपत्तिसौंदर्यादिमत्तयामत्परित्यागेपिनकिंचिदुःखं
भविष्यतीतिमनसिनविधेयंत्वयेतिध्वन्यते तेनचकिंचित्कालंत्वयापरित्यक्तासासुखं
यमेवत्वामनुनेष्यतीति ॥ ८२४ ॥ ॥ कश्चित्सखायंवक्ति ॥ प्रतिदिवसंहृद्धिमान् कंदर्प
वाणैर्निक्षिप्तः दुःखदहनेयावत् शुकुमारंभोयस्यसः पक्षेमदनविशिखैर्भिन्नतकिंशुक
वनोल्लासवद्दनोमेशोकः प्रियतमाहृदयंकाष्ठशलाकापंजरंशुकइव दारुपदेनछेदना

यमितिध्वन्यते ॥ ८२५ ॥ ॥

गो.टी.
१६८
168

कान्ताचित्वक्ति ॥ पथिकेन निखिलकौतुकस्थानस्य शुकस्य पोयः स्वतु स्तस्य ए
वंच्युतिस्नेहपात्रत्वं द्योत्यते तेनच मारणानर्हत्वं तस्यैपि तत्कारणे त्यतान्तेचितकार्य
कर्तृत्वनायिकायामभिव्यज्यते आकस्मिकंयन्मरणं एवंचरोगाद्यनुपस्थानयाः
मारितत्वमिति ध्वन्यते अत्वा अरहिणया: एवंचान्यानिवारणीयतारक्षणीयत्वादिव्यज्यते
विनयनाम्नः अकार्यकरणमित्यर्थः आगमनोत्सवमेव एवकारेणाहास्यायकथितत्व
विनयस्य व्ययेव्यज्यते तातः एवंचकिमपिकार्यंप्रमदानामितिध्वन्यते केचित्तु शुकस्य

आत्वाकस्मिकमरणं शुकस्तनोः सकलकौतुकैकनिधेः ॥ तातोरहि
णी विनयमयुक्तमागात्पैवपथिकेन ॥६२५॥ पुलकितभुजंगभोगात्क्रोडे
नाभ्युद्धृतापि हस्तेन ॥ अचलेवकीर्तितेस्मः किमशाकंनामवसुमत्याः ॥२६॥

नुरित्यस्य शुकस्यवालकस्येत्यर्थमाहुः ॥६२६॥ ॥ इतीनायिकोक्तिः ॥ अंगीकृतसर्पधारीवा ।
आधारतयेतिभावः अथचकृतविगतसंभोगा कृसेन परमेश्वरेणाक्रोडेनवराहरूपेण ।
निष्कासितापि अथचडुष्टेनभुजाभ्यंतरेणालिंगितापिभूः पृथ्वी अथचभवत्यपरा
धावहवोयस्याःसकाशात्साअचलेव अथचचांचल्यभाववत्येवकीर्त्यते अत्रहे ।
तुमाह नामेतिनिश्चयेनवसुमत्याः अथचसंपत्तिशालिन्याः अस्माकंनकिमपी ।
त्यर्थः एवंचधनवत्याःस्ववनकिमप्यऽपयशःसंभावीत्यनोमतुआनायकेनसंगतिंकु
र्वचेतिध्वन्यते ॥६२७॥ ॥ श्रीरामायनमः ॥

१६८
६८

एवंनायिकासखीनायकंवक्ति ॥ श्यामा षोडशवार्षिकी यद्वा श्यामेव रूपा विलोचनहरी लोचनयोः स्वस्मिन्नासक्तिसंपादिका तारुण्यपक्वत्वादिति भावः एवं चैतस्यास्तारुण्यवशादेव सौंदर्यं न स्वाभाविकमिति व्यज्यते यद्वा दृश्यासंपादकतया नेत्रहरा एव मनसि लग्नः अत एवेति पदानुपादाने सखीगतदुःखोद्रेकं व्यंजयति इयं बाला धूमपरंपरा लतापदं मालिन्यातिशयजनकतामावेदयति भित्तिस्थचित्रमिव सर्वकलत्रं लुंपति हंत इति खेदे एवं चैताहशानुचितमभून्नेति भावः सर्वकलत्रस्य चित्रोपमानतया स्वाभाविकसौंदर्यवत्त्वं ब

॥ ८२ ॥

श्यामा विलोचनहरी बालेयं मनसि हंत सज्जंती ॥ लुंप
ति सर्वकलत्रं धूमलता भित्तिचित्रमिव ॥ ६२८ ॥ ॥

ज्जमाने इत्वाभावश्च द्योत्यते बालाया धूमलतोपमानतया मालिन्यसंपादकत्वप्रदर्शनेनासतीकार्श्यकारणयोग्यत्वमावेद्यते आर्थिकमिदमुपमानतया मनसि जडत्वं ध्वन्यते तेन वास्तवसमीचीनत्वज्ञानविधुरत्वं लुंपतीत्यत्र काक्का सखीप्रश्नाद्रूपपिभानि अथवा काक्का न लुंपतीत्यर्थः ॥ सर्वकलत्रस्नेहस्यातिदृढत्वादिति भावः ॥
॥ ६२८ ॥

गो॰ टी॰
१६९
169

प्रस्थितस्त्वं किमिति स्थितोसीति प्रश्नः कश्चित्सखायं वक्ति ॥ ॥ अनेकवारं गमनमने-
कवारं प्रत्याहतिश्च सर्वथा गमनेन नायिका महाविरहदहनदग्धा सती प्राणानेव त्यक्ष्य
तीति धियेति भावः अतएव वारंवारं गमनकालिंगनमचिरेणैव गमिष्यामि इङः त्व
मात्रकृष्टेत्यन्तु नयार्थमिति भावः तथानेकवारं गच्छामीति वचनं त्वदाताचेद्गच्छा
मि नोचेन्नागच्छामीत्येवंविधं एवं च नायकेन नायिकातावश्यावर्तित्वं तेनचाऽन्यं

प्रातर्यागनिराहृतिः प्रातः प्राः कंकावलंबनं प्रातः प्राः ॥
प्रातर्प्रोयामीति वचः स्मरामि तस्याः प्रवासदिने ॥
॥६२९॥

तासक्तिमत्वं तेनच प्रणायप्रभंगाभीरुत्वमावेद्यते प्रस्थानकाले दृष्टं सर्वं तस्याः
तां प्रतीत्यर्थः स्वकृतमित्यर्थः स्मरामि एवं च तत्कालीनावस्थास्मरणात्संतानवैकल्य
विवशाहृदयोहं गन्तुं न शक्नोमीति भावः यद्वा प्रवासदिवसे तस्याः नायिकाया अनेकवा-
रं मनागमनादिकं स्मरामि एवं च तदीयतत्कालीनतादृशावस्थास्मरणेन मया
त्रस्यातं न शक्यमिति नायकः सखायं वक्ति ॥ म॥६२९॥ ॥ ॥ १६९

नायिकायाम्नावदन्ननयेपिसमधिकनवमानभवनमवलोक्याभिमानितयोदासीनंना
पकमालोकयमद्धिश्चिलमानाकयारीत्यानुनेनवोमामितिविचारयंतीनायिकासखी
वक्ति ॥ ॥ आनंदकोकिलरुतानाभिर्गोपीभिर्गीप्सितंदृष्टः कृष्णः वंशीरवैः उच्चविनि
हितनयनः स्वाभिमतमालिंगनरूपमितिभावः कथयति गोपीपदमत्तत्वंध्वन
यति हास्यपदं करोतीतिचित्तमितिस्फुटत्वम्यास्वचित्तस्यपराधीनताभावकर्तृत्वमा।
वेदयति एवंचान्योभाववत्योगोपांगनाश्यामनासर्वेपरमेश्वरमेवंरीत्यास्ववशे
वश्यवशातांनयंतीतिभावः एवंचैतादृशवसंतसमयेचतुरयात्वयाविधेयरसा।

आनंदपरभृतरवाभिः दृष्टोगोपीभिरभिमतं कृष्णः ॥ पूर्ण
सनिर्वंशीस्वनितैः स्तनविहितलोचनोऽनुमतम् ॥ ३६ ॥

लंपटोनायकः कयाचनरीत्याकर्यनस्वाधीनतांनेतुंशक्यइतिव्यज्यते कोकिलाश्च
मरवश्रवणेमित्रस्यसदृशीहंतदृष्टात्रदेयासेवतिलोकोक्तिः यद्वा वसंतसमयेपरदेशागा।
मनमनुचितमितिकश्चित्कोचिदवक्ति परभृताइवपरभृतासहृतीसदृशाः कोकिलाइत्यर्थः त
च्छब्दश्रवणाद्गोपीभिर्गुरुदृष्टाभिरभिमतंस्वस्येतिभावः कृष्णः एवंचमलिनत्वंध्वन्य
ते दृष्टः सचवंशीरवैः एवंचगोपनमभिव्यज्यते तेनचपुरुषधैर्यसंगनास्वधैर्यमिति ।
उच्चक्तनेत्रः अनुमतंदृष्टेर्ध्येसमंतंवक्ति एवंचवसंतेमोदनशालिन्योप्यंगनाः प्रमत्ततया
समीचीनपुरुषासमीचीनपुरुषविवेकमपास्यान्यथाचरणप्रवणाभवंति किंपुनः सकलक

नायकप्रेमातिशालिन्यहमिति अभिमानशालिनी नायिका मन्येऽन्यथाऽपरनायिकासक्ती वक्ति ॥ हे
इंदुकले शम्भुशिरसि स्थापितचरणेति हेतोरभिमानं माऽकृथाः किमिति इत्यत आह तवैतस्य गर्वस्य
त्वर्यः चंडीचरणधूलिभिर्मार्जनरूपं फलं भविष्यति एवं चंडी मानवती मा लेभ्य शंकरेणाचरणप्रणा
मे क्रियमाणे चरणरेणुमार्जनं भवतीति भावः एवं च कुपिता मत्सखी त्वां नाशयिष्यतीत्यत इष्टभाग
र्वं मा विधेहीति ध्वन्यते ॥ ६३२ ॥ कथं मयानया सह सबाधके स्मिन्नेव स्थले स्थेयमिति चिंताव्याकुलं
नायकं तत्रैव स्थापयितुं नायिका हृतीकयापि भण्या वक्ति ॥ हृत्त्विशिरसि प्राविषपदं ध्वननरुछाया
कीर्ण॰ वर्तं ध्वनयति तच्चानेकजनां[illegible]वं शिखरपदं पतनार्हत्वं गमयति समीरणाचलकुलायस्त्व

शंकरशिरसि निविष्टा संप्रति मा संभ्रम देव हे इन्दुकले ॥ फलमेतस्य भविष्यति तव चंडीच
रणरेणुभिर्मृज्यम् ॥ ६३२ ॥ प्राविषि शिखरे समीरणदोलायितनीडनिर्हतिं वसति ॥
कर्मकशारणमगणितभयमऽशिथिलकेलिखगमिथुनम् ॥ ६३२ ॥ ॥

खिनं समीरणपदमनिवारणीयतां द्योतयति दोलायितपदं पतनभीतिमावेदयति कर्मकपा
रणा एवं च दृष्टोपायविचारविधुरत्वं ध्वन्यते अगणितभयं एवं च भयवत्त्वेपि तद्गणनेनातिसाह
सवत्त्वं द्योत्यते अशिथिलकेलि एवं च सर्वथा चिंताशून्यत्वं व्यज्यते खगमिथुनं खेगच्छतीति कु
त्सितान्यत्रगमनसामर्थ्येऽप्यगमनेन निजवसतावतिप्रायितप्रेमवत्त्वं ध्वन्यते तेन चापरित्याज्य
त्वं एवं चान्यत्रगंतुं समर्थः खगोपि प्राक्तनकर्मभोगस्याप्रतिहार्यत्वमाकलय्य स्ववसतिं बाध
कवत्त्वेप्यपरित्यजन् क्रीडापरत्वेनात्यैव कालमतिवाहयति कथं पुनर्भवान् विवेकवान्महा
वीरो त्र स्वभीत्या स्थलं परित्यक्तुं विचारयितीत्यन्तु चिंतनवच्च त्वत्तः स्वखिनानया सहात्र
स्वस्य सुखमनुभवस्त्विष्टेति ध्वन्यते नायिकानायकचित्तं व्याक्षिपतीति तत्रत्ययः ॥ ६३२ ॥

गो॰टी॰ ९०॰

१७०

९०॰

अतिविंधवशात्संकेतागमनेनअपिलंबकइंबकांतर्दर्शितिंनायकमन्योन्ययानायिकास्त्वामवा
पदमायनपुरःसरंसंकेतवति ॥ ॥ श्लोक एवंचवयनरचनानिपुणत्वंध्वन्यते स्वरतत्स्वरूपसंग्रामेना
रतनदर्थक संग्रामपदेननिर्दयत्वंद्योत्यते एवंचकामतंत्राभिज्ञत्वमावेद्यते यद्वा मंतरनाभिला
षित्वमावेद्यते हृदयेममेतिभावः यानिगोप्यवस्तूनितेषुमुख्यसारभूत एवंचत्वदेकतानतापन्ना
हमितिव्यज्यते इदंत्वयापिविसायतएवेत्याह सर्वज्ञ एवंचमदीयप्रेमातिशयायातानेसर्वज्ञत्वंवा
हत्येनेतिभावः यद्वा स्वरतसमरनारद हृदयमेकपदं एवंचसर्वदास्वरतप्रकारचिंतनकारित्वमावेद्यते
अथवा नारदपदस्यशरीरावच्छिन्नात्मनिरूपणयाकदाचिदकृदीरस्यतसीभावभवनार्हतयाहृदयस्यत
तद्भावववत्तयातिशायितस्वरतसामर्थ्यवत्वमावेद्यते रहस्यरूपःसन् मुख्यसारस्वरूप एवंचत्वदति
रिक्तममान्यत्ररहस्यमितिभावः यद्वा सर्वज्ञानमेकपदं तथाचहृदनरहस्यज्ञानप्रधानमतसा

श्लोकस्वरतसमरनारदहृदयरहस्यैकसारसर्वज्ञ ॥

तिगोप्यत्वेपितवतदज्ञानवत्वेसंकेतस्थलंप्रतिमदनागमनहेतुभूतश्वश्र्वादिनिर्भर्त्सनमनिवा
रणात्स्वरहस्यज्ञानवत्वंस्वकर्मितिध्वन्यते गुरुजनसमक्षेसूक्त एवंचसन्निहितत्वेपिसर्वदाश्लेष
काकादिनापिश्वश्र्वादिसन्निधौवार्तायाकरणेनधैर्यवत्वमावेद्यते यद्वा गुरुजडः रहस्यधारणा
प्रतारणानिपुणत्वमावेद्यते पक्षे प्राहोच्चारणनिपुणस्य तव शुकस्येवास्ये केवलं रागः प्रीतिः
पक्षे लौहित्यं एवं च सा सर्वात्मना त्वय्यनुरागवती परं तु केवलं न मुखेनानुरागप्रकटनं करो-
तीति नादृशी न काचिदन्या सरला त्वं तु केवलं मुखेनैव प्रीतिमाविष्करोषि न तु मनसेति व्यज्य

गर्व

काचित्कांचिद्विहसति ॥ सायंसंध्यासमये कांतस्य भुजयोर्मध्ये पतिता मध्यपदेन निस्सर-
णानर्हत्वं व्यज्यते पतितेत्यनेन तस्या अपराधराहित्यं ध्वन्यते रजनी नाति निखिला त्रियामा
एवं च कांतभुजांतरपतनेन रतेनिर्वारणाशुद्धा तया न सा नापराधत्वमिति भावः प्रातः प्रदीप
दहती सख्यपगमात्स्वाहितिभावः उपसर्गा बहुलतैलादिदानेनेदानीमेव सायंतनसम
य इति संक्रमयति ज्ञानवत्त्वमावेद्यते सा बाला सखीभिरुपहस्यते एवं चाऽहहत्यंपासिनी प्रथम
यामे विधाय पश्चात्कांतशय्यां सहृदं प्रविशेति ध्वन्यते ॥ ९९ ॥ ॥ नायिकोहृतीवक्ति ॥ हेहनि

सायंकांतभुजांतरपतिता निखिलनीता रजनी सा ॥ उपसि दहती प्रदीपं सखीभि
रुपहस्यते बाला ॥ ९९ ॥ सा तीक्ष्णमानदहनामहतः स्नेहस्य दुर्लभः पाकः ॥ त्वादृ
रीभिव वहति प्रियासमानः सविस्मयः ॥ १०० ॥ स्नेहहृति जिगीषासमरः प्राणा
व्ययावधिः कारिणाम् ॥ न वितनुते कमनर्थं दंतितिनि तवयोवनो द्वेदः ॥ १०१ ॥ ॥

सा तीक्ष्णमानदहनामहतः स्नेहस्य दुर्लभः पाकः परि
पाको दुर्लभो भवति दर्वीमिव त्वां प्रयासनुगमनागमनव्यापारशालिनीं कुर्वन् पदेषु ॥
लोहयन् विश्वासं प्राप्तोसि अनेन तमानशालिनां तस्याः स्नेहावस्थितिर्दुर्लभा परं त्वदीय
परिश्रमेण लाभवित्रीति भावः एवं च बदेकसाध्यानसौ त्वमवस्थितिरिति व्यज्यते तीक्ष्ण
तेनो बहुतरस्नेहपरिपाकोपि बहुतरदर्वीचालनं विना दुर्लभो भवति ॥ १०० ॥ ॥ काचित्कांचिद
न्योन्यावक्ति ॥ हेहंतिनितवतारुण्योद्गमः प्रीतिनाशः जेतुमिच्छा प्राणनाशावधिः संग्रामः
इति कमनर्थं न जानानां न वितनुते अपितु सर्वं एवं च त्वन्निमित्तं तरुणानां परस्परस्नेहनाशादिभि

काचित्कंचिदाह ॥ मुग्धेप्रसीदेति शुकेजल्पति हसति प्रियो गृहाद्गच्छति गृहिणी क्रोधम
यादितिभावः सखीहसति कथमियानीमत्यन्तमधीनतामापन्न इति धियेतिभावः तोषा
गो.टी. दितिवाभावः बाला एवं च लज्जायोग्यत्वं व्यज्यते धरणीमिव विशति लज्जावशादितिभावः
१८९ सपत्नीज्वलति हेर्ष्यावशान्मानवशाद्वेतिभावः एवं चैतादृशाचरणमत्यन्तमसम्भावितमिति व्यज्यते
189 ७.२ ॥ नायकोवक्ति ॥ हेहिम नवप्रसादेन संकुचितांगी हृद्गणावस्थां चिन्मात्रे विस्फुरन्तू म
दनोपस्पर्शास्तां दयितां मुग्धामिव भजामि एवं च यद्यप्यासौ प्रौढापि नवोढेव भवतीति व्यज्य

सदनाद्गच्छति दयितो हसति सखी विशति धरणीमिव बाला ॥ ज्वलति सपत्नी (
वीरे जल्पति मुग्धे प्रसीदेति ॥ ७.२ ॥ संकुचितांगी हृद्गणांगकां मनोमात्रविस्फु
रन्मदनाम् ॥ दयितां भजामि मुग्धामिव तद्दिन नवप्रसादेन ॥ ७.३ ॥ सखि लग्नेव
वसन्ती सदाशये महति रससमयेतस्य ॥ वाडवसि विव सिंधोर्न मनागप्यार्द्रतां भ
जसि ॥ ७.४ ॥ ॥

ते तेन च तत्त्वज्ञो नान्यः कश्चिन्मदुपकर्त्तेति नवोढायामंगसंकोचादिमती भवति ॥
७.३ ॥ ॥ दूतीनायिकां वक्ति ॥ हे सखि एवं च हितोपदेशार्हत्वं व्यज्यते तस्य महति प्रशा
न्ते एवं चान्यकृतापराधसंगोपनकारित्वं द्योत्यते पक्षे गभीरे रससमये प्रीतिप्रचुरे पक्षे रसो
पक्षे जलं आशाये अन्तःकरणे अभ्यन्तरे सिंधोः आशये वाडवाग्निरिव निरन्तरं लग्नेव वसन्ती मनाग
पि आर्द्रतां स्निग्धतां पक्षे सजलतां न भजसि एवं च सततं च यद्यप्यन्तं तमासक्ता त्वं तद्दृश
तामेव भजसीत्यनुचितं न वेत्थमिति व्यज्यते ॥ ७.४ ॥ ॥ ॥

नायिकाहृतीवक्ति ॥ हेसखि एवंचैतास्यासंकेतस्थानेष्वाफूटितिकार्यंकरिष्यतीतिप्रतो
हृतीपरामृपादानं स्वयेहमनमप्यनिशांकिमाच्छाय मिहिरोदयसमयप्रमोदमितिष्ठ
चिन्ताङः वंध्योनिष्फलः नायकागमनाभावात् अवधिवासरहृवसोयंहिम दिवसः
समागतोकदर्थयति यथावधिदिवसेप्रातःप्रयोग्यास्यतिदयितस्त्यानेदः सायं
चप्रियतमानागमेप्रातःकालीनसुखोपमर्दनात्पंतदुःखंभवति तथाहिमदिव
सेप्रातःस्मरेरश्मिभिः संजातसुखंहृत्वाकृत्य सायंतनसमयेप्रीतदुःखमत्यंतंभ
वतीतिभावः एवंचरात्रिरियमत्यंतदीर्घानैकाकिनयातिवाहितुंशक्यते ततः संयो

सखिमिहिरोदयमनादिप्रमोदमपिधाय सोयमवसाने ॥ वंध्योहिमोव
धिवासरहृवदिवसः कदर्थयति ॥ ७.५ ॥ स्मरभवनेनतरुणाभ्यांपर
दारकष्टदृष्टितरुणाभ्याम् ॥

जयाम्यनायकेनममामितिध्वन्यते यद्वा तुषारदिवसस्त्वावधिदिवसोऽवसा
नेकदर्थयति एवंचैतावत्कालंमयाप्राणानिरुध्यस्थापिताः इदानीं दयिता
नागमननिर्णयेनैतेमयानिरोद्धुंपार्यन्ते अतएतदहृदान्तायुष्माभवतितथाायतस्वेति
सखीप्रत्युक्तिः एवंचाग्रेन्यादृग्यावस्तोनाहंभवस्यानिबोधनीयेतिव्यज्यते ॥ ७.५ ॥ हृ
तीनायिकावक्ति ॥ परस्पराहृदृष्टिकिताभ्यां चहुरागःप्रथमंनरस्तुचिन्तासंगमस्तु
ततोनतमप्यमंदस्तुपादानं तरुणाभ्यां देवालयेदेवपूजार्थमुपयतं तत्रागतमपरस्परानयिनं

गी. टी. १८.

190

हरभवनरमणेनावश्यकधर्माधर्मविवेककरणौचित्यमावेद्यते जनसंसर्गेवा ते
नचतद्गणनेनसाहसानिप्रायः देवार्चनार्थमुद्यतमित्यनेनमन्त्रस्यादेवादमस्तु
कमित्यावेद्यते तेनचपरलोकभयंश्राभीतिसूत्यत्वं कुसुममित्येकमित्येकवचने
नबहुतरकुसुमसाध्वेत्येनापिदेवार्चनस्यसंपादयितुंशक्यतयानतथादोषः
तदभावेचैतादृशाचरणोत्पंतमसत्वंव्यज्यते तेनचप्रीत्यभिप्रायः एकवचनम
विवक्षितमितिकेचन एवंचैतादृशीरीतिरतस्त्वयापिसर्वभीतिमुत्सृज्यय

देवार्चनार्थमुद्यतमन्योन्यस्यार्पितंकुसुममम्॥७.८॥ सायंकुमुदश्यामां
तमधुपानांनिर्यतांनादः॥मित्रव्यसनविषण्णैःकमलैराक्रंदइवमुक्तः
॥७.९॥

यथाचरणंविधेयमितिध्वन्यते॥७.८॥॥संजातोयंसंकेतकालइतिकाचित्कांचिदाह॥
सायंनिर्यतांभाविकमलसंकोचभियेतिभावः मधुपानां एवंचोन्मत्तत्वंध्वन्यते।
कमलांतर्नादः मित्रस्यसूर्यस्यविकासकत्वान्मित्रत्वं व्यसनमस्तस्तेनखिन्नैःक
मलैराक्रंदइवमुक्तः एवंचनायकःसंकेतोत्सवेनवयस्यैःसहमधुपीत्वाकाम
बाधाव्यसनमनुप्राप्तआस्ते इदंतुमित्रदुःखदुःखितैस्तद्वयस्यैरेवाभिहितमन
स्त्वरय संकेतकालएवजातइतितत्रगंतव्यमितिव्यज्यते॥७.९॥॥ १९८.

नायकोक्तिः ॥ मयैव एवं च नान्यस्यापराध इति व्यज्यते अत्यंतमहत्त्वे मन्तुका
रणे विहितेऽपि कंपमानोरुः एवं चपतननार्हत्वं रुदती भीत्येति भावः मम वचस्य
स्खले स्खलपदं विशालतां गमयति यद्वा कृत्रिमम अपि समाधानं न ह्यतं मयेति व्यज्य
ते पतिता न सखीनामपि सखीपदं च वचः स्खलपतनयोगपतां गमयति अपि स्त्रासि
नावश्यकतामावेदयति यद्वा न सखीनामपि सपत्नीनामित्यर्थः समवाप्तिमप्या
हारः मयैव मन्तुनिमित्ते विहितेऽपीत्यादि प्रागवत् एवं च सपत्नीसमक्षं तापराध
स्यालिङ्गनं व्यक्तमिति भावस्त्वर्थः अथवा सखीनामपि अपिर्नायिकां समुच्चिनोति

समर्हति मन्तुनिमित्ते मयैव विहितेऽपि वेपमानोरुः ॥ न सखीनामपि रुद
ती मम नैव वचः स्खले पतिता ॥ ७८ ॥ सुभगा व्यजनविचालनेन शिथि
लभुजाभूदियं वयस्यापि ॥ उद्वर्तनेन यस्याः समाप्यते किं चिरमपगच्छ ॥ ७९

मन्तुनिमित्ते मयैव विहिते मम वचः स्खलपवनपतितेनेति काकुः स्खलपवेत्यनेनात्यंतस
रलत्वं व्यज्यत इत्यर्थः एवं च मदागतानां तुल्यानां त्यागनेति ध्वन्यते ॥ ७८ ॥ काचिन्नर्मविह
सि ॥ हे सुभगा एतादृशांगनासमासक्तिमत्त्वादिति भावः इयं वयस्यापि एवं च दास्यादेः का
वार्तेति भावः व्यजनस्य विशेषचालनेन शिथिलहस्ताऽभूत् एवं च शनैर्व्यजनचालनेन विश्रम
पि भवतीति भावः सा च उद्वर्तनेन समाप्यते सात्विकभावरूपस्वेदातिशयादिति भावः किं
चिरमित्युपसर किंचित्परिहासेन हस्तगामने इदं त्वं साक्षी भविष्यसीति ध्वन्यते एवं चेयमत्यंतं त्वयासक्त उ॰ स॰ ७९ ई

गो॰ टी॰
१४१

नायिकासखीनायकंवक्ति॥ ॥ सलज्जा मृगाक्षी न वदति त्वं तत्तेनैव मृते श्लिष्यर्थः कु-
पितायास्त्वं नवोढा एवं च न वदतानादिना कोपो चिरं ध्वन्यते रोषेणान्वदीयतेत्यर्थः बहु-
चाटुवचनप्रणिपातसमाधेयाजाता एवं च नवोढात्वेन त्वं तत्तनायसहनेन कुपिता-
यां नायिकायां तव क्रोधकरणमनुचितमिति भावः एवं चेदानीं चाटुवचनादिना सा-
कोपमपनयत्वमिति व्यज्यते तेन च न वैवायमपराध इति ॥७९॥ ॥ कश्चित्कंचिद्वक्ति ॥
सम्यगगृहीतोऽदृष्टानां पदोंगीकारो यैः स्वित्पनेनत्यागानर्हत्वं व्यज्यते तेन चोपदेशः॥

सव्रीडानवरदनार्पतोष्ठकुपिताप्रकटमधिरूढा॥ बहुयाश्चाचरणाग्रह-
साध्यारोषेणजातेयम्॥७९॥ अगृहीत सलिलपदास्तव बः परभेदिन-
स्तीक्ष्णाः॥ दुरुषाश्चापि विशिखाश्चापि गुणमुक्ताः कस्य न भयाय॥८१॥

नर्हत्वं एते कटिति निष्कासनानर्हाः अपामपत्वं नस्त्यर्थः लघवो नीचाः प-
ते अल्पपरिमाणावनानीत्यर्थः परान्भेदयंति अन्येषां परस्परभेदजननेन क-
लहप्रवर्तका इत्यर्थः एते शरच्छेदकारकाः तीक्ष्णाः क्रूरकर्माण इत्यर्थः एते य-
द्यपि दुरुषाश्चापि बाणाश्चापि गुणच्युताः साधुत्वादिहीनाः एते गुणा-
ज्या कस्य न भयाय अपितु सर्वस्य भयायेति भावः एवं चैतादृक्पादुरुषसंग-
निकरणमनुचितमिति व्यज्यते ॥८२॥ ॥

१४१

इष्टस्य किमपि कर्म न फलाय सम्पतितीति कश्चिद् द्रूहन्ति ॥ ॥ स्वस्य कपोलेन प्रकटीकृतं । हानस्य ननो ऽभ्युन्मनेविति भावः अथ्य च स्वमुखेनाभिहितं एवं सत्या दानं कृतमि ति किमप्यनिर्वचनीयं प्रकृष्टमनन्यकारणाद्दानमपि अपिनान्य कर्मणः कावार्तेति भा वः राजस्य खलस्य च महमेव चकार एवं च खलसंगतिरनुचितेति व्यज्यते ॥ १२२ ॥ ॥ नायका समो ऽध्यादियमपि मूढेवैति मन्वान्य कनुत्पन्नप्रपतितं हृतीवक्ति ॥ ॥ पतिरचतुरः इदं सान्त्वं अत एव पतिपदं साभिप्रायं सा तु स्वकुत्रैव स्वर निपुणा एतमेवार्थमर्थान्तरन्यासेनद्रढय

स्वकपोलेन प्रकटीकृतं प्रणयकारणं किमपि ॥ विरहस्य दुर्जनस्य च महच्चका रेव दानमपि ॥ १२२ ॥ सान्त्वं पतिरविस्मयः सा तु स्वपित्येव निःश्वसने निपुणा ॥ । मार्त्तिकमाधाय मनु हृदयं वधितमेकलव्येन ॥ १२३ ॥ सौभाग्यमानवान्स त्वया वर्धीयमानमानी नः ॥ स्वं विरहपाण्डिमानं भस्मस्नानोपमं तनुते ॥ १२४ ॥ ॥

ति मन्त्रस्वरूपं गुरुं संस्थाप्यव वालव्यनाम्ना निषादेन धनुर्गृधिगतं एवं चण्डपदेशाक्रमो रामव्यव । स्यामात्रपालनं तमेतत्कारणं नानुशिष्यपतेवतेनलमिति वासिष्ठवचनान्मार्त्तिकं द्रोणाचार्यं विधायैकलव्येन धनुर्विद्याभ्यस्तेति भारते एवं च तस्या मचा तद्यं नाशंकनीयं त्वचेति व्यज्यते ॥ १२ ॥ नायकं दूतीनायिकां वक्ति ॥ ॥ सौभाग्याभिमानस्त्वयाध्वगाण्यापमानं प्रापितः भस्मस्नानसदृशं स्वं स्वकीयं विरहपाण्डिमानं क्वचित्तवेति पाठः ननु यथा ते कश्चिदभिमानी श्रवाणिनः सर्वाणि भस्म संलाप्य सर्वपरित्यक्तः स्वदशां तिष्ठति तथायं त्वद्विरहरूपभस्मस्नानं करोत्यतएवं प्रसन्नीभ

॥ अमरुशतकटीका ॥ ७७ ॥

गो॰ टी॰ १९२

192

काचित्कांचिद्वक्ति ॥ हे सखि एवं चोपदेशार्हत्वं व्यज्यते बहूनां संदेशो यत्र बहुतरो
पि प्रार्थ्यमानमित्यर्थः एवं चाश्रवणयाचनीयत्वप्रेषणीयत्वे व्यज्येते अथ च बहुत
रकार्मुकसंकेतविषयमित्यर्थः एवंविधं कज्जलं ग्रहीष्यतीत्युक्त्वा श्वशुरसदन
गमनावसरसंजातबाष्पजलं प्रसूतीसंवृणोति एवं च तत्रापि मया कज्जलं संभृ
तं विधाय कार्मुकास्त्वदर्थं प्रेषणीया इति न कापि चिन्ता त्वया विधेयेति व्यज्यते एवं
गृहपदं सार्थकं बहूनां सन्देशानुरूपमित्यनेन गुणतया यथेष्टरतयोग्यत्वं च ध्व

सखि मम कज्जलं बहुसंदेशं ग्रहीष्यसीत्युदिता ॥ श्वशुरगृहगमन
मिलितं बाष्पजलं संवृणोत्यसती ॥ १९५ ॥ संदर्शयन्ति संदरिद्रकुलटानां
नमसि विनतशाखिकल्पे ॥ मौलिमणिदीपकलिकावर्तिनिभा भोगिनो

न्यते ॥ १९५ ॥ ॥ कथं मयैतादृशसमये समागंतव्यमित्याशंकमानां दूतीं नायिका वक्ति ॥ हे वं
दीरि विनतशाखितुल्ये तमसि मस्तकमणय एव दीपकलिका येषां ते वर्तितुल्याभो
गिनः सर्पाः कार्मुकाश्च मार्गं संदर्शयन्ति एवं सर्पफणामणिजातप्रकाशेनैव
तवाध्वज्ञानं भविष्यतीत्यतो मार्गज्ञानाभावशंकामपास्य स्वकार्यं साधयेति ध्व
न्यते अथवा नायका एव मस्तकस्थमणिप्रकाशैर्मार्गं मादर्शयंतीत्यनेनानःपरं स
यात्रागंतव्यं किंतु स नायक एव त्वामागत्य संकेतं प्रापयिष्यतीति ध्वन्यते ॥ १९६ ॥ ॥

नं

१९२

उष्मसोत्कर्षेऽन्येषां ज्ञेऽप्यवगीतैव भवतीति कश्चित्कंचिदन्योक्त्यावक्ति ॥ मलिनेन मेघेनोद्गम्य सर्ववनं वनस्थलं तृणपंक्त्याच्छादितं शीतांशुरविनाशाच्छादिताः मार्गाः प्रध्वस्ताः व नमित्यनेन विश्रान्तिदानत्वप्रतिपादनाच्छीतांशुरित्यनेन सौम्यत्वव्यंजनाद्दुर्विदित्यनेन नि खिलकर्मप्रवर्तकत्वध्वननान्नानायंतीति श्रुत्युत्पत्त्यानाशादुत्पनेन सद्बुद्धिदातृत्वद्योतनान्नाम्न्याननूत्पनेनावधूपरत्वाणीयत्वदर्शनाद्देनाद्दपापुरुषापकरणाद्दसमीचीनत्वाविष्करणात्।

सर्ववनं तृणालीपिहितं तिरोहिताः शीतांशुरविनाशाः ॥ प्र
छन्नाः पन्थानो मलिनोद्गम्य मेघेन ॥ ७२९ ॥ सम्पगाऽनिष्ठ
न्नद्रूव योऽर्थस्त्वरयास्वयीस्फुटीक्रियते सर्व्वगएव भ।
वति प्रथमो विनतानन्तूजद्रूव ॥ ७२८ ॥ ॥ ॥

नऽष्टपुरुषोऽस्याशंसनमप्यनुचितं किंपुनस्तत्संपादनमितिव्यज्यते ॥ ७२७ ॥ ॥ झटिति मंत्रो नप्रकाश्यमद्यतिकश्चित्कंचिद्वक्ति ॥ ॥ सन्समीचीनोपीत्यर्थः सम्पक्तंसर्गोमसंजातोयोऽर्थस्त्वरयास्वयंप्रकटीक्रियते स्वयमित्यनेनात्मेनप्रकरणेमित्रैश्वापंवक्तिनास्माभिरेवंविचारित मितिसमाधानंश्राव्यमित्यावेद्यते अयः विनतायागरुडजनन्यास्तनूजोऽरुणास्तद्दनुसः व्यंगएव एवकारेणान्पथाद्बुद्धिकरणोर्हत्वंध्वन्यते ॥ ७२८ ॥ ॥

गो॰ टी॰ १९३

काश्चित्कं चिद्दक्ति ॥ ॥ समीचीनजन एव विद्याशोभार्थं भवति फलयुक्ता भवतीत्यर्थः दुर्जने तु निष्फला असत्सेवार्थसमर्थानन्यासेन द्रढयति अयं न हृदयदर्शित्वेन गद्रदः कैश्चिन्नोपादीयते एवं च विद्यावत्त्वेऽपि त्वया दुर्जनत्वं न विधेयमिति निरूप्यते एवकारेणोवनदुर्जनत्वे प्रतीतो दुर्जने त्याविति दृष्टे कमिवाभाति यद्वा शोभार्थैव विद्या जना विद्यासज्जने शोभाप्रदानधनादिप्रदेत्यर्थः दुर्जने मोघा फलत्वावच्छिन्ना जनिका शोभाप्रदा वि

सज्जन एव हि विद्या शोभायै सैव दुर्जने मोघा ॥ न विहृद्दर्शन तया कैश्चिन्नाद्रीयते रदघ्रः ॥ ७२७ ॥ सुभगो वहति जनस्तं निजपति वितिनैष रोचते मह्यम् ॥ पीयूषेऽपि हि भैषज्यभावोपहितभवत्यरुचिः ॥ ७२८ ॥ ॥

त्यर्थः अथवा सज्जने विद्यैव शोभायै फलदानत्वविद्येत्यर्थः दुर्जने विद्यैव मोघा निष्फला न त्वविद्येत्यर्थः ॥ ७२७ ॥ ॥ समीचीनस्वनायकप्रकरुचिकचिते निवारिणी काचित्कां चिद्दक्ति ॥ ॥ जनः एवं च सर्वैकवाक्यत्वमावेद्यते तं पतिं सुभगं वदन्ति मह्यं निजपतिरिति वितिहेतोरेष पतिर्न रोचते असत्सर्थसमर्थानन्यासेनाह भैषज्यभावापन्नेऽमृतेऽपि निश्चयेनारुचिर्भवति एवं च निजपतित्वमेव दोषहेतुरिति भावः एवं च पतिपरस्मर्थेन अत्र न रोचनहेतुरिति प्रागा

१९३

त्वत्कटाक्षवित्तेपादिभिः कामम् अपि न त्वां विना धृतिं लभत इत्यन्तिनायकतर्हस्तीनायिकां वक्ति ॥ ॥ सो-
ऽभगवान्भगतनापि तेद्दृष्टिः स्थितो धैर्यस्थेतिभावः पद्मेगतिनिष्क्रमो हतनः प्रयत्नो येन न त-
मपि हीनितिनिश्चयेन हिमाचलशिखरात्स्खलितानां गात्रेऽवत मिव हरति सोऽयमस्य-
हिमगिरिशिखरसाम्येनात्मस्त्वं डच्छ्राप्यत्वं च मन्यते एवं च सत्त्वयानुग्राह्योऽस्मीति ध्व-
न्यते ॥ ७२१ ॥ ॥ गृहिणीसत्त्वात्ततया सहसंगतिर्ममविरहवत्याविनीतिवाहिनीनाचिन्तिनायकोप-
क्ति ॥ ॥ हे बत तन्नु एवं च सहचरणीयत्वमावेदयते ममसहधर्मचारिणीपरिच्छिदं कुंडकं श्रन्नाद्या

सोऽभगवान्भगतनापि दृष्टिः स्थितो हतनप्रयत्नमपि ॥ हिमगिरिशिखरस्खलितानां
गेवैतावतं हरति ॥ ७२१ ॥ सहधर्मचारिणीममपरिच्छदः स्तनन्तु ने हसंदेहः ॥ न तु
मां स्वलघुनि तु हिनकृत्रकायेव सज्जंती ॥ ७२२ ॥ सकलगणीकनिकेतन दानववा-
सेनभरणीकहराज ॥ जानोसि भूतले त्वं सनामनादेयफलकस्तमः ॥ ७२३ ॥ ॥

दनोपकरणीयेतिभावः इहन संदेहः न तु पुनः सज्जंतीमेवातन्मया पद्मेसज्जीभवंतीमपीतदि-
वसीयकृत्रकायेव न सह्नवयति एवं च सा केवलं कुड्यविनीतात्रं वेलवतिसुखदेपतस्त्वयासह-
मत्संगतिनिशिवमवस्थास्यतीतिव्यज्यते ॥ ७२२ ॥ ॥ इष्टसंपर्कोपचरितिकदेनवकेपिसमीचीनाः समा-
यांतीतिकश्चिदन्योन्यपा वक्ति ॥ ॥ हेनिखिलगणीकस्थानभूतहराज दानववसत्या भूतलेत्वं
समीचीनानां नग्राह्याणां फलकस्तमानियस्थेनात्यजानासि भूतले त्वमित्यनेन नान्यमही
रुहाएतादृशाः किं तु त्वमेवेतिभावः एवं चैतादृशाडहसंगत्यासजातीयहंसमध्येन्वयाऽप्रतिष्ठा

हिमवद्गिरिपटल ॥ ७५ ॥

नायकोनापर्वंश्वसिति ॥ हे सुंदरि त्वदीये कर्णश्रोत्रे अथ च पर्याये नाटंकस्वरूपं कामि(
नोऽहमिति धारयति सति पक्षे ऊर्ध्वं कुर्वति सति अत्यंतनतीव्रतः कामिहृदयविदारकबा
गो. टी. १६४ णेतिभावः अर्जुनप्रणयी श्लक्ष्णस्पर्शः पक्षे पांडुसुतार्जुनप्रेरितस्पर्शः कटाक्ष इति
इतिभावः किमथ कर्णान्ताहितिभावः पक्षे तत्कल्पः एवं च कर्णांतविशाललोचनात्वमूर्तौ
बाणः किमथ कर्णान्ताहितिभावः पक्षे तत्कल्पः
न्मथ्यासिद्धजलूहलेनमानापनोदनमभिव्यज्यते सर्वथापनसंजातकौंतीतनयकर्णोपि
१९९ यदामहीं गिलितरथचक्रं निष्कासितुमुपक्रांतवांस्तदार्जुनेनबाणेन ताडित इतिपुराणा
अथवा कटाक्ष एव बाणो यस्य प्रतिस्तानशाह्वग्रहणाभाववत्वाद्र्जुनेन प्रणायः शीतिर्यस्तेनाद्र्

सुंदरि नाटंकमयं कामि वोढ हनि नावके कर्णौ ॥ बाणो निकामनतीक्ष्णः पत
निकटाक्षोऽर्जुनप्रणयी ॥ २२४ ॥ स्वाधीनैव फलार्जनोपजीव्यत्वसंश्रितच्छा जनैः
छाया ॥ सत्यं सेसमस्मरुहरुह एव जीवनमात्रमाश्रयस्म ॥ २२५ ॥

पाः कस्तोत्यंतकुडेनिपततिरथ्यवेगसंपदनादितिभावः ॥ २२४ ॥ ॥ भ्रमयादिकं समीचीनमित्यस्य
नाल्नीतिचिंतामाकुलं कं च न कश्चिदस्ति ॥ ॥ मरुभुवि कहनीतिमहद्भूरुट नस्येवमहदेशीयहदस्येवस(
मीचीनपुरुषस्यफलं इत्याहि पक्षे यथाश्रुतं नस्यसमृद्धिः स्वाधीनैव इदमत्रेपिलिंगविपरिणामेनाद्वे
नि जनानामुपजीव्यत्वं मन्नादिदानत्वात् पक्षे फलादिप्रदानात् अधिकाच्छाया इत्तरद्ःखनिवारकत्वा
मिन्यर्थः पक्षे यथाश्रुतं जीवनमायुः पक्षे जलं नस्येवमाशास्यं कर्कशादेशावसतिमानेवमर्णेनमहद्भू
हरत्यपि सत्यं सोपिविशेषणं एवं चायुष्ये सर्वमपि भवत्येवेत्यनस्त्वयानकापिजीवनतत्त्वचिंताविधे

१६४

संपत्तिसंपन्नसत्त्वपत्तिः सहजगहननिवाहिनी सखी नायिकां वक्ति ॥ हे सखि ज्वरस्येव दुर्जनस्य भूतिरैश्वर्यं पक्षे भवनं भूतिः संतापमोहकंपान् संपादयितुं जनं निरन्तरमपि हठेन स्मरति अधिकतरा भवति एवं चैतस्य संपत्तौ जानानायाः सपत्न्यादिसंपादनेन दुःखं किमस्याग्रे भविष्यतीति चिंताबाहुल्येन मोहस्य समधिकक्रोधकरणेन कंपस्य दंडदानेन चास्माकं प्राणविश्लेषमेवैतदैश्वर्यं करिष्यतीति न परं तस्य लेशमपीति कथ्यते ज्वरोत्पत्तावपि संतापादिकमतितरां भवतीति चायुर्वेदे ॥१२६॥ विद्येवाभ्यसनीया त्वयेदानीं नवश्री

संतापमोहकंपान् संपादयितुं निरंतरमपि जनस्य ॥ सखि दुर्जनस्य भूतिः प्रस-
रति हरं ज्वरस्येव ॥१२६॥ स्खलयति नतरां चपलत्वात् परिचयलेशं गुणेन नव
श्रीः ॥ कुलकामिनीव हसिती वाग्देवी जन्मजन्मापि ॥१२७॥ स्वनिलयनिक-
टे नलिनीमभिनवजातरुदां निरीक्षेव ॥॥

मनः कर्तुमक्षमिति कश्चित्कंचिदाह ॥ श्रीर्वैभवं वातिशयेन स्खलयति परिचयलेशं न रक्षति सरस्वती तु कुलकांतेव जन्मजन्मापि न त्यजति एवं च विद्याभ्यास आवश्यक इति भावः ॥ नायिका सखीं वक्ति ॥ हे सखि स्वनिलयनिकटेन तु निलये एवं चातिविरहयोगपत्त्वं ध्वन्यते नायिकायां पक्षे निलयनिकटस्थनेन दर्शनयोग्यत्वं तेन चावश्यपोषणीयत्वमावेद्यते अभिनवानां नूतनानां अपूर्णानां पत्राणां जातं समूहो यत्र एतादृशानि छदानि पर्णानि गुणानि यस्याः सा तां नलिनीं निरीक्षेव अविरागतः पतिः हा गृहिणीति प्रलपन्पतितः । एवं च मत्प्रस्थितो नियतमेषा विरहमसहमाना न जीवनवती प्राचीनन्वीम दलसमृद्धिशालि

नजीवति

टी॰

गो॰टी॰ १९५ 155

एवंचस्वस्वग्रहणायोग्यत्वंध्वन्यते कमलिनीनूतनसंजाततरलां एवंचसर्वपत्राभावोना
यिकाविरहनिबंधनएवेतिध्वन्यते हष्टैव एवंचप्रस्मायकरणेनातिप्रायितावैर्यमा॥
वेयते तत्कालमागतः एवंचचिरप्रवासाभावेनतथाविधविरहायायोग्यत्वेपितदवस्था
येनात्यंतासन्निरावेद्यते हारटहिणीतिप्रलपन् संपूर्णवाक्यानभिधानंचदुःखोद्रेक
मावेदयति पतिःप्राणेभ्योपिमयिस्नेहवानित्यर्थः पतितः मूर्छयेतिभावः ---
--- न्यात्स्व नचेयं व्याहतानोनजीवतीयमितिनलिनीदर्शनसमयमेवनिश्चयेन

हारटहिणीतिप्रलपन्नचिरागतःसखिपतिःपतितः॥ २२८॥
सखिचतुराननभावाद्दैन्यंक्वापिनैवदर्शयति॥॥ ॥

मूर्छितइतिध्वन्यते अचिरागतइत्यनेनैतादृशासंभावनानर्हत्वं।तद्दत्वेनहत्वेपितत्कर
णेनात्यंतनायिकासन्निमत्वंतनायकेव्यज्यतेइत्यर्थः॥एवंचैतादृशोनायकोन्यस्मानेति॥
त्रि॥॥हेसखि एवंचसत्यवाराईत्वंध्वन्यते अयं एवंचान्येषामन्यादृशीमतिरिति॥
भावः प्रियतमःविधानेवचतुराननभावात्तन्मुखत्वाच्छातुर्यवत्वादितिभावत्।
पदेचतुर्मुखत्वात् क्वापिवैमुख्यंविरसत्वमित्यर्थः पदेमुखाभाववत्वंनैवदर्शयति
दर्शयत्येवनेत्यपियोजना चतुराननभावात्देवेत्यन्वयः एवंचनचेतसःसकाशादितिभावः

१९५

चाम्पास्तु

न हृदि पितथापि एकस्यां त्वयीति भावः हृदयं यस्यैनाहृदशाण्व एवं चान्तर्यवशाद्दास
किंप्रदर्श्यति वाम्नत्वं तत्वय्येवासक्तहृदयत्वं व्यज्यते विधानेऽपिचतनौ स्वत्वेपि हृदयस्यै
कत्वात् यद्वा त्वमिप्रियतमः सर्वसपत्नीषु समबुद्धिरिति वादिनीं सखीं नायिका वक्ति एवं च
मय्येवासक्तिस्तस्यनान्यत्रेति ध्वन्यते ॥१२४॥ सद्दक्त्वाहित्वग्णगुणः कथं नपराङ्गनासक्त
इति तर्कयन्ती नायिकां नायकसखी वक्ति ॥ सः हृदमग्रेप्यन्वेति मधुरः सुन्दरः मिष्टभाषी
वा हृदं सत्यम् नात्रसंदेह इति भावः एवमग्रेपि एवं च स्पृहणीयत्वमावेद्यते वक्रः नियं
तं वक्रोक्तिनिपुणः कुटिलो वा एवं च पराङ्गनारञ्जकत्वं ध्वन्यते कलाधरः नूनं निश्चितं ए

अयमेकहृदय एव द्रुहिणाद्व प्रियतमस्तदपि ॥१२५॥
सत्यं मधुरो नित्यं वक्रो नूनं कलासमो दयितः ॥ ॥

वं च पराङ्गनाचित्ताकर्षणनिपुणत्वं व्यज्यते दयितः न पुनः कलङ्कोऽपवादस्तत्कृ
न्नः प्रतिपच्चन्द्र इव द्वितीयामपरां न वेद एवं च मधुरत्वादिगुणसत्वेपि नतादृगन्यः
साधुरिति व्यज्यते प्रतिपच्चन्द्रोपि मधुरो वक्रः कलावानपि निष्कलङ्को द्वितीयाम
भिधां तिथिं न जानाति सत्यं नित्यं नूनमिति पदैर्मधुरत्वादौ न संदेह इति प्रतिपाद
नेन तद्भत्वेपि नत्कार्याभाववत्त्वेनातिसद्भूतत्वं व्यज्यते तेन च तस्मिन्नन्यथा कथं
चिद्दृष्ट्याहृगाचरणासंभावनया कोपकरणं न रोचितमिति ॥

गो॰टी
१९६
196

प्रतियोगिविशेषानुपादानेन मधुरत्वादौ सर्वप्रतियोगिकत्वेन पूर्वांगाना
लंपरत्वनिर्वाहिनी सर्वैनायिकावस्तिः एवं चैतादृशनायकत्वमस्याः सर्वस्मिन्नाऽ
धिक्यमावेद्यते ॥७३॥ दुर्जनेष्वपि न स्वीयपक्षरक्षणमपीति कश्चिद्विशेषं विद्धि ॥ स्वांगी
कृतरक्षणोचितः सुजनः मैनाकाभिधपर्वतस्स्वस्वस्थानादपि विचलति अपि(
स्खलनानर्हत्वमावेदयति परसदनं गच्छतीत्यर्थः उलधौ रैवयाजडामूर्खा

सन्तवेद्यापि हि नीयामकलंकः प्रतिपक्षिद्ध इव ॥७३॥
स्वस्थानादपि विरमति निमज्जते नीचमपि भजते ॥ ॥
निजपक्षरक्षणमनाः सुजनो मैनाकशैल इव ॥७३॥ ॥

धीर्यस्मिन्निति जडसमूहस्तत्रापि मज्जति तद्रूपतामापद्यत इत्यर्थः यद्वा समु
द्रपर्यन्तमपि गच्छतीत्यर्थः एवं च तत्कृतागमनमावेद्यते स्वल्पमपि भजते आराध्य(
यति एवं च सुजनोऽयं हंसीकारं करोतीति निर्वाहं स्वस्थानं चिन्तयति नानाविधोपायैः करो
तीत्यर्थः इति सुजनस्य निन्दितैश्चोचितं भूतिः प्रवर्त्यते यत्रादौ तत्र प्रहृतेन्द्रभयान्मैनाको
पि पृथ्वीं विहाय समुद्रे गत्वा नीचदेशमवलंब्य स्थित इति स्वपक्षरक्षणप्रसिद्धिः ॥७३॥

१९६

मानवतीनायिकांसखीवक्ति ॥ हे सखि एवं च हितकथनार्हत्वं ध्वन्यते नेन च स
ङ्गमंकुर्विति वा श्मोरदकं संहृत्य कज्जलेनोपरञ्जयेनां दृग्भ्यांवलयश्चनरंगयेत्यर्थः दयि
नः एवं चावध्वयसमाधेयत्वमावेद्यते किसलयेंदीवरयोरेककालमेवकथं पश्य
तु एवं चरोदनादिना मलिनतामापन्नायाः दृशः कज्जलदानेन प्रसन्नतासंपादनेन च व्य
धिकरणत्वेन प्रसिद्धयोरपि पल्लवेन्दीवरयोरेकाधिकरणत्वसंपादनेन सर्वाद्भुतवस्तु
प्रदर्शनजनितानंददानेन च नायकं स्वाधीनतामिति भावः स्वामिनिस्थाने

संहृत्याश्रुबाष्पजलं सखि दृशावुपरञ्जयांजनेन कलयैनाम् ।
दयितः पश्यतु संप्रति पल्लवपंकेरुहसंगासकलरुचम् ॥ ।
॥७३२॥

स्वर्गे पल्लवेति स्थाने पल्लवे निपाठे स्वर्ग्यामधिरत्नेनां दृशामित्यध्याहार्यं वलये
नियोजना अंजनदानेन पंकजत्वसंपादनेन पंकजसत्वयोग्यता एवं च सरसि पंके
रुहकत्वप्रसिद्धा पल्लवेपि तद्भवनेन चमत्कारातिशयप्रदर्शनेन नायकाचित्ताक
र्षकत्वं नवस्तुलभमिति ध्वन्यते एनामिति पाठे नेत्रमित्यध्याहारः नायकं कल
यविलोकयेति वा योज्यं मानध्वायमन्यथासिद्धं कुन्दहलायपनेयः पल्लवपं
केरुहसंगासकलरुचमित्यपि पाठः क्वचित् ॥७३२॥ ॥

गो·टी·
१९७
197

अस्यां तं सा त्वद्विरहविनाशदस्यानिवेत्यवगत्यान्तुश्चाप्यानाम्यिकेतितन्नसावीतमध्यकं वक्ति ॥ ॥ सा
पांडुरिति दुर्बलाङ्गी नृत्यसि त्वं गता नियत्यस्याः एतावत्कृशत्वद्विरहवशादिति भावः त्वं यत्र न यस्मिन् त्रैवायाः
स्यसीत्यर्थः एवं चान्यविषयकप्रेमस्फूर्त्यमावेद्यते कठिनीवकेनवविदः एवं चात्वदी
य एवापराधो न तस्या इति भावः यद्वा येन व्याजेन तत्र गत्वा तत्समाधानं विधेयं तत्स
र्वं त्वया वितायते किं मयोपदेष्टव्यमिति भावः नेह हस्तग्रहमात्रसाध्या एवं च चाटुवच

सा पांडुदुर्बलाङ्गी नृत्यसि त्वं यत्र याति करिणीव । कठिनीव केन वविदो
हस्तग्रहमात्रसाध्या ते ॥ ७३३ ॥ सखि विश्वाञ्जनीया लक्ष्मीरिव कमलम्
स्विकरर्यस्य ॥ त्वं प्रवयसो मम रक्षाचीत्वाणमात्रोपभोग्यासि ॥ ७३४ ॥ ॥ ॥

ना किं किमपि नापेक्षितमिति भावः खटिकापि पांडुवर्णा हस्तमात्रलेखककरग्रहाधी
नाप्यत्र यत्र नीयते तेन तत्र तत्र गच्छति ॥ ७३३ ॥ ॥ कस्यचिद्दूतीं कांचन वक्ति ॥ ॥ हे सखि करर्यस्य
कमलस्य विश्वोपमर्या लक्ष्मीरिव एवं च पुरुषोत्तमसंगतियोग्यत्वं व्यज्यते कमलव
दने त्वं प्रकृष्टं वयो यस्य स एवंविधस्यास्य रक्षणं रक्षा वीक्षणं च तन्मात्रेऽप्युपयोगो यस्याः
कृपणा लक्ष्मीरपि तदुपभोगाद्यभावात् तथा विधेति भावः एताटक्त्वमसि एवं चात्यन्तसौ
दर्यशालिनी त्वमेतस्य वृद्धस्य गतयौवनस्य पयोगिनी पुरुषविशेषमन्तरेणेति व्यज्य

१९७

नायकः सख्यायं वक्ति ॥ कलहभिन्नया यस्तत्र तत्र गर्भपक्षाजातयथामां प्रत्येति न तथाऽह हृदयत्वयाना
यिकाभिप्रायज्ञानवशात् सख्या गवाक्षे विसमपि विकृतमप्यङ्कं विसहतां हृदिनितं विसहता मिम्य तेन भ
ययोग्यत्वं एवं च कलहोत्तरं संजातसंतापं नायिकाया वितापयन आविश्य विलक्षणाकृति जिनेसख्या कृते
भयमाजेन सन्निकटेनायिकागतेति नायिका कलहोनानि चिरावस्थायीति व्यज्यते ॥ १३५ ॥ स
खी नायिकां वक्ति ॥ हे सखि मय्येवं चरि शलाकया निहितं शुचकज्जलतंतुः तं प्रदर्शनेन रेखायां
ततीयत्वं व्यज्यते लोचनरूपोयः प्रारब्धस्तन्मोचनकर्त्री भ्रूरूपमनुपाउलिखितः किंगन्वेत
दयं अर्थान्नायकस्य हरति एवं चैतादृशा त्वदीयपरागानुगृहीतो निगृहीत इव संहृतः अतएवै(

हृदय त्वयागवाक्षे विसहन्तं किमपि तज्जितं सख्या ॥ यत्कलहभिन्नतल्पा भयकपटो
दैति मां हृदयत्नः ॥ १३५ ॥ हरतिशलाकानिहिताञ्जनलेखमस्य विनिहितः ॥ लोचनबा
णमुच्चांत भ्रूधनुषा किंगान्वेवोल्लिखितः ॥ १३६ ॥ हससि च रणप्रहारेणत्यादप्रसादि
तो भुविरवपि चि ॥ नासहशोपि हृतेनप्रियममहृदयाद्दहहनिःसरसि ॥ १३७ ॥ ॥ ॥

वाहमद्य नावयि प्रसन्नेति ॥ १३७ ॥

नमनत्वंप्रपद्मनमनुग्रहागोतिव्यज्यते अथवामुख्ये स्वंदरेनायकेत्यर्थः लोचनबाणमुच्चेत्यादियोज
नाप्रागवत् ॥ १३८ ॥ कोपवशात् प्रमानिनं नायकं नायिकास्माधते ॥ चरणानाडनेहासं कदाचिद्रायनी
याहूरीकृतोभ्यसोस्वापं करोषि असहशोऽयोग्येकृतेपि हे प्रियमम हृदयात्त्वं न विनिस्सरसि एवं च च
रणप्रहारादित्युपानुचिताववमाननेनकोपात्कृतेनापि चेतसा त्वद्विषयकानुरागभागिन्येवाहमिति चरणा
नाडनादि जन्यमदीयापराधमनादृत्यानुग्रहं कुर्विति व्यज्यते यद्वा सपत्नीसान्निध्यरूपानुचितेविहितेपि(
त्वयेनिभावः ममहृदयात्त्वं नापगच्छसि अत्र हेतुमाह चरणप्रहारेहससीत्यादि एवं च त्वदीयेनादर(

रूपगुणाकृष्टचित्तया त्वदीयेनादरेणानुवि
धासहनशीलत्व... निर्लम्पत इति व्यज्यते तेन
नावगणनेन क्रोधेन न मय्यवस्थिति

गो॰ टी॰ १९८

198

नायकेनायिकान्तिसक्तिविप्रोषंसखीवक्ति॥ हेसुभगतस्यानायिकायाःस्वमायितेनमुग्धत्वापेन त्वन्नामजल्पन्त्यांसत्यांसपत्नीहसति एतस्याश्रसतीत्वतानेनान्तरंप्रियाप्रियात्वंभविष्यती तिस्फुटताविर्भावादितिभावः श्वश्रूरोदिति इदंचेदन्यैःश्रुतंतनदानर्थ्यएवापद्येत अथ वेयमेनादृशीसंवृत्ताकथमतःपरंपुनस्तनयविवाहसंपादनमितिदुःखोद्रेकादितिभा वः सख्यश्चवदनंनायिकायाश्छादितिभावः पिदधते एवंचतासामस्फुटत्वसंपादनेन पुनर्नामग्रहेपिसम्पद्यानमन्येमांमाभवत्विति निधियेतिभावः एवंचैतस्यास्तत्रैतादृशी गतिरितित्वमेवाधुनाशरणमितित्वमगत्यात्वंतान्तरकांतामनुरुद्धालोतिमज्यते॥ १३८॥॥

हसतिसपत्नीश्वश्रूरोदितिवदनंचपिदधतेसख्यः। स्वप्नायितेननस्यांसुभग त्वन्नामजल्पन्त्याम्॥ १३८॥ हृदयंममप्रतिहरणविहितानाहतेःसावेप्रियाशोकः प्रबलोविदारयिष्यतिजा[illegible]कलशंनीरवेलेव॥ १३९॥॥ ॥

नायकःसखायंवक्ति॥ हेसखेप्रबलःप्रतिहरणंविहितानाश्रान्तिर्येनएतादृशः प्रियासंबंधी शोकः तरंगपंक्ति[illegible]लसंबंधिनद्यटमिवममहृदयंविदारयिष्यति एवंचमयिप्रस्थितेकृतोयोगो संजातप्रियादुःखप्रबलत्वाद्वारंवारंजायमानत्वान्ममहृदयंदुःखोद्रेकत्वाद्भिन्नंकरिष्यती त्यर्थः प्रियादुःखोदयप्राप्तंममदुःखंभावीतिभावः यद्वा वारंवारंजायमानःप्रबलः एवंचप्र तीकारानर्हत्वमावेद्यते प्रियायाः एवंचावश्यंभवनयोग्यत्वंशोकेद्योत्यते विरहजःशोको कोममहृदयंस्फोटयिष्यति एवंचप्रियाविरहजंदुःखंमयासोढुमशक्यमितितिनमयाप्रस्थि तिर्विधेयेतिमज्यते यद्वा अननुभूतप्रियाविरहःकश्चित्सखायंपृच्छति ॥ अग्रिमपत्रेऽपीयंटीका

प्रियासंबंधिशोकोममहृदयंविदारयिष्यति एवंचप्रियासंबंधित्वेनशोकस्यप्रियाहृदय
विदारकत्वमनुचितंनास्यहृदयविदारकत्वमितिव्यज्यते ममहृदयमित्यनेनहृदयविदार
णोऽसमर्थत्वेननिवारणोपायसंपादनेचावश्यकर्तव्यत्वंध्वन्यते नरंगपंक्तिरपिप्रतिहरण
कनाहतिःप्रबलाजलार्थप्रतिसंकल्पंस्फोटयति॥७३९॥॥नायिकासखींवक्ति॥॥इः
खेनवारयितमशक्यत्वात्तीव्रोदुःसहःसंवेगआधिक्यंयस्यसविरहःसमंतात्सर्वांगमित्य
र्थः सर्वत्रेतिवाक्वापिविश्रांतिस्थानंनास्तीतिभावः मांज्वलयतिहंतखेदेअरहण
स्नपनशिलामिव पुनर्नभस्मतांप्रापयति एवंचविरहेसतिजीवनान्मरणमेववरमिति

हंतविरहःसमंतात्ज्वलयतिदुर्वारतीव्रसंवेगः॥अरहणस्नपनशिला
मिवपुनर्नमांभस्मतांनयति॥७४०॥हत्वा[illegible]नरंगौर्वक्रपाचक्रेष्ववाप्य
यनिहितः॥फलदलवल्कलरहितस्त्वयांतविहीनहृत्पकः॥७४१॥ ॥

नटिनि=४

व्यज्यते॥७४०॥॥कश्चित्कान्तोभार्यांवक्ति॥॥हेनटिनि एवंचनिकामनगमनयोगपर्व
ध्वन्यते नरंगैर्हत्वा नरंगोहत्वा चक्रेषुभ्रमसाभ्रमेषुभ्रमिंप्रापितः आप्राप्ये
मध्येनस्थापितः फलदलवल्कलैर्हीनस्तरुस्त्वयाभ्रांतरिहोत्पकः एवंचनरंगाद्
पकटात्तैरेतंस्वाधीनीकृत्य पुनरितस्ततोभ्रामयित्वास्वांतःकरणोत्काःवा दूःखादिही
नत्वमासादयित्वा अकस्मात्परित्यक्तोऽयंनायकः इदमनुचितंतवेतिध्वन्यते
॥राम॥ राम॥ ॥॥७४१॥॥ ॥कृष्ण॥ कृष्ण॥ ॥

गो॰टी॰ सखीनायिकोक्तिः ॥ न विद्यते परो यस्मात् अनुत्कटइत्यर्थः यो भोगः सुरतं तत्रो
पश्लाघ्यायास्त्वदृढकाञ्चीवलिबंधेनोत्कटजूनो यो जघनः तद्धेतोः स्तनपृष्ठकस्यापि
१६९ षरेखेव रोमाली उल्लसति एवं च काञ्चीबंधत्रुटनोद्धरजघनकथनेन रतानि शय्याय व
त्वमावेद्यते ॥७४२॥ इति हरकारजल्पाख्या समाप्ता ॥ कथं त्वयि प्रीतिमकरवीति गो
पिनायके ... विनीतेति वादिनीं सखीं नायिकोक्तिः ॥ हीरस्यापि दयितत्वप्रीतिविष(
यत्वं यतो यस्मादित्यर्थः यांतेनोपचारं समामोपचारं अरोगिणामित्यर्थः आसाद्य
एवं च हीरस्य हीरत्वेन सर्वस्य स्पृहणीयत्वयेऽपत्वेऽपि रोगग्रस्तां प्रति न स्पृहणीय(२५

दृढकाञ्चीवलिबंधोन्नतजघनानल्पपरभोगश्लाघ्यायाः ॥ उल्लसति रोम(
राजिः स्तनपृष्ठभोर्गरलरेखेव ॥७४२॥ हरकारजल्पा ॥ हीरस्य च दयितत्वं

त्वमत्यंगगनानुरागरूपरोगग्रस्तं प्रति नाहं स्पृहणीयेति भावः एवं च न तस्याप
राधो न वा मम काचित्क्षतिरिति व्यज्यते तेन च कंचित्कालोत्तरमहं तस्य स्पृहणीया
भविष्यामीति तत्पुनः शैलस्यायं शैलः शैलसंबंधीत्यर्थः पतितशिलानामग्र
शैलः अग्न्यंतरकृतापाकइतिभावः ज्वरस्येव प्रीतेः शोषः अंगानि ममेति भा
वः आनमयति एवं च यथा पर्वतनत्योज्वरशोषो अंगानि बलादानमयति तथा शी
लसंबंधी प्रीतेः शोषो मां विनीततां प्रापयतीति भावः ॥ अग्रेऽपि अस्पष्टीकाशोषः

एवं च यद्यपि तथाविप्रतीते भावाद्हमविनीततां कर्तुमिच्छामि तथापि शीलमी
निशोषो मां वलाद्विनीततां नयतीति व्यज्यते तेन च न ममापराध इति यद्वा ना
यिका सखीं नायकं वक्ति हे पांथ एवं चापराधजनकत्वाभावो व्यज्यते यतः
शीरस्याप्युपचारमावर्तितत्वं शर्करादिसंपर्कादिकमित्यर्थः आसाद्य दयितत्व
प्रीतिविषयत्वं भवति एवं च स्वतः शीरस्य माधुर्यवृत्तेरप्यावर्तनशर्करासंपर्कादिवा
प्राप्तप्रीतिविषय एवं यथा तथापरागनालेपरसाक्षिप्ताहित्येन त्वयि प्रीतिविषयत्वे
पि वारं वारागमनचाटुवचनरचनादिभिर्नयाप्रीतिविषयत्वं भावीति व्यज्यते एवं
चाहमपराधाभाववानिति तूष्णीमवस्थितिरनुचिततरेति व्यज्यते तदुक्तं श्रेष्ठाः शे

॥ यतोऽपि श्रान्तोऽपचारमासाद्य ॥ शैलेंगान्यानमयति प्रेम्णः शोषो ज्वरस्येव ॥४३॥

लः पर्वतः ज्वरस्य शोष इव अंगान्यानमयति एवं च यथा वलाज्ज्वरशोषोंगानमनाभाव
मिच्छोरप्यंगानमनं करोत्येव तथा यदि च न हि विषयकबहुतरप्रेमवानसि तर्हि त्वदेव त्वां ब
लात्प्रणामादिषु शालिनं करिष्यतीति भावः एवं च नाहमपराधीति किमिति प्रणा
मादिकं करिष्यामीति वक्तुं नोचितं न वेति ध्वन्यते इत्यर्थः उपितनायिका
समाश्वासनमशक्ता ह नीनायकं वक्ति योजनाभावत् एवं च नस्यातीव्रः कोपो
न वाशीलप्रेमशोषः अतस्तस्याश्चेन दयितत्व इति भावस्त्वपि प्रतिभाति परं तु
मानस्यासाध्यत्वप्रदर्शनेनाभासत्वमायातीति ॥ ॥ ॥ ॥ ॥ ७४२ ॥

नायिका नायकं वक्ति ॥ अत्र संवृद्धिप्रदानुपाटानं ओष्ठमावेदयति अपसावि
तो हरीहतः यश्चरणावुपधानीकृत्य सुप्तएवासि तत्रहि तत्र उष्णैः संतापजनत्वा
दितिभावः निःश्वासैः पुलकयन् ऊरु किमुद्घाटयसि स्वयमेव हित्वा प्रतिमदी
या त्वमायश्चरणासन्निधौ सुप्तः हतोनिराकृतो सित्वं पुनर्ध्वष्टः करुविघटनं वारो
षीतिमहत्साहसत्वं वेतिध्वन्यते तेनचैतन्नमयासोढव्यमिति पद्यः यदपसावित
श्चरणावुपधाय सुप्तएवासि अतः त्वांतत्वदीयानुचितमितिभावः क्षमाफलमे
तांतमः पसावितो यश्चरणावुपधाय सुप्तएवासि ॥ उद्घाटयसिकिमरू
श्वासैः संपुलकयन्नुष्णैः ॥ ७४४ ॥ चुद्गोद्गवसमकटुतां प्रकटयनोविदधत
श्रमरस्तुच्चैः ॥ मधुनः पुरुषस्यववागरिमालघिमाचभेदाय ॥ ७४५ ॥ [illegible]
वाह उष्णैः श्वसितैः पुलकयन् ऊरु किमितिउद्घाटयसि एवंचत्वदीयसहनशील
तयामयात्वदीयापराधजंदुःखंमममनोऽङ्गं वजश्वासान्यतिलपजन्माऽविरमा
लिंगन [illegible] र्भवनादिविधेहीतिध्वन्यते एवंचपुलकयन्निति साभिप्रायकम् ॥ ७४६ ॥
कश्चित्कंचिद्वक्ति ॥ चुद्गमधुमृत्तिकामण्वचचुद्गोनीचः तडन्यत्तन्मण्वकटुतोद्भूतत्वं तां
अण्वचकटुभाविनांप्रयत्नतः उच्चैः कृत्वा टंसदंष्ट्रन्मारस्वष्यचगर्वयवतः उर्वेनः मधुनो
मातिकस्याः पुमपुरुषस्येवगौरवं लघुत्वंलाघवंतत्वच्छत्वंचभेदाय मधुमयं चुद्गाकं
रकारिकारिकेत्यर्थः एवंचायमसंगतिर्न विधेयेति ॥ ७४५ ॥ ॥ तद्यत्र्यासमाप्ता

गो॰टी॰ २००

२००

क॰ ५५

क॰ ५३

२००

स्वहस्तेनैवगुणाढ्यादिमहाकविकृतिसमर्पणं वक्ति ॥ गुणाढ्यभवभूतिबाणकालि
दासैः पूर्वैः प्राकृतैर्विभिन्नहृद्यैर्गांविलक्षणास्वरीतिप्रणालिनी वाग्देवी भजनेन मम को
दोषः नकोपीत्यर्थः दृष्टंसन्तः पश्यन्तु एवंच वाग्देव्याप्रकृत्यैवापि वेलक्ष्येन पूर्वैः
सेवितत्वान्मयापि वैलक्षण्येन सा सेविता तेन मद्दोषगणानं सतामुचितमिति भा
वः सूनृतनेनननास्तं प्रार्थना अथच पूर्वैर्गुणाढ्यादिभिर्विभिन्नरीतिलावण्य
पा वाग्देवी भजनेन मम को दोषः दृष्टं सन्तः पश्यन्तु एवंच यद्यदाचरति श्रेष्ठस्तत्त
देवेतरो जन इति वचनाद्वाग्देवी भजनं मम न दोषावहमिति भावः एवंच स्वस्मि

पूर्वैर्विभिन्नहृद्यांगुणाढ्यभवभूतिरघुकारैः ॥ वाग्देवी भजनेन मम
सन्तः पश्यन्तु को दोषः ॥ ७४६ ॥ ॥ सत्पात्रोपनयोचित ॥ ॥ ॥

त्वाकवित्वमावेद्यते एवंचकारपद्योपादानाश्लीलता ॥ ७४६ ॥ स्वग्रन्थस्य समी
चीनत्वात् सर्वहृदयञ्जनकत्वमिति वक्ति ॥ वस्तु सत्काव्यं मधुरवचनंच कस्यन हृदयं रञ्ज
यति अपितु सर्वस्येति भावः सत्पात्रेत्यादि विशेषणं दृष्टंवस्तित्यादित्रितयस्य
तदर्थस्वक्रमेण समीचीनं यत्पात्रं संपुटादि तत्रोपनयाय स्थापनाय उचितं चलन्
समीचीनप्रतिबिंबेनाभिनवमाधुर्यादायकं चनवं अदृष्टपूर्वमित्यर्थः स
त्पात्रोपनयोचितमित्यनेनात्यंत संरक्षणीयत्वं तेन च बहुमूल्यत्वमावेद्यते सत्पा
त्रे सहृदये उपसि यदुपनयः प्रापणं तत्रोचितं एवंच सहृदयस्यैव सत्काव्यश्रवणोचि

॥ कालिदासः ॥ ॥

गो॰ टी॰
२१
२०।

सत्पात्रेणा सहृदयेन वाप्य उपनयः पठनादिना तत्रोचितं एवं च सत्काव्यपाठेपि सहृदयस्यै
वाधिकार इति ध्वन्यते सत्त्वसंभ्रमनाडिकाम्यवासनावद्भूतानि प्राणालि हृदये सुप्रतिबिंबः
सम्यग्बोधस्तद्विषये भिनवं नवं परार्थाः सुष्ठुमतं सत्पात्राय समीचीनाय उपसमीपे ।
नयेन विनयेनोचितं त्वगणानि भूमिकारूढं वाक्यं तथीव सत्त्वता चत्वार्येव सतां गेहे
नो छिद्यन्ते कदाचनेति स्मरणात् सत्पात्रे प्रत्येतावतापि स्वधर्मसंरक्षणाकारित्वादि
तिभावः समीचीनः प्रतिबिंबो यस्य स्वर्णतादर्शो यस्य स्तनोप्यभिनवं नवपुष्पार्थमि ।
तिभावः एवं च मधुरवचने सुधासहपत्वप्रतिपादनान्निखिलतापापनोदकत्वं वक्ष

सत्प्रतिबिंबिताभिनवनवं वक्त्र ॥ ॥

तत्प्रतीत्यपि कलंकत्वं विरलत्वं वा ध्वन्यते अथवा मधुरवचनवतो देवरूपत्वं व्यज्यते
यद्वा मधुरैरेतत् साम्यं करोति वक्रछलेन सुलिखित्वादिति भावः तद्विषयकं यद्वचनं ।
तदित्यर्थः कथंभूतं सत्पात्रेषु मात्रादिसंपत्तिप्राणालि नियउपनयनमुपदेशस्तत्रोचितं
सतः सत्स्वरूपस्य ब्रह्मणः प्रतिबिंबनं प्रतिबिंबो विज्ञानं तेनाभिनवं स्वस्याधिकार्यो ।
वेदकृतयोपकारितया वाच्यपि भगवत्प्रतिपादकत्वाद्वेदा वेदान्तभागास्तथापि स
र्वेषां वेदान्तवाक्यानां ब्रह्मणि समन्वयसूत्रमात्वादेकार्थकत्वादेकत्वेनाभिरवचे
नेन अथवा सतः समीचीनाचरणस्य पात्रं गृहमित्यर्थः तस्य समीपे नयनं नयः प्रा २१

समिन्नाणिः सञ्चाचार्यश्रोत्रियमुपगाढेहित्यनेनानुरूपसन्नेर्विहितत्वादितिभावः
तेनोचितेनायोभ्यः श्राप्यदूत्यर्थः सम्प्रतिबिंबनं संप्रतिबिंबः समीचीनत्तानमभिनव
यद्वा मधुनामकदैत्यांगीकारकर्तुः परमेश्वरस्यवचनं वेदानभागाद्इतिभावः एवंचसा
त्काव्येभगाह्लादकत्वेनाप्रतिपादनेनात्रपपरिशीलनीयत्वं ध्वन्यते अनर्घमणि
तल्पनाप्रतिपादनेनचार्थप्राप्तिजनकत्वं व्यज्यते एवंचपुरुषार्थसाधनीभूततान
याकाव्येवपराविधेयत्वं ध्वन्यते अभिन्नमितिपाठे अनन्यसदृशीपूर्वापरविरोध
शून्यंसर्वोन्यत्रप्येकरूपमित्यर्थः अभिनवमित्यस्यनवमित्यस्यसर्वपर्यायाः ॥ ७४७ ॥ ॥

कस्यनजनयतिहर्षंसत्काव्यंमधुरवचनंच ॥ ७४७ ॥ ॥ एकाध्व
निर्द्वितीया ॥

एकामुख्या ध्वननं ध्वनिः व्यंजनेतिर्यावत् सैवद्वितीयासहायभूतायस्याः ।
एवंचोत्तमकाव्यमयीत्वंसमस्यात्वं ध्वन्यते त्रिभुवनसाररूपा यद्वा त्रिभुवनेसारं
रसस्तद्वतीत्यर्थः अथवा त्रिभुवनेसारंयस्या एवंचत्रिभुवनेप्येतन्दृशस्त्वेनिःसार
तैवासीदिदानीमनयासारवत्ताजातेतिभावः स्फुटमनिकिचान्तर्यपूरुषा यद्वा
स्फुटंव्यक्तं उक्तिचातुर्ययस्या पंचेषुर्मदनस्तद्रूपोयः पूरुषस्तस्यहितावक [illegible]
त्यनासहायतयेतिभावः श्रवणांश्रोत्रस्यसनामितिभावः भूषाभूषणरूपा
सप्तशतीनामकोयंग्रन्थः आस्ते एवंचसद्भिरियंसप्तशतीश्रोतव्येतिप्रार्थना

स्यः

गो॰ टी॰ २.२

202

पंचेषुषट्पदहिता अत्र बाणस्य षट्पदेन समं मञ्जरीत्वं व्यज्यते यद्वा सस्पृहा।
त्यां नायिकां त्वां रोपतेनावृषपस्पृहणीयत्वं व्यक्तं समस्पृहा सितां दृष्टिश्चस्तामित्य
ध्याहारेणायोजना ए हर्म्याद्रेरे एकारस्य हर्म्यादिरवाचकत्वमेकादशनिघंटुतो
बुद्धेयं अव्ययत्वाच्चास्य सर्वलिंगासर्व[illegible]विभक्तितुल्यत्वं कस्यास्तवस्याध्वनि
मार्गे हि तीयानानयाविनारदहान्तर्वर्तिस्तव मार्गमित्ति भावः एवं च गार्हस्थ्यस्य वे
क्षावनेयसमवपुषं सेवनीयेति व्यज्यते त्रिभुवनेसारभूता बहुविषयव्ययायास।
साध्ययागादिजन्यस्वर्गादावपि नायिके व भोगेष्वसुखमिति भावः यद्वा अत्रेः स
काशाद्भवती यस्त्रिभुवंगं आरूं ज्योतिस्तस्य वनं समूहं स्वसारः रूपा एवं चानेक

त्रिभुवनसारस्फुटोक्तिचातुर्या ॥

चंद्रसारैर्निर्मितेति भावः एवं चान्योपायासाध्यनायोपशामकत्वमावेद्यते ॥
यद्वा त्रिभुवनं सारं यया एवं च नायिका सा निखिले सारस्सारस्वरूपस्सापि त्रिभुवन।
स्य सारस्वरूपत्वेव भवतीति व्यज्यते स्फुटमुक्तिचातुर्यं यस्याः स्फुटमित्यनेन निः
संदिग्धत्वं व्यज्यते यद्वा स्फुटा सम्प्रसारा उक्तिर्यस्य प्रसन्नार्थकोक्तिशालिनि नाय
के चातुर्यं यस्याः एवं चानभिज्ञनायकं प्रतिघटितनकामिनीचमत्कारकातिरीतिन।
दानकाचिद्भवतिरिति भावः यद्वा अस्फुटो मौवक्रोक्तो चातुर्यं यस्याः पंचेषोर्मद
नस्य षड्भिः संधिविग्रहयानासनद्वैधीभावाश्रयरूपोपायैः पदाहे ह्रिरूपायस्था २.२

कामो ऽप्येनामेवासाद्य संध्याकषायैर्जगज्जयवत्तयाहहिभागभवतीतिभावः एवं च
मदनस्य सर्वस्वभूतेयमितिव्यज्यते पंचेषुपदेन स्वल्पसामग्रीवतोपि महत्तरकार्य
मा॰ निर्वाहकतयातिमंत्रनिपुणत्वमावेद्यते अथवा पंचेषोः बहुपदाबहुपदस्तस्मात्स्मात्
पेत्यर्थः अत एव हिता एवं चानयाविनामदनधनुर्वत्तर्थकमेवेतिभावः यद्वा पंचेषु
रूपभ्रमस्य रहिता एवं च प्रसिद्धललनातिशायिरूपा लीललतात्वनायिकायांव्यज्यते ने
नचातिकोमलांगीत्वं श्रवणाभूषणरूपा एवं च नायिकागुणेषु सर्वदाश्रवणोत्का
विषयत्वं ध्वन्यते यद्वा एकस्मादद्वितीयस्य ब्रह्मस्वरूपरसस्य यद्वा एकस्मात्स्वस्य ब्रह्म
स्वरूपरसस्याऽध्वनिमार्गे द्वितीयासहायभूतेतिभावः यद्वा एकस्य ब्रह्मणोऽध्वनि

॥ पञ्चेषुबहुपदरहिता ॥ ॥ ॥ श्री ॥

मार्गे द्वितीया ब्रह्मविद्येत्यर्थः त्रिभुवने सारं यया एवं च ब्रह्मविषयोत्पन्नत्वज्ञानस्य
सर्वत्र ब्रह्मभावनारूप सारसाम्राज्यमितिभावः स्फुटम् कोचात्वर्य सामर्थ्यं यस्याः
वाचामगोचरस्यापि प्रतिपादनादितिभावः यद्वा स्फुटप्रकारतयेतियावत् उक्तो प्रति
पादने सामर्थ्यं यस्याः श्रुतिनिगूढस्याप्यात्मरूपरसस्य स्फुटप्रतिपादनसामर्थ्यं न दृष्ट
मितिभावः स्फुटप्रकटे सर्वदा स्वप्रकाशरूपे ब्रह्मणि उक्तो वाच्यर्थं यस्याः स्वप्रकाश
त्वेऽकटितनिर्ज्ञानयोगपत्वेपि साक्षात्संपादनेन चात्वर्यं वक्ता पंचस्य प्रपंचस्य वापा र
पायेषु हृसंख्याकाः कामक्रोधलोभमोहमदमत्सरास्तेषां यत्स्थानं तस्य सहिता ४
यद्वा पंचस्य प्रपंचस्य रूपेषु रूपावाराः रूपा बहुकामक्रोधलोभमोहमदमत्सरः पादायस्यस पंचेषु पातः तस्माः हिता नाशिकेत्यर्थः ॥

गो॰टी॰ २०३ सहृदिनेनवर्णनरत्नविरोधिलक्षणायामाश्लिकाहृद्यत्वेनानिर्द्धःसहत्वं एभिःकाव्येवप्र
पंचस्यापिइःखदत्वं श्रवणस्यश्रोत्रानन्देत्याद्यिविधिविहितस्यभूषा स्फुतिजन्यत्वान् ।
स्यैवसमीचीनत्वमितिभावः समयानीसतांहृदिश्रास्तां एवंचरसेनहृदयाना
प्रतिपादनात्समयान्यांब्रह्मविद्यात्वप्रतिपादनाद्देतत्परिशीलनंसतांसर्वदास
मुचितमितिध्वन्यते संख्याक्रमोप्यत्र॥ ७४८॥ ॥स्वग्रन्थस्यावलोकनेप्रवृत्यर्थमा लोक
203 धिकर्यंवक्ति॥॥कविसंग्रामेसिंहनादः एवंचैनत्संदर्भश्रवणेऽन्यकवीनांदर्पहानि।

॥ भूषाश्रवणस्यसमयानी॥ ७४८॥॥

कविरणसिंहनादःसुरानुवादःसुधैकसंवादः॥॥
विद्वद्विनोदकन्दःसन्दर्भोऽयंमयासृष्टः॥॥ ७४९॥॥

खप्रपंभवतीतिध्वन्यते सुरेतिपाठे सुराःपण्डितास्तेषामनुवादोयस्य एवंचैतन्मा।
धुर्यन्यूनमाधुर्यवन्तापण्डिताराविनिभावः सुधायाएकःसंवादःसाजात्यंयस्यसः
एतत्सजातीयासुधेतिभावः यद्वा सुधायाःएकःसम्यग्वदनंवादोयस्यसः एवंचैतत्सं
दर्भस्यैकदेशोच्चारणंसुधासमस्वादावहं वाक्यवाक्योच्चारणमपिभावनादिकंतत्समानंदा
स्वादकमितिध्वन्यते विद्वांसोविनोदस्यकंदः एवंचैनत्संदर्भस्याविनोदजनकत्वाभा
वेनत्वनितिरितिभावः अयंसंदर्भोमयासृष्टः॥ ७४९॥ ॥

मे शिष्यसोदराभ्यां उदयनबलभद्राभ्यां सप्तशती रविचंद्राभ्यां द्यौरिव निर्मली
कृत्य संशोध्य पदैर्ध्वांतरहितां कृत्वा प्रकाशिता शिष्यसशिष्यद्वाराविलासिता
पदैः प्रकाशा विषयीकृता एवं च प्रथमतः स्वयं मत्कृतिस्तत उदयनाचार्यब
लभद्राभ्यां संशोध्य शिष्येभ्यः काशिता अनेनात्र दूषणं विभाव्यो ज्ञापनीयमिति
व्यज्यते ।। ७५० ।। ।। मतिमान् गोवर्द्धनाचार्यः हरिचरणयोरंजलिं प्रणाममित्यर्थः
विरच्येति भावः सततं कविप्रेष्ठसंतोषाय एवं चापकृष्टकवीनामसंतोषेन का

उदयनबलभद्राभ्यां सप्तशती शिष्यसोदराभ्यां मे ।। द्यौरिव रविचंद्रा
भ्यां प्रकाशिता निर्मलीकृत्य ।। ७५० ।। हरिचरणांजलिममलं सततं
सत्कविमुदेऽमलां मतिमान् ।। अकृतार्यासप्तशतीमेतां गोवर्द्धनाचा
र्यः ।। ७५२ ।। ।। इति श्रीगोवर्द्धनाचार्यकृतार्यासप्तशती संपूर्णा ।। ।। ।। शुभं ।।

चिन्तितिरितिभावः अमलामेतां सप्तशतीमकृत अत्रापरोक्षेपि परोक्षवन्निर्देशो
नौद्धत्याभावो व्यज्यते यद्वा मतिमान् एवं च सप्तशत्याभ्यान स्वप्रयोजनं करणं तत्र चितमे
नस्येति भावः गोवर्द्धनाचार्यः सततं कविवरहर्षाय स्थिता मिति विशेषः एतामार्या
सप्तशतीं अमलं स्वच्छं हरिचरणयोः अंजलिपुष्पांजलिमकृत तदर्पणीकृतेति भा
वः एतन्यदेपि प्रयाकृतेनिवचनाभावश्चाचार्यस्य विनयवत्तामावेदयति ।।

गो॰टी॰
२४

अत्रभामासत्यभामेतिवत्॥ अंजलिः पुष्पांजलिः॥ तात्पर्यान्वयानुपपत्त्यालक्षणेति
वा॥ तद्द्वारहरकंचाऽमलपदम्॥ ७५१॥ ॥ ॥ ॥ अर्थानामेकवाणीरअबहुप्रकारासंदर्भा
नेनदपिनिर्वहणत्वमेयम्॥ मदूर्मिनाम्नसवनीनिखिलावदातसाहित्यधुनालिवि।
बुधैः परिशीलनीया॥ १॥ अल्पैवास्मिनरससरसत्त्वदर्थ्यकगिरोवेदांतभाग्यः परंतन्वत्वैव
निरमायियन्निजधियाविस्तारहीनंमया॥ नद्धोवङनवाचिसाचिरचनंव्यंगपार्थसं
दीपनंसीतासंयुतरामचन्द्रचरणांभोजेचिरंतिष्ठतु॥ २॥ अहेलोचनविंडुसमश्च
प्रभ्रन्ब्रस्तारसंलतिनेचैत्रेमासिसितेप्रतिपत्दिवसेमार्तण्डसद्वासरे॥ पुण्यपत्त
नीवासिनाहमतिनाऽनंतानाभिधेनादरात्काश्यपासहिडषामकारितगूढकाव्यांगार्थ
संदीपनम्॥ ३॥ कदाचित्कस्मिंश्चिद्ध्रुहचसियदिवार्थममभवेद्भ्रमः सोयंसद्भिर्नखलुग
णनीयोनिजहृदि॥ भ्रमाभावंयस्मिन्निखिलनिगमोप्याहसततंसएवैकोयसान्नगति
जगदीशोरघुपतिः॥ ४॥ ॥ इतिश्रीमद्गोदावरीपवित्रतीरप्रतिष्ठानपुण्यपत्तनभस्थितिविराजमान
नीलकंठपंडिततनूजबालोपंडितात्मजतिमाजीपंडितांगजानंतपंडितविरचितेगोवर्द्ध
नसप्तशतीव्यंग्यार्थदीपनंसमाप्तिमगमत्॥ शुभंभूयात्॥ ॥ नागांकेभूप्राणांकसंख्य
प्रमेहिश्रीविक्रमात्कार्तिकेकृष्णेतरेभजीवभाद्रदिवसेविश्वस्यलोपत्तने॥ भूया
च्चेतसिकासपंडितमहादासवर्द्धनव्याख्याकाव्यश्रीहरिचन्द्रशर्मलिखितंतो।
त्वाप्यऽसच्छोध्यतामु॥ १॥ ॥ सं॰ १८५० कार्वदि ७ गुरौ संपूर्णम्॥ शुभम्॥ ॥